प्राच्यविद्यासंशोधनालयग्रन्थमाला—११८

श्री भगवत्पादशङ्कराचार्य विरचितं

श्रीदक्षिणामूर्तिस्तोत्रम्

रामतीर्थीयव्याख्यासहितेन सुरेश्वराचार्यकृतमानसोल्लासेन
स्वयंप्रकाशयतिकृतया तत्त्वसुधया
कर्णाटकभाषानुवादेन अनुबन्धैश्च समलङ्कृतम्

सवार्तिकं पञ्चीकरणं च

संपादकः
विद्वान् एन्. एस्. वेङ्कटनाथाचार्यः
सीनियर् रिसर्च् असिस्टेण्ट्
प्राच्यविद्यासंशोधनालयः
मैसूरु

प्राच्यविद्यासंशोधनालयः
मैसूरु विश्वविद्यानिलयः
मैसूरु
१९७२

SREE DAKSHIṆĀMŪRTI STŌTRAM

प्राच्यविद्यासंशोधनालयग्रन्थमाला—११८

श्री भगवत्पादशङ्कराचार्य विरचितं

श्रीदाक्षिणामूर्तिस्तोत्रम्

रामतीर्थीयव्याख्यासहितेन सुरेश्वराचार्यकृतमानसोल्लासेन
स्वयंप्रकाशयतिकृतया तत्त्वसुधया
कर्णाटकभाषानुवादेन अनुबन्धैश्च समलङ्कृतम्

सवार्तिकं पञ्चीकरणं च

संपादकः
विद्वान् एन्. एस्. वेङ्कटनाथाचार्यः
सीनियर् रिसर्च् असिस्टेण्ट्
प्राच्यविद्यासंशोधनालयः
मैसूरु

प्राच्यविद्यासंशोधनालयः
मैसूरु विश्वविद्यानिलयः
मैसूरु
१९७२

श्री दक्षिणामूर्तिस्तोत्रम्

SREE DAKSHIṆĀMŪRTI STŌTRAM

UNIVERSITY OF MYSORE
ORIENTAL RESEARCH INSTITUTE SERIES

General Editor
Dr. G. MARULASIDDIAH, M.A., Ph.D.
Director, Oriental Research Institute and
Professor and Head of the Department of Post-graduate
Studies and Research in Sanskrit, Manasagangotri,
University of Mysore, Mysore

Published by
The Director,
Oriental Research Institute
University of Mysore
MYSORE

ORIENTAL RESEARCH INSTITUTE SERIES No. 118

SHANKARACHARYA'S

DAKSHINAMURTI STOTRAM

With 'Tattvasudha' of Svayamprakasha
and 'Manasollasa' of Suresvaracharya,
with the commentary of Ramatirtha

AND

PANCIKARANA of Shankaracharya
with Suresvaracharya's Vartika

Critically Edited by
Vidwan N. S. VENKATANATHACHARYA
Senior Research Assistant
Oriental Research Institute, Mysore

ORIENTAL RESEARCH INSTITUTE
UNIVERSITY OF MYSORE
MYSORE
1972

First Edition : 1895
Second Revised Edition : 1972

© The Oriental Research Institute
Mysore 1972

Published at The Oriental Research Institute, Mysore by the Director and Printed by Sri G. H. Rama Rao, at the Mysore Printing and Publishing House, Lakshmi Buildings, Mysore

प्राच्यविद्यासंशोधनालयग्रन्थमाला—११८

श्री भगवत्पादशङ्कराचार्य विरचितं

श्रीदक्षिणामूर्तिस्तोत्रम्

रामतीर्थीयव्याख्यासहितेन सुरेश्वराचार्यकृतमानसोल्लासेन
स्वयंप्रकाशयतिकृतया तत्त्वसुधया
कर्णाटकभाषानुवादेन अनुबन्धैश्च समलङ्कृतम्

सवार्तिकं पञ्चीकरणं च

संपादकः
विद्वान् एन्. एस्. वेङ्कटनाथाचार्यः
सीनियर् रिसर्च् असिस्टेण्ट्
प्राच्यविद्यासंशोधनालयः
मैसूरु

प्राच्यविद्यासंशोधनालयः
मैसूरु विश्वविद्यानिलयः
मैसूरु
१९७२

प्रथमं मुद्रणम् १८९५
द्वितीयं सुपरिष्कृतं मुद्रणम् १९७२

आरक्षिताः सर्वेऽप्यस्याधिकाराः

मैसूरु प्राच्यविद्यासंशोधनालयनिर्देशकैः प्रकाशितम्
श्री जि. एच्. रामराव् इत्येतैः स्वीयमुद्रणालये मुद्रितम्

श्रीदक्षिणामूर्तिः



चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा ।
गुरोस्तु मौनं व्याख्यानं शिष्यास्ते छिन्नसंशयाः ॥
स नो देवः शुभया स्मृत्या संयुनक्तु

ॐ

श्रीवटमूलदक्षिणामूर्तिसंस्मरणम्

श्रीशारदातिलके—

हेमाचलतटे रम्ये सिद्धकिन्नरसेविते ।
विविधद्रुमशाखाभिः सर्वतो वारितातपे ।।
सुपुष्पितैः लताजालैः आश्लिष्टकुसुमद्रुमैः ।
शिलाविवरनिर्गच्छन्निर्झरानिलसेविते ।।
गायद्भृङ्गाङ्गनासङ्घे नृत्यद्बर्हिकदम्बके ।
कूजत्कोकिलसङ्घेन मुखरीकृतदिङ्मुखे ।।
परस्परविनिर्मुक्तमात्सर्यमृगसेविते ।
आद्यैः शुकाद्यैः मुनिभिः अजस्रं समुपस्थिते ।।
पुरन्दरमुखैर्देवैः सेवाऽऽयातैः विलोकितम् ।
वटवृक्षं महोच्छ्रायं पद्मरागफलोज्ज्वलम् ।।
गारुत्मतमयैः पत्रैः निबिडैः उपशोभितम् ।
नवरत्नमयाकल्पैः लम्बमानैरलङ्कृतम् ।।
जलजैः स्थलजैः पुष्पैः आमोदिभिरलङ्कृतम् ।
शृण्वद्भिः वेदशास्त्राणि शुकवृन्दैर्निषेवितम् ।
संसारतापविच्छेद कुशलच्छायमद्भुतम् ।।

विचिन्त्य, तस्य मूलस्थे रत्नसिंहासने शुभे ।
आसीनममिताकल्पं शरच्चन्द्रनिभाननम् ॥
स्तूयमानं मुनिगणैः दिव्यज्ञानाभिलाषिभिः ।
संस्मरेत् जगतामाद्यं दक्षिणामूर्तिमव्ययम् ॥

श्रीमानसोल्लासे—

प्रोद्यच्छाखमहावटद्रुमतले योगासनस्थं प्रभुं
प्रत्यक्तत्त्वबुभुत्सुभिः प्रतिदिशं प्रोद्वीक्ष्यमाणाननम् ।
मुद्रां तर्कमयीं दधानममलं कर्पूरगौरं शिवं
हृद्यन्तः कलये स्फुरन्तमनिशं श्रीदक्षिणामूर्तिकम् ॥

श्रीतत्त्वसुधायाम्—

मौनव्याख्याप्रकटितपरब्रह्मतत्त्वं युवानं
वर्षिष्ठान्तेवसदृषिगणैः आवृतं ब्रह्मनिष्ठैः ।
आचार्येन्द्रं करकलितचिन्मुद्रं आनन्दमूर्तिं
स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ॥

श्रीदक्षिणामूर्तिवर्णमालास्तोत्रे—

वक्तुं धन्याः संसृतिवार्धेः अतिमात्रात्
भीताः सन्तः पूर्णशशाङ्कद्युति यस्य ।
सेवन्तेऽध्यासीनं अनन्तं वटमूलं
तं प्रत्यञ्चं दक्षिणवक्त्रं कलयामि ॥

श्रीदक्षिणामूर्तिस्तोत्रे—

चित्रं वटतरोर्मूले वृद्धाः शिष्याः गुरुर्युवा ।
गुरोस्तु मौनं व्याख्यानं शिष्यास्ते छिन्नसंशयाः ॥

PREFACE TO FIRST EDITION

The *Dakshiṇāmūrti-Stotra* is one of the many hymns published under the name of *Sankarāchāya* and may be classed among the few genuine productions of the author excepting his commentaries on the Upanishads, the Bhagavadigtā and the Brahmasūtras. There is a *Vārtika* or commentary by *Sureśvarāchārya* on this hymn, named *Mānasollāsa*. It is one of the five Vārtikas attributed to Sureśvarāchārya. Manuscripts of this Vārtika are very rare in this part of the country, and the work has not hitherto been easily accessible to the public at large, though the others* have, of late, been published severally at Bombay, Poona and Madras. The publication of Mānasollāsa was undertaken under the direction of Sir K. Śeshādri Iyer, K. C. S. I., who has since kindly put me in possession of his manuscript copy of the same.

Nowhere in the hymn or the commentary is the author of either mentioned by name. The commentator refers in his Vārtika to the author of the hymn by mere general terms such as *Kavi* (author) and *Guru* (teacher). The style and the subject-matter, however, of the two works incline us to believe in their genuineness. Notwithstanding the attempts of several oriental scholars to fix the date of Śaṅkarāchārya, there has been a certain amount of uncertainty regarding it, the date assigned to him varying from the sixth century before Christ to the eighth century A.D. The date of Sureśvarāchārya, closely connected as it is with that of his reputed teacher, has not been more satisfactorily settled.

The hymn is termed Dakshiṇāmūrti-Stotra merely because the name Dakshiṇāmūrti occurs in the last line of each verse as

*1. Naishkarmyasiddhi. (Bombay and Benares)
2. Taittiriyopanishad-bhāshya-Vārtika. (Poona)
3. Brihadāraṇyakòpanishad-bhāshya-Vārtika. (Poona)
4. Panchikarana-Vārtika. (Madras.) As the Madras Edition has been printed in Telugu character, I have appended to this volume a Devanagari Edition of the same collated with the MSL, at my disposal.

the burthen of the hymn. It is not dedicated to the worship of any form of Śiva as the title may at first sight imply. The chief object of the hymn is, as stated in the Vārtika, to expound briefly the nature of the Ātman – the highest self of man as of all other beings, its relation to the Universe, the means by which it may be realised, and the final bliss resulting from this realisation. In meditating upon the truths embodied in this short hymn with a view to their complete realisation, the devotee has to bear in mind the fact that the Ātman is *Parameśvara,* the Supreme Lord Himself, and to look upon his *Guru,* the spiritual teacher, as the embodiment of the Supreme Lord. The problems to which the hymn is intended to offer solutions are stated in the initial verses of the Vārtika and at the commencement of the several sections thereof. They comprise the main heads of the subject-matter of the Brahma-sūtras and are arranged in a similar order.

Though the hymn discovers no mark of preference on the part of its author for the Śaiva religion in general or any particular form of it, the author of the Vārtika cannot be said to have been completely free from the influence of the Śiva cult. He invokes Śaivic gods and goddesses at the commencement of his work and draws upon Śaiva-Āgamas, or similar works dedicated to the Śaiva cult, for the classification and nomenclature of the principles constituting human nature and the cosmos. The details connected with the mystic practices recommended in the work may also for the most part be traced to the same source. In fact, Śaivic theosophy and mysticism appears to have been the form of religion most acceptable to the Vedic commentators and Mīmāmsic writers of the period. But the metaphysics that forms the chief feature of the Vārtika is purely Vedāntic and closely follows the doctrine of Saṅkarāchārya, whose great service to the cause of orthodox Hinduism consisted in the reconciliation he effected of the several warring religious systems of his day by supplying them with a common metaphysical basis which had the effect of turning for several centuries the attention of their respective followers to the essentials of religion and away from the unmeaning formalities

and revolting practices that passed for religious exercises in those days of corruption.

The two other commentaries that are included in this volume—the one on the hymn itself by Svayamprakāśa* and the other on the Vārtika by Rāmatirtha†–have no individuality of their own, and they are valued as explaining clearly brief or obscure statements of doctrine, of which there are several in the Stotra and the Vārtika.

The works comprised in this volume have been edited from the following manuscripts :—

I. **The Text with Svayamprakasa's commentary.**

क.—A Telugu MS. belonging to Pandit Dakshiṇamūrti Śāstri of the Oriental Library.

ख.—A Nāgari MS. procured by Pandit Narahari Jośyar of the Oriental Library.

ग.—A Telugu MS. kindly lent by Pandit Gangādhara Śastri of H. H. the Maharaja's Sanskrit College.

II. **The Vartika with Ramatirtha's commentary.**

क.—A Grantha MS. of the Vārtika belonging to Sir K. Śeshádri Iyer, Dewan of Mysore. This codex is very much injured, and in consequence portions of the work have also disappeared.

ख.— A Telugu MS. copy of the Vārtika kindly lent by Pandit Kāma Śastriar of Madras.

ग.—A Grantha MS. of tho Vārtika with Rāmatirtha's commentary thereon, belonging to the Oriental Library.

घ.—A Telugu MS. of the Vārtika with Rāmatirtha's commentary belonging to Pandit Seetarama Sastri of The Bangalore Sanskrit College.

---

* *Śvayamprakasa* also commented on the *Harimide-Stotra* of Sankaracharya, and on the *Advaita-makaranda* of Lakshmidhara.

† He is also the author of commentaries on *Maitrayaniyopanishad* and the *Upadesasahasri* of Śankaracharya.

The MSS. of Svayamprakâśa's commentary are indifferent; and all of them exhibit errors of commission and of omission, not purely clerical. The copies of the Vârtika, on the other hand, are good, the last being by far the best. Free as this last is form errors except a few clerical ones which can be easily corrected, it has been found a very valuable guide as furnishing a commentary which has enabled us to restore the text of the Vârtika to the form in which it was at the time of the commentator. The readings of the other two, where suggestive, have been given as foot-notes.

MYSORE,
February 1895.

A. MAHADEVA ŚÂSTRI.

ಎರಡನೆಯ ಮುದ್ರಣದ ಮುನ್ನುಡಿ

ಮೈಸೂರು ವಿಶ್ವವಿದ್ಯಾನಿಲಯದ ಪ್ರಾಚ್ಯವಿದ್ಯಾಸಂಶೋಧನಾಲಯವು **'ದಕ್ಷಿಣಾಮೂರ್ತಿಸ್ತೋತ್ರ'**ವೆಂಬ ಈ ಗ್ರಂಥದ ಎರಡನೆಯ ಮುದ್ರಣವನ್ನು ಇದೀಗ ಬೆಳಕಿಗೆ ತಂದಿದೆ. ಶ್ರೀ ಶಙ್ಕರಾಚಾರ್ಯವಿರಚಿತವಾದ ಈ ಸ್ತೋತ್ರಕ್ಕೆ ಸ್ವಯಂಪ್ರಕಾಶ ಯತಿಯು ತತ್ತ್ವಸುಧೆಯೆಂಬ ವ್ಯಾಖ್ಯಾನವನ್ನೂ, ಶ್ರೀ ಸುರೇಶ್ವರಾಚಾರ್ಯರು ಮಾನಸೋಲ್ಲಾಸವೆಂಬ ವಾರ್ತಿಕವನ್ನೂ ರಚಿಸಿರುವರು. ಅದ್ವೈತ ಪ್ರಕ್ರಿಯೆಯೊಂದಿಗೆ ವಿಸ್ತೃತವಾಗಿ ರಚಿಸಲ್ಪಟ್ಟ ಈ ಮಾನಸೋಲ್ಲಾಸಕ್ಕೆ ರಾಮತೀರ್ಥರೆಂಬುವರು ವ್ಯಾಖ್ಯಾನವನ್ನು ರಚಿಸಿರುವರು. ಈ ಮೂರೂ ಈ ಸ್ತೋತ್ರದೊಡನೇ ಇಲ್ಲಿ ಸೇರಿವೆ.

ಈ ಗ್ರಂಥವು ನಮ್ಮ ಸಂಶೋಧನಾಲಯದಲ್ಲಿ ಕ್ರಿ.ಶ. 1895ರಲ್ಲಿ ಮುದ್ರಿತವಾಗಿದ್ದು ಎಷ್ಟೋ ವರ್ಷಗಳ ಹಿಂದೆಯೇ ದುರ್ಲಭವಾಗಿದ್ದರಿಂದ, ಇದನ್ನು ಆಸ್ತಿಕ ಸಾರ್ವಜನಿಕರ ಅಪೇಕ್ಷೆಯಂತೆ ಈಗ ಮತ್ತೆ ಪರಿಷ್ಕಾರದೊಂದಿಗೆ ಮುದ್ರಣಪಡಿಸಿ ಸಹೃದಯರ ಮುಂದಿಡುವವರಾಗಿದ್ದೇವೆ.

ಅದ್ವೈತತತ್ತ್ವ ಕೇವಲ ಅನುಭವವೇದ್ಯ. ತರ್ಕದಿಂದ ಆ ತತ್ತ್ವ ಸಿಗದು.

'नैषा तर्केण मतिरापनेया प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ' (ಕಠ. 2. 9).

ಸರ್ವಾತ್ಮತೆಯೇ ಅದ್ವೈತದ ಸಾರ. ಅಂದರೆ—ನಾವೆಲ್ಲ ಬ್ರಹ್ಮನ ಅಂಶಗಳೇ. ಪ್ರಪಂಚವೇ ಬ್ರಹ್ಮನ ಪ್ರತಿಬಿಂಬ. ಇದನ್ನೇ ಸವಿಕಲ್ಪಬ್ರಹ್ಮವೆನ್ನಬಹುದು. ನಿರ್ವಿಕಲ್ಪವೇ ಆ ಚಿನ್ಮಯ ಚಿದಾನನ್ದ ನಿತ್ಯಸತ್ಯತತ್ತ್ವಸ್ವರೂಪ ಚೈತನ್ಯ, ಅಥವಾ ಶೂನ್ಯ. 'ಎಲ್ಲವೂ ಶೂನ್ಯವೇ ಅಂದಮೇಲೆ, ಈಸಬೇಕು ಇದ್ದು ಜೈಸಬೇಕು ಎಂಬುವ ಆಶಾವಾದಕ್ಕೆ ಅವಕಾಶವೇ ಇಲ್ಲ' ಎಂದು ವೃಥಾ ಆರೋಪಿಸಿ, ಶಂಕರರನ್ನು ಕೆಲವರು ಪ್ರಚ್ಛನ್ನಬೌದ್ಧರೆನ್ನುವರು. ಅವಸರಮಾಂದನ್ತ್ಯೈ ಚೈ. ಇರಲಿ, ಹಾಗೆ ಎಲ್ಲವೂ ಬ್ರಹ್ಮಸ್ವರೂಪ, ಪ್ರಪಂಚ ಕನ್ನಡಿಯಲ್ಲಿ ಕಾಣುವ ಪ್ರತಿಬಿಂಬದಂತೆ. ಬ್ರಹ್ಮನೇ ಪರಿಣಾಮ ಅಥವಾ ವಿವರ್ತರೂಪದಲ್ಲಿ ಜಗತ್ತಿನ ಸಮಸ್ತ ವಸ್ತುವರ್ಗ ಕಾರ್ಯಕಲಾಪದಲ್ಲಿದಾನೆ, ಎಂಬ ಈ ವಿಚಾರವೇ ಮುಖ್ಯವಾಗಿ ಈ ಸ್ತೋತ್ರದಲ್ಲಿ ಅಡಗಿದೆ.

ಸರ್ವಾತ್ಮನಾದ ಆತನ ಶ್ರವಣ ಮನನ ನಿದಿಧ್ಯಾಸನಗಳಿಂದ ಆತ್ಮಸಾಕ್ಷಾತ್ಕಾರವಾಗುವುದು. ನಿತ್ಯಸಿದ್ಧವಾದ ಶುದ್ಧಿ ಆಚಾರ ಆಚಾರ್ಯೋಪಾಸನೆ ಇತ್ಯಾದಿಗಳಿಂದ ಬಂಧವಿಮೋಚನೆ ಪಡೆದು, ಭಕ್ತಿಜ್ಞಾನವೈರಾಗ್ಯಗಳಿಂದ ಆ ಶೂನ್ಯದಲ್ಲಿ ಪರಶಿವನಲ್ಲಿ ಲೀನವಾಗಬಹುದು, ಐಕ್ಯವಾಗಬಹುದು ಎಂಬ ಮುಖ್ಯ ತತ್ತ್ವವನ್ನೇ ಆಚಾರ್ಯರು ಹೃದಯಂಗಮವಾಗಿ ನಿರೂಪಿಸಿದ್ದಾರೆ. ಇದನ್ನು ತಾತ್ಪರ್ಯತಃ ಹೀಗೆ ಸಂಗ್ರಹಿಸಬಹುದು—

(1) ಈ ಜಗತ್ತೆಲ್ಲವೂ ಬ್ರಹ್ಮನದೇ ಪ್ರತಿಬಿಂಬ, ಬ್ರಹ್ಮವೇ ಬಿಂಬ. ಅದಲ್ಲದ್ದನ್ನು ಅದು ಎಂಬ ಅಧ್ಯಾಸದಿಂದ ನಿಜವೆನ್ನುತ್ತೇವೆ. ಹೀಗೆ ತೋರಿದರೂ ಇದು ಶಾಶ್ವತ ಸತ್ಯವಲ್ಲ, ವ್ಯಾವಹಾರಿಕ ಸತ್ಯವಷ್ಟೇ. ಇದೆಲ್ಲವನ್ನೂ ಅರಿತವನಿಗೆ ಜಗತ್ತೇ ಸ್ವಾತ್ಮ.

(2) ನಿರ್ವಿಕಲ್ಪನಾದ ಬ್ರಹ್ಮನು **'बहुस्यां प्रजायेय'** ಎಂದು ಸವಿಕಲ್ಪಜಗತ್ತಾಗಿ ಪರಿಣಮಿಸುವನು ಅಥವಾ ವಿವರ್ತಿಸುವನು. ಮೃದ್ಘಟದಂತೆ ತಾತ್ತ್ವಿಕವಾದ ಅನ್ಯಥಾ ಭಾವವೇ ಪರಿಣಾಮ, ರಜ್ಜುಸರ್ಪದಂತೆ ಅತಾತ್ತ್ವಿಕವಾದ ಅನ್ಯಥಾಭಾವವೇ ವಿವರ್ತ. ಅಹಂಕಾರದ ಪಾತ್ರವು ನಿರಸನವಾಗಿ ಮಾಯಾಭ್ರಾಂತಿಮೂಲವಾದ ಸಂಬಂಧಕಲ್ಪನೆಯು ಕಣ್ಮರೆಯಾದ ಕೂಡಲೇ **'लीये परे ब्रह्मणि'**, ಎಂಬಂತೆ ನಾವು ಅವನಲ್ಲಿ ಬೆರೆತುಹೋಗುತ್ತೇವೆ. ಇವೆಲ್ಲವನ್ನು ಅವನೇ ಲೀಲಾವಿಲಾಸವಾಗಿ ನೋಡುತ್ತಿರುತ್ತಾನೆ.

(3) ಬ್ರಹ್ಮಸಾಕ್ಷಾತ್ಕಾರದಿಂದ ಪುನರ್ಜನ್ಮವಿಲ್ಲ. **'न च पुनरावर्तते'**. ಸದಾಚಾರ ಸದ್ವ್ಯಾಪಾರ ಶುಚಿಜೀವನಗಳಿಂದ 'ಅವನೇ ನೀನು, ನೀನೇ ಅವನು' ಎಂಬ ತತ್ತ್ವಾರ್ಥವನ್ನು ಅರಿತು ಸಾಧಿಸಬೇಕು. ಇದನ್ನು ಬಿಟ್ಟು 'ನಾನೇ ನಾನು, 'ಜಗತ್ತೇ ನಿತ್ಯ' ಎಂದು ಭ್ರಮಿಸಿದರೆ **'पुनरपि जननं पुनरपि मरणम्'** ತಪ್ಪಿದ್ದಲ್ಲ.

(4) ನಿಜವಾಗಿಯೂ ಬ್ರಹ್ಮನೇ ನೋಡುವನು ಮಾಡುವನು ಮಾಡಿಸುವವನು ಸಹ. ಮಾಯಾಮಾತ್ರದ ಅಹಮ್ಮಿನಿಂದ ಮಾಡಬಾರದ್ದನ್ನು ಮಾಡಿ ಆಗಬಾರದ್ದಕ್ಕೆ ಕೈಯೊಡ್ಡುತ್ತೇವೆ. ನಾವು ಅವನ ಚೈತನ್ಯಾಂಶವೇ ಆಗಿದ್ದರೂ ಅಜ್ಞಾನದಿಂದ ಆ ಭೇದವನ್ನು ತಿಳಿಯದೇ ಭೇದಕೀಲಕದಲ್ಲಿ ಸಿಕ್ಕಿ ನರಳುತ್ತೇವೆ. ಅರಿತರೆ ಶರಣ, ಮರೆತರೆ ಮಾನವ, ಅರಿವು ಮರವೇ ಭೇದಾಭೇದ ಮೂಲ.

(5) ದೇಹಾದಿ ಕಲ್ಪನೆ ಅರ್ಥವಿಲ್ಲದ್ದು, ಇದನ್ನು ಶೂನ್ಯವೆನ್ನಬಹುದು. ಶೂನ್ಯವೆಂದರೆ ಇಲ್ಲವೆಂದರ್ಥವಲ್ಲ, ಶೂನ್ಯದವು ಎಂದರ್ಥ. ಅವನ ಮಹಾಮಾಯಾಶಕ್ತಿವಿಲಾಸವೆನ್ನಲೂಬಹುದು. ಮರಣ ಒದಗಿದಾಗ ಆಯಾ ಗುಣ ಮಾತ್ರೆಗಳಲ್ಲಿ ಆಯಾ ಅಂಶಗಳೂ, ಗುಣಮಾತ್ರೆಗಳೆಲ್ಲಾ ಗುಣಿಯಾದ ಪರಮಾತ್ಮನಲ್ಲೂ ಸೇರಿಕೊಂಡುಬಿಡುತ್ತವೆ. ಸವಿಕಲ್ಪದಿಂದ ನಿರ್ವಿಕಲ್ಪಯಾತ್ರೆಯೇ ಮರಣ, ನಿರ್ವಿಕಲ್ಪದಿಂದ ಸವಿಕಲ್ಪಯಾತ್ರೆಯೇ ಜನ್ಮ.

(6) ನಮ್ಮ ಆತ್ಮನು ನಿತ್ಯಸತ್ಯವಾಗಿ ನಮ್ಮಲ್ಲೇ ಇದ್ದರೂ ಮಾಯಾಮುಸುಕಿನಿಂದ ರಾಹುಗ್ರಸ್ತ ಸೂರ್ಯಚಂದ್ರರಂತೆ ಕಾಣೆಯಾಗುತ್ತಾನೆ. ಇದೊಂದು ಎಲ್ಲ ಇಂದ್ರಿಯಗಳನ್ನೂ ನಿಷ್ಕ್ರಿಯವನ್ನಾಗಿ ಮಾಡುವ ನಿದ್ರೆ. ಇದರಿಂದ ಎಚ್ಚರವಾದಾಗ 'ನಾನೇ ನಿದ್ರಿಸಿ ಎದ್ದಿದ್ದು' ಎನ್ನುವಂತೆ ತನ್ನನ್ನೇ ಗುರುತಿಸಿಕೊಳ್ಳುತ್ತಾನೆ.

(7) ಮಾಯೆಯು ಒಬ್ಬ ಯಜಮಾನನ ಮನೆಯ ನಾಯಿಯಂತೆ. ಅಲ್ಲಿಗೆ

ಯಾರಾದರೂ ಹೋದರೆ ಬೊಗಳುತ್ತದೆ ಕಚ್ಚುತ್ತದೆ. ಆದರೆ-ಯಜಮಾನನ ಕಡೆಯವರೆಂದರೆ, ಆತನ ಹೆಸರಿಸಿ ಕರೆದರೆ, ಸುಮ್ಮನಾಗುತ್ತದೆ. ಹಾಗೆ ನಂಬಿ ಅವನನ್ನೇ ಕರೆದು ಮೊರೆಯಿಡಬೇಕು. ನಂಬಿ ಕರೆದರೆ ಓ ಎನ್ನನೇ ಶಿವನು, ನಂಬರು ನೆಚ್ಚರು ಬರಿದೆ ಕರೆವರು, ಆಗ ಘಾತ ತಪ್ಪಿದ್ದಲ್ಲ.

(8) ಜಗತ್ತಿಗೂ ನಮಗೂ ಇರುವ ಎಲ್ಲ ಸಂಬಂಧವೂ ಸುಳ್ಳೆನಿಸಿ ನಿಜದ ಅರಿವು ಆಗಬೇಕಾದರೆ ಗುರುಕೃಪೆ ಇಹಾಮುತ್ರಜಿಹಾಸೆ ಎರಡೂ ಇರಬೇಕು.

(9) ಪರಮಾತ್ಮನು ನಿಜವಾಗಿ ಅಷ್ಟಮೂರ್ತಿಸ್ವರೂಪ. ಇದು ನಮ್ಮ ಪಾಲಿಗೆ ಗೋಚರಿಸಬೇಕಾದರೆ ಅವನ ದಯೆಯೇ ಬೇಕು.

(10) ಈ ಎಲ್ಲ ಅಂಶಗಳನ್ನೂ ಶ್ರವಣಾದಿಗಳಿಂದ ತಿಳಿಯಬೇಕು. ಆಗತಾನೇ ಜೀವ ಬ್ರಹ್ಮನಲ್ಲಿ ಲಯವಾಗುವುದು. ಇಂತಹ ಜ್ಞಾನವನ್ನು ಅನುಗ್ರಹಿಸುವ ಕರುಣಾಮೂರ್ತಿಯೇ ಶ್ರೀ ದಕ್ಷಿಣಾಮೂರ್ತಿ. ಇವನ ಕೃಪಾಕಟಾಕ್ಷಕ್ಕೆ ಪಾತ್ರರಾದರೆ ಜೀವ ದೇವನಾಗುವುದರಲ್ಲಿ ಸಂಶಯವಿಲ್ಲ. ಜನನ ಮರಣಗಳ ಕಾಟದಿಂದಲೂ ತಪ್ಪಿಸಿಕೊಳ್ಳಬಹುದು. ಸತ್ಯೈಶ್ವರ್ಯಪರಾಯಣನಾಗಿ ಆ ಭಗವಂತನಲ್ಲಿ ಸದಾನಂದದಲ್ಲಿ ಯಾವಾಗಲೂ ಇರಬಹುದು.—ಇದೇ ಈ ಸ್ತೋತ್ರದ ತಾತ್ಪರ್ಯ ಸಾರಾಂಶ.

ಹೀಗೆ ಈ ಸ್ತೋತ್ರದಲ್ಲಿ ಸರ್ವಾತ್ಮತೆಯು ಬಹು ಸುಂದರವಾಗಿ ವರ್ಣಿತವಾಗಿದೆ ಇದರಲ್ಲಿ ಜನರಿಗೆ ಶ್ರದ್ಧಾಭಕ್ತಿ ನಂಬಿಕೆಗಳು ಮೂಡಬೇಕಾಗಿದೆ.

ಈ ಗ್ರಂಥವನ್ನು ನಮ್ಮ ಈ ಪ್ರಾಚ್ಯವಿದ್ಯಾಸಂಶೋಧನಾಲಯದ ಸೀನಿಯರ್ ರಿಸರ್ಚ್ ಅಸಿಸ್ಟೆಂಟ್‌ರವರಾದ ಶ್ರೀ ವಿದ್ವಾನ್ ಎ.ಎಸ್. ವೆಂಕಟನಾಥಾಚಾರ್ಯರವರು ಸುಮಾರು ೨೫ ಮಾತೃಕಾ ಪ್ರತಿಗಳಸಹಾಯದಿಂದ ವ್ಯಾಖ್ಯೋಪವ್ಯಾಖ್ಯೆಗಳೊಡನೆಯೂ ಪಾಠಾಂತರಗಳೊಡನೆಯೂ ಪರಿಷ್ಕರಿಸಿರುವರಷ್ಟೇ ಅಲ್ಲದೇ, ಹೊಸದಾಗಿ ವಿಷಯವಿಭಾಗ ಟಿಪ್ಪಣಿ ಅನೇಕ ಉಪಯುಕ್ತಾನುಬಂಧಗಳು ಮತ್ತು ಸರಳ ಕನ್ನಡಾನುವಾದ ಇವುಗಳನ್ನು ರಚಿಸಿ ಸೇರಿಸಿ ಉತ್ತಮ ರೀತಿಯಲ್ಲಿ ಸಂಪಾದಿಸಿದಾರೆ. ಇವರ ಶ್ರಮ ತುಂಬ ಶ್ಲಾಘನೀಯ. ಇವರಿಗೆ ನನ್ನ ಹೃತ್ಪೂರ್ವಕವಾದ ಅನಂತ ವಂದನೆಗಳು.

ಇನ್ನು ಇದನ್ನು ಅತ್ಯಲ್ಪಕಾಲದಲ್ಲೇ ತುಂಬ ಅಂದವಾಗಿ ಮುದ್ರಿಸಿಕೊಟ್ಟು ಸಹಕರಿಸಿದವರು ಶ್ರೀ ಜಿ. ಎಚ್. ರಾಮರಾಯರು. ಇವರಿಗೂ ಅನಂತ ಕೃತಜ್ಞತೆಗಳನ್ನು ಸಲ್ಲಿಸುತ್ತೇನೆ. ಹೀಗೆ ಸುಪರಿಷ್ಕೃತವಾಗಿ ಪರಿವರ್ಧಿತವಾದ ಈ ಗ್ರಂಥವು ಜನಪ್ರಿಯವಾಗಲೆಂದು ಹಾರೈಸಿ ವಿರಮಿಸುತ್ತೇನೆ.

ಓರಿಯಂಟಲ್ ರಿಸರ್ಚ್ ಇನ್ಸ್ಟಿಟ್ಯೂಟ್

ಮೈಸೂರು — ಜಿ. ಮರುಳಸಿದ್ಧಯ್ಯ

10-3-72 — ಡೈರೆಕ್ಟರ್

ಎರಡು ಮಾತು

ಶ್ರೀ ದಕ್ಷಿಣಾಮೂರ್ತಿಸ್ತೋತ್ರದ ಸಂಶೋಧನೆಯ ಕೆಲಸವು ನನ್ನ ಪಾಲಿಗೆ ಕೂಡಿ ಬಂದಿದ್ದು ನನಗೊಂದು ಐಶ್ವರ್ಯವೆಂದೇ ನನ್ನ ಭಾವನೆ. ಏಕೆಂದರೆ ಬಲ್ಲವರು ಐಶ್ವರ್ಯಪದವನ್ನು 'ಈಶ್ವರಸ್ಯ ಭಾವಃ' ಎಂದು ಬಿಡಿಸುವರು. ಶ್ರೀ ಗುರುಮೂರ್ತಿಯಾಗಿ ಬಂದು ಅವತರಿಸಿದ ನನ್ನ ಆತ್ಮೇಶ್ವರನ ಸಹಜಸುಂದರ ದಿವ್ಯ ಭಾವವು, ಈ ಸಂಶೋಧನಾ ಕಾಲದಲ್ಲಿ ಸದಾ ನನ್ನ ಕಣ್ಣೆದುರು ಕಟ್ಟಿ ನಿಂತು, ಹೃದಯದಲ್ಲಿ ತುಂಬಿ ತುಳುಕಾಡುತ್ತಿತ್ತು. ಇದೇ ನನ್ನ ಪಾಲಿನ ಮಹದೈಶ್ವರ್ಯ.

ಇಂತಹ ಭಾವಸಂಪತ್ತು ಆಸ್ತಿಕ ಸಹೃದಯರೆಲ್ಲರಿಗೂ ದೊರಕಲೆಂದು, ಶ್ರೀ ಗುರುದೇವನಾದ ಮಹಾಪ್ರಭುವಿನ ಸ್ಮರಣೆಗೆ ಹಿತವಾದ ರೀತಿಯ ಸುಸಂಕ್ಷಿಪ್ತ ಹಿನ್ನಲೆಯೊಡನೆ ಶ್ರೀ ಶಂಕರರ ಹೃದಯವನ್ನು ಕನ್ನಡಿಸುವ ಕನ್ನಡದಲ್ಲೂ ಈ ಸ್ತೋತ್ರವನ್ನು ಅನುವದಿಸಿ ಈ ಗ್ರಂಥದ ಕೊನೆಯಲ್ಲಿ ಸೇರಿಸಲಾಗಿದೆ. ಅಲ್ಲದೆ, ಸಂಸ್ಥೆಯ ಡೈರೆಕ್ಟರ್‌ರವರಾದ ಶ್ರೀ. **Dr.** ಜಿ. ಮರುಳಸಿದ್ಧಯ್ಯ, M.A. Ph. D ಅವರು ಈಗಾಗಲೇ ತಮ್ಮ ಅಮೋಘವಾದ ಮುನ್ನುಡಿಯಿಂದ ಈ ಸ್ತೋತ್ರದ ಧ್ಯೇಯ ಧೋರಣೆಗಳೆಲ್ಲವನ್ನೂ ಸ್ಫೂರ್ತಿದಾಯಕವಾದ ರೀತಿಯಿಂದ ಜನಗಳ ಹೃದಯದಲ್ಲಿ ಚಿತ್ರಿಸಿದಾರೆ. ಹೀಗಾಗಿ ಈ ಸ್ತೋತ್ರವು ತನ್ನದೇ ಆದ ಉತ್ತಮ ಮೆರುಗನ್ನು ಪಡೆದಿದೆ.

ಪ್ರಕೃತ ಈ ಗ್ರಂಥದ ಸಂಪಾದನದಲ್ಲಿ ಎಲ್ಲ ವಿಧದಲ್ಲಿಯೂ ಸಲಹೆ ಸಹಕಾರಗಳನ್ನಿತ್ತು ದಿಗ್ದರ್ಶಕರಾಗಿದ್ದು ಪ್ರೋತ್ಸಾಹಿಸಿದವರಾದ— ನಮ್ಮ ಈ ಪ್ರಾಚ್ಯವಿದ್ಯಾಸಂಶೋಧನಾಲಯದ ಡೈರೆಕ್ಟರವರೂ, ಮೈಸೂರು ವಿಶ್ವವಿದ್ಯಾನಿಲಯದ ಯು.ಜಿ.ಸಿ ಸಂಸ್ಕೃತ ವಿಭಾಗದ ಮುಖ್ಯಸ್ಥರೂ ಹಾಗೂ ಪ್ರಾಧ್ಯಾಪಕರೂ ಆದ ಡಾಕ್ಟರ್, ಜಿ. ಮರುಳಸಿದ್ಧಯ್ಯ, ಎಮ್.ಎ., ಪಿಹೆಚ್.ಡಿ. ಅವರಲ್ಲಿ ನಾನು ಹಾರ್ದವಾದ ಕೃತಜ್ಞತೆಗಳನ್ನು ಸೂಚಿಸುತ್ತೇನೆ.

ಎಲ್ಲ ಸ್ತೋತ್ರಸಾಹಿತ್ಯಗಳಲ್ಲಿಯೂ ಮೂರ್ಧನ್ಯವಾಗಿ, ಶ್ರೀ ಶಙ್ಕರರ ಹೃದಯದ ಮುತ್ತಿನಹಾರದಂತಿರುವ ಈ ಗ್ರಂಥವು, ಆಸ್ತಿಕರಾಗಿ ದೈವೀಸಂಪತ್ಪೂರ್ಣವಾದ ಜೀವನವನ್ನು ಬಯಸುವ ಸಹೃದಯರೆಲ್ಲರಿಗೂ ಸ್ಫೂರ್ತಿದಾಯಕವಾಗಲೆಂದು ಆಶಿಸುತ್ತೇನೆ.

ಓರಿಯಂಟಲ್ ರಿಸರ್ಚ್ ಇನ್‌ಸ್ಟಿಟ್ಯೂಟ್
ಮೈಸೂರು
12-3-72

ಇತಿ ಸಂಪಾದಕ—
ಎಸ್. ಎಸ್. ವೆಂಕಟನಾಥಾಚಾರ್ಯ
ಸೀನಿಯರ್ ರಿಸರ್ಚ್ ಅಸಿಸ್ಟೆಂಟ್

द्वितीयमुद्रणभूमिका

इदमिदानीं सहृदयानां करकमलयोः समर्प्यते सुपरिष्कृततया मुद्रितं सव्याख्योपव्याख्यं श्रीशङ्करभगवत्पादविरचितं श्रीदक्षिणामूर्तिस्तोत्रम्।

प्रकृते अवश्यपरिशीलनीयाः केचिदंशाः

यद्यपि भगवतो दक्षिणामूर्तेः मूलतत्त्वविषये, तदवताररहस्यविषये, तदीयदेवभावात्मभावगुरुभावविषयेषु, तदनुभवपरीवाहरूपस्तोत्रसाहित्यात्मकैतत्प्रबन्धविषये, तथा श्रीगुरुतत्त्वपीठमलङ्कृतवतां एतत्प्रबन्धनिर्मातॄणां ब्रह्मीभूतानां श्रीशङ्करभगवत्पादानां विषये च देशकालानुगुण्येन लोकदृष्ट्युन्मीलनाय बहु वक्तव्यं वर्तते। यतः केवलश्रद्धाजाड्येन मौढ्येन वा विहितादरानादरः सर्वोऽपि जनः परिणामतः कीटनाशं नश्येत् नाशयेच्च सर्वमपीदमिति। अथापि प्रकृते अनवकाशनिमित्तेनैतत्सर्वं समयान्तरे प्रकाशनीयं निर्णीय स्तोत्रव्याख्यानरूपं सुरेश्वराचार्यविरचितं मानसोल्लासं वार्तिकं, तद्व्याख्यानं रामतीर्थीयं चाधिकृत्य किञ्चिदिव प्रस्तुत्येमां वाचमुपसंहरामः।

स्तोत्रस्यास्य प्रकरणग्रन्थरूपत्वे कियदौचित्यम्

प्रायशः स्तोत्रकाव्यनाटकादिव्याजेन अतिनिगूढवेदान्ततत्त्वप्रकटीकरणं हि प्रौढानां प्राचां पद्धतिरिति किंवदन्ती। तामाश्रित्य एतेऽपि व्याख्यातारः इदं स्तोत्रं वेदान्तप्रकरणरूपं मन्यन्ते। इदं च नैव वस्तुतत्त्वानुगुणमिति प्रकरणान्तरे निरूपयामः। प्रकृते च तत्तथैवाङ्गीकृत्य निरूप्यमाणविषयमधिकृत्य किञ्चित् प्रस्तौमः।

मौनस्य अद्वैततत्त्वरहस्यव्याख्यारूपता

तत्त्वशोऽद्वैतस्योपदेष्टा व्याख्याता वा भगवन्तं श्रीदक्षिणामूर्तिम् परित्यज्य को वाऽन्यो भवेदिति सत्यमेतत्स्तोत्रग्रन्थप्रतिपाद्यार्थः परमाद्वैतमेव। यं हि वर्णयन्ति तत्त्वज्ञाः—

'मौनव्याख्याप्रकटितपरब्रह्मतत्त्वं युवानम्' । इति,

'गुरोस्तु मौनं व्याख्यानं शिष्यास्तु च्छिन्नसंशयाः' । इति च ।

एवञ्च—श्रीदक्षिणामूर्तिवर्णनमेव परमाद्वैतसाम्राज्यवर्णनरूपं भवेदित्यपि युक्तमेवोत्पश्यामः । तत्र तदीयमौनमुद्रा परं सम्यग् विभावनीया । यतः तयैवैतदुपदिष्टं भवति—यावद् व्यवहारो न विरमेत्, तावदद्वैतं नैव सिद्ध्येदिति, व्यवहारेण चाद्वैतप्रतिपादनं हास्यास्पदमिति च ।

अद्वैतस्य वादविषयत्वे अनौचित्यम्

एवं स्थितेऽपि केचन सिद्धान्ताभिमानिनः अस्मिन् विषये वादविवादादिभिः कलहान् प्रकुर्वते चेत्, किं वा ब्रूमः निद्रालोः विजृम्भितवाग्व्यवहारसौन्दर्यमिव तेषां तत्त्वप्रतिपादनावैखरीसौन्दर्यमिति अत्यन्तं विषादनीयोऽयं विषयः इति वक्तुं सङ्कुचामः ।

ननु निद्रामधिकृत्यापि विचाराः प्रवर्तन्ते किल, यथा—व्यासेनापि 'तदभावो नाडीषु तच्छ्रुतेः' इति विचारितमेव । तथा अद्वैतमधिकृत्यापि तदनुगुणशब्दप्रपञ्चैः विचारे को वा विरोधः ? इति चेत्—वस्तुतत्त्वविरोध एवेति ब्रूमः । सूत्रे तु तत्त्वमहिमानुचिन्तनरूपतया उपासनाङ्गताभावनया च तद्विचारः कृतः इत्येव महान्तः आतिष्ठन्ते । न त्वेवं केवलं कुतूहलाद्वा, वागवलेपाद्वा, वादविवादेष्वेव सर्वकालवृथानयनहेतोर्वा स विचारः कृतः इति विभावनीयम् । तर्हि अत्रापि स्वस्वरूपज्ञानपूर्वं तत्त्वाधिगमायैव अयमद्वैतविचारोऽपि प्रवर्ततामिति चेत्—स्यादेवं किञ्चिदिव, यदि तावन्मात्रमेवोद्देशः स्यात्, न हि वयं तादृशाः प्रवर्तामहे ।

ननु सर्वसैद्धान्तिकेष्वपि अयमंशः समान एवेति चेत्—सत्यम् । अथापि सर्वेषामपि सिद्धान्तानां व्यवहारेणाबाधात् घटत एव कथंचित् । अद्वैते तु उपदेश एव सर्वथा न घटते इत्ययमंशः अतिसूक्ष्मतया परिशीलनीयः ।

क्वचित् वादस्य प्रमादहेतुत्वम्

एवं स्थिते लोकव्यवहारासमन्विते, साक्षात्परम्परया वा सर्वथा स्वहितानुपयुक्ते, विशेषतः स्वोद्देशपरिपन्थिनि, वागद्वैतकलहे एव सर्वस्मिन् आयुषि नीयमाने किमु वक्तव्यमस्मिन् पृथगनौचित्यमिति? इतोऽप्यन्यः प्रमाद एव वा कः स्यात्? इत्येव भावयामः।

मनोवाक्कायकर्मसु अप्रमाद एव हि सर्वशास्त्रसारम्, अमृतस्य पन्थाश्च। यदुक्तम्—

'प्रमादं वै मृत्युमहं ब्रवीमि तथाऽप्रमादममृतं ब्रवीमि।' इति,

'यन्मुहूर्तं क्षणं वाऽपि वासुदेवो न चिन्त्यते।
साहानिः तन्महच्छिद्रं सा भ्रान्ति सा च विक्रिया॥' इति,

'गृहीत इव केशेषु मृत्युना धर्ममाचरेत्'। इति,

'न कुर्यात् निष्फलं कर्म।' इत्यादि च॥

कालक्षेपादिनिमित्तमपि क्रियमाणो विचारः आत्मार्थ एव सन् विषयतत्त्वानुगुणः अद्य श्वो वा जन्मान्तरे वा सत्संस्काराधानद्वारा विशिष्टफलहेतुर्भवेदेवेति; कथमपि सर्वत्र स्वकम्बलप्रसारणानुगुणां आभिमानिकीं धियं, तन्मूलां वादविवादसन्ततिं सन्त्यजेदेवात्महितैषीति च सारम्।

व्याख्यामूलयोः क्वचिदसाङ्गत्यम्, सिद्धान्तादिविरोधश्च

अत्र किञ्चिदुदाहरामः—प्रकृते—'विश्वं दर्पणे'तिप्रथमश्लोकव्याख्यानावसरे, अस्य श्लोकस्य स्ववासनानुगुण्येन ब्रह्मण एकस्यैव सत्यत्वे, अन्यस्यसर्वस्यापि जगतः प्रतिभासमात्रतायां मिथ्यात्वे च तात्पर्यं वर्णितम्। 'निजान्तर्गत'मित्यादिमूलस्य च 'स्वस्मिन् आत्मन्यध्यस्तं विश्वं बहिः पश्यन्निवाध्यस्यन्' इत्यादिविवरणं च कृतम्। इदं सर्वं अन्ततः विज्ञानविवर्तवादिभिरुक्ते 'यदन्तर्ज्ञेयतत्त्वं तत् बहिर्वदवभासते' इति सिद्धान्ते एव सत्यं

पर्यवस्येत्, न तु सिसाधयिषिते परमार्थे। तेऽपीममेवांशं प्रत्यभिज्ञाय 'तेषामल्पापराधं तु दर्शनं नित्यतोक्तितः' इति वदन्तः अद्वैतवादं स्वपक्षात्यान्तसंनिहितमेव मन्यन्ते। एते हि—विज्ञानं क्षणिकं प्रवाहतो नित्यमभ्युपागच्छन्, अद्वैतिनस्तु—स्वरूपतो नित्यमित्येतावानेव हि भेदः इति। विश्वनाथपञ्चाननोऽपि 'अस्तु तर्हि क्षणिकविज्ञाने गौरवात् नित्यविज्ञानमेवात्मा' इति वदन् इममेवाशयं पोषयतीव। सूक्ष्मतः परिशीलने एवंविधं विवर्तवादेन साधयन्तः रामतीर्थाः मूलमानसोल्लासान्तरार्थमपि वा नान्वसरन्नित्यपि भावयामः। यतः सुरेश्वराचार्याः स्ववार्तिकारम्भे 'नावीवान्तः समाहिता' इति ब्राह्मणवाक्यैकतया स्थितं 'अन्तरस्मिन्निमे लोकाः' इति श्रुतिवाक्यमेवोपादाय वार्तिकग्रन्थं अन्वारभन्त। न चात्रापि दृष्टान्तानुगुणं तावद्विपुलानां सर्वेषां लोकानां अन्तरवस्थानासम्भवात् अगत्या अध्यासवाद एवाश्रयणीयः इति विभावनीयम्। बीजे वृक्ष इव स्वस्मिन् आत्मनि विश्वस्यावस्थितौ कस्या अप्यनुपपत्तेरभावात्। छान्दोग्यश्रुतिरपि—'न्यग्रोधफलमत आहरेति। इदं भगवः इति। भिन्धीति। भिन्नं भगव इति। किमत्र पश्यसीति। अण्व्य इमे धानाः भगव इति। आसामङ्गैकां भिन्धीति। भिन्ना भगव इति। किमत्र पश्यसीति। न किञ्चन भगव इति। तं होवाच यं वै सौम्यैतमणिमानं न निभालयसे एतस्य वै सौम्य एषोऽणिम्नः एवं महान् न्यग्रोधः तिष्ठति। श्रद्धत्स्व सौम्येति। स य एषोऽणिमैतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा तत्त्वमसि श्वेतकेतो'॥ इति सरळहृदयङ्गमसंवादेन इममेवार्थं उपाजहार॥

उक्तार्थस्य संवादेन दृढीकरणम्

लक्ष्मीतन्त्रे च—

'आत्मभित्तौ जगत्सर्वं स्वेच्छयोन्मीलयाम्यहम्।
मयि लोकाः स्फुरन्त्येते जले शकुनयो यथा॥
स्वाच्छन्द्यादवरोहामि पञ्चकृत्यविधायिनी।

साऽहं यदवरोहामि सा हि चिच्छक्तिरुच्यते ॥
सङ्कोचो मामकः सोऽयं स्वच्छः स्वच्छन्दचिद्घनः ।
अस्मिन्नपि जगद्भाति दर्पणोदरशैलवत् ॥
वज्ररत्नवदेवैषः स्वच्छः स्फुरति सर्वदा ।' इत्यादिना सुस्पष्टं जगदात्मनोः विशिष्टः सम्बन्धः समुपपादितः ॥

अत्र च—'योऽवरोहो मदीयस्ते वर्णितः प्रथमः पुरा ।
चिच्छक्तिर्जीव इत्येवं विबुधैः परिकीर्त्यते ॥'

इति वाक्यान्तरेण चिच्छक्तिर्जीव एवेति प्रतिपादितम् ॥ अत्र 'जले शकुनयो यथा' इति परमात्मनि विश्वस्यावस्थाने दृष्टान्तः; 'दर्पणोदरशैलवत्' इति, 'वज्ररत्नवत्' इति च जीवे विश्वस्यावस्थाने दृष्टान्तः । अस्यैव च भागस्य स्तोत्रप्रथमपद्यं विवरणरूपमिति भावयामः ।

अद्वैताधिगमोपायः

सारतः बुद्धेः प्रमादं, अवलेपं, दुरभिमानं वा दूरीकृत्य, तत्त्वपरिचये तदानन्दानुभवे, अनुभविनां सरससाहित्यरसास्वादे च मनसोऽभ्यासः सर्वैः सर्वथा आधेयः, विशिष्य च पण्डितंमन्यैः । तथाऽपि यदि न तत्त्वार्थावभासो भवेत्, तदा—

'तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनः तत्त्वदर्शिनः ॥'

इति गीताचार्योक्तदिशा तथाविधं परमगुरुमन्विष्यैव परमाद्वैतसाम्राज्यं अधिगन्तव्यमिति भावयामः इति शम् ।

सुरेश्वरमण्डनमिश्रयोरेकत्वं भिन्नता वा ?

तत्रायं मानसोल्लासकर्ता सुरेश्वरः तुर्याश्रमी प्रसिद्धः मण्डनमिश्र एवेति केचन साम्प्रदायिकाः मन्यन्ते । परं मण्डनाशयखण्डनस्य सुरेश्वरवार्तिके दर्शनात् उभौ भिन्नावेवेति श्रीमान् एम्. हिरियण्णः, श्रीमान् एस्. कुप्पुस्वामिशास्त्री च ।

किन्तु–श्लोकवार्तिके तत्र तत्र 'पण्डितंमन्याः' (4-4-796) इति, 'महामीमांसकाः' (4-4-891) इति, 'वेदार्थनिश्चिताः' (4-4-876) इति चैवमादिभिः नर्मोक्तिभिः मण्डनोपहासदर्शनात् उभयोर्भेद एव न्याय्यः इति युक्तमुत्पश्यामः ॥

अवशिष्टं विषयमन्यत्र साधयामः ॥

संशोधनोपयुक्ताः मातृकाः

प्रकृते—1895 तमे खिस्ताब्दे अस्मत्संस्थोपज्ञमेव मुद्रितस्यास्य ग्रन्थस्य पुनर्मुद्रणाय संशोधने समारब्धे, यदा अदसीयभाषाभावविषयसिद्धान्तशैल्यादिभङ्गकारिण्यः बह्व्यः अशुद्धयः दृष्टिपथं गताः, तदा तासां संमार्जनाय अस्मत्संस्थायामेव स्थिताः बह्व्यः मातृकाः समवलोकिताः, यथामति अशुद्धयश्च संमार्जिताः । तथोपयुक्तानां तासां मातृकाणां क्रमाङ्काः, निर्दिष्टाः संज्ञाश्चैवं वर्तन्ते, यथा—

(1) **दक्षिणामूर्तिस्तोत्रस्य**—(1) S.P. 900. क. (2) S.P. 1716. ख. (3) S.P. 3308. ग. (4) S.P. 5912. घ. (5) S.P. 5913. च. (6) S.B. 917. छ. (7) S.C. 461. ज. (8) S.C. 694. झ.

(2) **तत्त्वसुधायाः**—(9) S.P. 900. क. (10) S.P. 1781. ख. (11) S.P. 2347. ग. (12) S.P. 3965. घ. (13) S.P. 4610. च. (14) S.C. 271. छ. (15) S.C. 272. ज. (16) S.C. 417. झ. (17) S.C. 2021. त.

(3) **मानसोल्लासस्य**—(18) S.P. 720. क. (19) S.P. 2314. ख. (20) S.P. 4644. ग. (21) S.P. 5199. घ. (22) S.C. 2512. च.

(4) **रामतीर्थीयस्य**—(23) S.P. 720. क. (24) S.P. 4644. ख.

(5) **सवार्तिकपञ्चीकरणस्य**—(25) S.P. 955. क. (26) S.P.

5779. ख. (27) S.B. 314. ग. (28) S.C. 300. घ. (29) S.C. 1137. च. इति ॥

उपसंहारः

एवं उपत्रिंशन्मातृकासाहाय्येन परिशोधितः, उपयुक्तभूमिकाटिप्पण्यनुबन्धानुवादैः परिष्कृतश्चायं ग्रन्थः भावुकजनसमादरणीयो भूयादित्याशास्महे ॥

किञ्च—

जयतु जगतां मूलं सत्यं सनातनमञ्जसा
जयतु सरसा वाणी दिव्या तदीयमनोऽनुगा ।
जयतु विदुषां वर्गः तस्याः सदातन आश्रयः
जयतु च निधिः तेषां पूर्णा चिरन्तनभारती ॥

इति सहृदयवशंवदः

परीधाविसंवत्सरचैत्रश्रीरामनवमी
23-3-72

एन्. एस्. वेङ्कटनाथाचार्यः

सुसंक्षिप्ता विषयसूचनी

भूमिकाभागे—

दक्षिणामूर्तिभावचित्रम्, संस्मरणं च 7

प्रथमद्वितीयमुद्रणभूमिकाः 9

विषयसूचनी सुसंक्षिप्ता, दक्षिणामूर्तिस्तोत्रमूलपाठश्च 17

प्रथमोल्लासे—

मङ्गलं, विषयः, प्रयोजनं च 5

अस्य ग्रन्थस्य अर्थतः प्रकरणात्मकत्वम् 6

स्तोत्रावतरणमूलभूताः षट्प्रश्नाः 8

सत्तास्फुरणयोः आत्माधिष्ठानकत्वम् 17

अद्वैतात्मबोधसाधनानि 20

ईश्वरजीवसर्वात्मभावानां, ज्ञाने स्वप्रकाशत्वैकत्वयोश्च निरूपणम् 22

क्रियास्वरूपं, जीवेश्वरत्वयोरौपाधिकत्वं च 25

द्वितीयोल्लासे—

नैयायिकसांख्यमतयोर्निरूपणम् 28

जगतः परमाणुकारणकत्वनिराकरणेन विवर्तकारणत्वोपपादनम् 38

ज्ञानक्रियाशक्त्योः आश्रयोपपादनम् 40

प्रधानकारणतावादिसांख्यमतनिराकरणम् 41

ज्ञानभेदाः, प्रमाणसंख्याविकल्पाश्च 42

वैशेषिकसांख्यपौराणिकशैवागमेषु विवृतानां तत्त्वानां निरूपणम् 44

तत्कल्पनानां भ्रान्तत्वम्, जीवेश्वरैक्यं च 52

ईश्वरसङ्कल्पमहिमा, ईश्वरनिष्ठकर्तृत्वाद्युपाधिः 53

ईश्वरस्य निमित्तकारणत्वनित्यज्ञानादिमत्त्वादिनिराकरणम् 54

बन्धमोक्षयोः स्वरूपम् 56

तृतीयोल्लासे—

सत्तास्फुरणयोः अधिष्ठानभूतात्मैकाश्रयत्वसमर्थनम् 58
तत्त्वाप्रतिपत्तौ भेदप्रतिपत्तौ च हेतूपपादनम् 65
अद्वैतबोधकवाक्यानां संसृष्टार्थत्वनिरासेन अखण्डार्थत्वसाधनम् 69
अनात्मन्यात्मबुद्धौ आत्मनां भेदभाने च कारणम् 74
आत्मलक्षणोपपादनेन तत्त्वज्ञानफलकथनम् 77

चतुर्थोल्लासे—

विषयगतत्वेन भासमानयोः सत्तास्फुरणयोः पारतन्त्र्योपपादनम् 81
कर्तृत्वादिव्यपदेशोपाधिः, इन्द्रियसञ्चरणाश्रयाः नाड्यः 87
तत्र मूलाधारं, कुण्डलिनी, प्राणाग्निबिन्दुनादाः सुषुम्नादयश्च 90
सर्वास्ववस्थासु ईश्वरैकाश्रयमदादिरूपस्फुरणम् 94
अहङ्कारादिविभागः 99

पञ्चमोल्लासे—

देहेन्द्रियप्राणबुद्धिसङ्घातात्मवादानां निरासः 102
आत्मपरिमाणनिरूपणम् 115

षष्ठोल्लासे—

शून्यवादपञ्चस्कन्धवादक्षणिकविज्ञानवादानां निरसनम् 119
देहात्मविवेकः, आत्मस्वरूपम्, मोक्षस्वरूपं च 130

सप्तमोल्लासे—

प्रत्यभिज्ञाप्रामाण्यम्, आत्मनः स्थिरतोपपादनेन तत्प्रत्यभिज्ञानिरूपणम् 135
मायाऽविद्ययोर्निरूपणेन ईश्वरप्रत्यभिज्ञायाः तन्निरासफलकत्वकथनम् 142
देहात्मनोः परस्पराध्यासतद्धेत्वोरुपपादनम् 147
सत्ख्याति—असत्ख्याति—अख्याति—अन्यथाख्याति—आत्मख्यातिपक्षाणां निराकरणेन अनिर्वचनीयख्यातिसमर्थनम् 148
ईश्वरप्रत्यभिज्ञायाः आत्मलाभहेतुत्वम् 151

अष्टमोल्लासे—

व्यवहारसामान्यस्य कल्पनासिद्धत्वम् 154

पारमार्थिकदृष्ट्या कथितस्य मिथ्यात्वस्य विवेचनम् 158

सत्यार्थबोधकस्यासत्यस्य प्रबोधेन बाधनिरूपणम् 158

मायालक्षणकथनेन तत्समूलहानेरेव मोक्षस्वरूपत्वकथनम् 159

नवमोल्लासे—

षट्त्रिंशत्तत्वानां व्यष्टिसमष्टिशरीरानुवृत्तत्वं, व्यष्ट्युपासनायाः समष्टि लाभहेतुत्वं च 165

पिण्डाण्डे ब्रह्माण्डावलोकनप्रकारः, अमनस्कयोगप्राप्त्युपायकथनं च 169

अष्टाङ्गयोगप्रपञ्चः, योगसिद्धिचिह्नानि च 173

सुषुम्नायां प्राणधारणफलानि, योगमहिमा च 179

दशमोल्लासे—

स्तोत्रार्थमननादेः फलनिरूपणम् 183

अणिमाद्यष्टसिद्धिस्वरूपादिनिरूपणमू 186

सार्वात्म्यभावनाप्रभावनिरूपणम् 190

अनुबन्धभागे—

सुरेश्वरवार्तिकसहितं श्रीशङ्कराचार्यकृतं पञ्चीकरणम् 194

दक्षिणामूर्तिस्तोत्रपद्यपादानुक्रमणी 200

प्रमाणानुक्रमणी 200

उदाहृतदृष्टान्तवाक्यविशेषानुक्रमणी 203

पदविशेषानुक्रमणी 204

ग्रन्थग्रन्थकारानुक्रमणी 208

कन्नडभाषया स्तोत्रार्थानुवादः 209

—o—

श्री द क्षि णा मू र्ति स्तो त्र म्

श्रीशङ्करभगवत्पादविरचितं

श्रीदक्षिणामूर्तिस्तोत्रम्

—o—

प्रत्यगात्मन एव सकलजगदधिष्ठानत्वम्

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
पश्यन् आत्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ १ ॥

आत्मन एव मायासहकारेण सकल-
जगदुत्पत्त्यादिकारणत्वम्

बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्निर्विकल्पं पुनः
मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम् ।
मायावीव विजृम्भयत्यपि महायोगीव यः स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ २ ॥

मूलाज्ञाननिवृत्तेरेव सकलविधसंसृति-
भयनाशकत्वम्

यस्यैव स्फुरणं सदात्मकं असत्कल्पार्थगं भासते
साक्षात् तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।
यत्साक्षात्करणात् भवेत् न पुनरावृत्तिर्भवाम्भोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ३ ॥

आत्मसत्ताप्रकाशाभ्यामेव जगतः
सत्ताप्रकाशौ

नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते ।
जानामीति तमेव भान्तमनुभात्येतत् समस्तं जगत्
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ४ ॥

श्रीगुरुप्रसादादेव सर्वविधव्यामोहनिवृत्तिः

देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्रीबालान्धजडोमास्त्वहमिति भ्रान्ताः भृशं वादिनः ।
मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ५ ॥

मायासमाच्छादितः सुखरूपः आत्मा
सुषुप्तावपि सन्

राहुग्रस्तदिवाकरेन्दुसदृशः मायासमाच्छादनात्
सन्मात्रः करणोपसंहरणतो योऽभूत् सुषुप्तः पुमान् ।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ६ ॥

श्रीगुरुप्रसादादेव प्रत्यगात्मनि
परमात्माऽभेदधीजननम्

बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्तमानं अहमित्यन्तः स्फुरन्तं सदा ।
स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ७ ॥

ब्रह्मानात्मकवस्तुनः अभावेऽपि मायावशात्
सर्वव्यवहारोपपत्तिः

विश्वं पश्यति कार्यकारणतया स्वस्वामिसम्बन्धतः
शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः ।
स्वप्ने जाग्रति वा य एष पुरुषः मायापरिभ्रामितः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ८ ॥

अधिकारिभेदेन व्यक्ताव्यक्तोपासनयोः
मुक्तिसाधनत्वम्

भूरम्भांस्यनिलोऽनलोऽम्बरमहर्नाथो हिमांशुः पुमान्
इत्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।
नान्यत् किञ्चन विद्यते विमृशतां यस्मात् परस्माद्विभोः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ९ ॥

स्तोत्रार्थश्रवणमननादिफलम्

सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिंस्तवे
तेनास्य श्रवणात् तदर्थमननात् ध्यानाच्च संकीर्तनात् ।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः
सिध्येत् तत् पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥ १० ॥

—o—

श्रीशङ्कराचार्यविरचितम्

श्रीदक्षिणामूर्तिस्तोत्रम्

रामतीर्थीयसहितेन मानसोल्लासेन तत्त्वसुधया च समलङ्कृतम्

—oOo—

मङ्गलाशंसनम्

मङ्गळं[1] दिशतु मे विनायको
मङ्गळं दिशतु मे सरस्वती ।
मङ्गळं दिशतु मे महेश्वरी[2]
मङ्गळ दिशतु मे सदाशिवः[3] ॥ १ ॥

प्रोद्यच्छाखमहावटद्रुमतले योगासनस्थं प्रभुं
प्रत्यक्तत्त्वबुभुत्सुभिः प्रतिदिशं प्रोद्वीक्ष्यमाणाननम् ।[4]
मुद्रां तर्कमयीं[5] दधानममलं कर्पूरगौरं शिवं
हृद्यन्तः कलये स्फुरन्तमनिशं श्रीदक्षिणामूर्तिकम् ॥[6]

---

[1] मङ्गलपदं 'मगि सर्पणे' इति धातोः निष्पन्नं सत् , 'सर्वोऽपि दुर्विधिः अस्मादपसर्पती'तिव्युत्पत्त्या आत्मेन्द्रियकल्याणवाचीति दुर्गादासः.

[2] महेश्वरः. क. [3] मे महेश्वरी. क.

[4] परिपूर्णात्मभावप्रकाशकत्वात् मौनव्याख्यामूलत्वाच्च गुरुमुखारविन्दस्य, तदवलोकनं बुभुत्सूनां मुमुक्षूणां च सहजसुन्दरमेवेति भाव्यम् .

[5] निरन्तरनवनवपरमगहनगम्भीरार्थानुमापिकामित्यर्थः. तत्त्वमयीम् . क.

[6] हृद्यन्तः स्फुरन्तमित्यन्वयः. कलये-चिन्तये ध्यायामीति यावत्. दक्षिणा— सृष्टिस्थित्यन्तरहस्यार्थबोधनसमर्था मूर्तिः यस्य सः तम् .

नत्वाऽऽद्यान् शङ्कराचार्यमुख्यान् सर्वान् गरीयसः ।
मानसोल्लासवृत्तान्तं वर्णयामि यथामति ॥

इह हि भगवान् भाष्यकारः श्रीमच्छङ्कराचार्यनामा मन्दमतीन् तत्त्वजिज्ञासूननुगृहीतुं दक्षिणामूर्तिस्तोत्रव्याजेन[1] समस्तवेदान्तरहस्यमाविश्चकार दशभिः पद्यबन्धैः । तच्छिष्यैर्विश्वरूपाचार्यैश्च सुरेश्वरापरनामभिः तत्पद्यप्रबन्धार्थतत्त्वं तात्पर्यतो मानसोल्लासनाम्ना वार्तिकात्मना ग्रन्थसन्दर्भेणाविष्कृतम् । तमिमं ग्रन्थं यथाशक्ति विवृणोमि । तत्र विशिष्टाचारसंरक्षणाय कृतमङ्गळाचरणद्योत्योऽयमाद्यश्लोकः—मङ्गळं दिशत्वित्यादि ॥ १ ॥

विषयः प्रयोजनं च

आत्मलाभात् परो लाभो नास्तीति मुनयो विदुः ।
तल्लाभार्थं कविः[2] स्तौति स्वात्मानं परमेश्वरम् ॥ २ ॥

अस्य स्तोत्रस्य वेदान्तशास्त्रप्रकरणरूपत्वात्, तस्य च शास्त्रैकदेशसम्बद्धत्वादिलक्षणत्वात्[3] तद्दर्शनाय शास्त्रीये विषयप्रयोजने तावदाह—आत्मलाभादित्यादिना । आत्मा—प्रत्यक्तमः सर्वसाक्षी, तस्य लाभः—परागर्थसम्भेदभेदनेनोद्धृत्य[4] ब्रह्मरूपेणावगतिः, तल्लाभात् परः-अन्यो वोत्कृष्टो

---

[1] इदं तु स्वमत्यनुरोधेन. वस्तुतस्तु तत्त्वानुभवसमकालं सहजप्रवृत्ता वाण्येवेयं स्तोत्ररूपेति भाव्यम्. अन्यथा स्तुतित्वापायात्.

[2] कविः—क्रान्तदर्शी. अन्यथा वर्णनानुकूलायाः प्रतिभायाः अप्रसरात्. तल्लाभार्थं गुरुः. क.

[3] शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम् । आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः ॥ इति प्रकरणलक्षणं पराशरोपपुराणे (18–21) उक्तम्. तथाच शास्त्रप्रकरणयोः भिन्नविषयत्वाभावेन शास्त्रीयैरेवानुबन्धैः अस्याप्यनुबन्धवत्त्वमिति भावः.

[4] सम्भेदः—संमिश्रणम्. सम्भेदनेनोद्धृत्य. क.

वा लाभो नास्तीति मुनयः-आपस्तम्बादयो विदुः, 'आत्मलाभान्न परं विद्यते'[1] इत्यादिभिः स्मृतिवचनैः उक्तवन्तः इत्यर्थः । अतो निरस्ताज्ञानतत्कार्यप्रपञ्च-ब्रह्मात्मनाऽवस्थानं प्रयोजनं 'ब्रह्म वेद ब्रह्मैव भवति'[2] इत्यादिशास्त्रसिद्धमुक्तम् । इदानीं विषयमाह—तल्लाभार्थमिति । स्वात्मानं परमेश्वरमिति सामानाधिकरण्यात् तत्त्वम्पदार्थैक्यं शास्त्रविषयो दर्शितः ॥ २ ॥

स्तुतिविषयस्य भगवतः हृदयवेद्यत्वम्

स्वेच्छया सृष्टमाविश्य विश्वं यो मनसि स्थितः ।
स्तोत्रेण स्तूयतेऽनेन स एव परमेश्वरः ॥ ३ ॥

एवं शास्त्रीयविषयप्रयोजने स्वरूपतो निर्दिश्य, इह स्तोत्रे सम्पादयितुमस्य प्रकरणत्वं स्फुटयति—स्वेच्छयेति । स्वेच्छा नाम—स्वशक्तिर्मायाख्या[3], तया सृष्टं—चिदात्मनि विवर्तितं विश्वं स्थूलं सूक्ष्मं च समष्टिव्यष्टिरूपं, क्रमेणाविश्य—सूर्यबिम्बमिवोदकुम्भे तत्सन्निहिते कुड्यादौ वा आभासद्वारा प्रविश्य, यो मनसि—वृत्तिमदन्तःकरणे स्थितः—तत्र विशेषरूपेणाभिव्यक्तिमुपगतः, स एव परमेश्वरः—अनेन स्तोत्रेण स्तूयते—स्वाध्यस्तप्रपञ्चव्युदासेन चिदेकरसतया प्रत्यगभेदेन प्रतिपाद्यत इत्यर्थः[4] । तथैवंसति शास्त्रैकदेशसम्बद्धत्वमस्योपपादितम् ॥ ३ ॥

---

[1] आप ध 1. 22. 2.

[2] मुण्डके 3. 2. 9. तद् ब्रह्मसाक्षादहमेवास्मीति यो जानाति सः नान्यां गतिं गच्छतीति भाष्यम्.

[3] सङ्कल्पापरपर्याया.

[4] प्रकृते उत्तरत्र चैवंविधाः व्याख्याः जिज्ञासूनां अद्वैतसिद्धान्ततत्त्वप्रदर्शनाय कृताः, भगवत्स्तोत्रसमयेऽप्येवंविधानर्थान् मनसि कृत्वैव स्तुतिः कृतेति तु नैव भाष्यम्, तदवस्थाननुगुणत्वात्.

षड्भिः प्रश्नैः ग्रन्थावतरणम् , तत्र सत्ता-
स्फुरणयोः अधिष्ठानप्रश्नः

अस्ति प्रकाशत इति व्यवहारः प्रवर्तते ।
तच्चास्तित्वं प्रकाशत्वं कस्मिन्नर्थे प्रतिष्ठितम् ॥ ४ ॥
किं तेषु तेषु वाऽर्थेषु किं वा सर्वात्मनीश्वरे ।

इदानीं शास्त्रकार्यान्तरे स्थितत्वं[1] अ लक्षणं सम्प्रदर्शयन्, तत्र अधिकारिणमुपस्थापयति—अस्ति प्रकाशत इतीति ॥ इह यादृच्छिकानेक-पूर्वजन्मकृतपुण्यपुञ्जपरिपाकवशात् विवेकवैराग्यसम्पन्नः शमादिगुणयुक्तश्च सन् आपातालोचनया 'सर्वपदार्थेषु दृश्येषु व्यवहारकाले अवभासमानमस्तित्वं प्रकाशत्वं च न दृश्यधर्मौ, दृश्यत्वव्यावृत्तावपि अस्तित्वप्रकाशत्वयोरव्यावृत्तेः' इत्यवगम्य, 'किन्धर्मावेतौ सर्वदृश्येष्वनुगतौ' इत्यनध्यवसितमतिः कश्चिच्छिष्यः प्रष्टा उपस्थाप्यते[2] । एवमुत्तरेष्वपि प्रश्नेषु आपातदर्शननिबन्धनत्वं योज्यम् । तत्रायमक्षरार्थः—अस्ति प्रकाशत इति सर्वपदार्थेषु व्यवहारः प्रवर्तत इति त्वविवादम् । तच्चास्तित्वं प्रकाशत्वं च कस्मिन्नर्थे अन्यनिरपेक्षं प्रतिष्ठितं—पर्यवसितं 'इति पृच्छन्तं वक्तुमारभते गुरुः' इति वक्ष्यमाणेनान्वयः । तत्र जिज्ञासानिमित्तं संशयमेवाह[3]—किं तेष्विति ॥ यत्रयत्र तदुभयमुपलभ्यते

---

[1] शास्त्रकार्यान्तरे स्थितं—शास्त्रपरममुख्यप्रतिपाद्यात् भिन्ने तदवान्तरविषय-निरूपणे प्रसक्तमित्यर्थः । यद्यपीदं स्तोत्रे न सम्भवति, अथापि वार्तिकदृष्ट्या एवमुक्तम् ।

[2] अध्यात्मशास्त्राधिकारी च उक्तः उपदेशसाहस्र्याम्—प्रशान्तचित्ताय जितेन्द्रि-याय प्रहीणदोषाय यथोक्तकारिणे । गुणान्वितायानुगताय सर्वदा प्रदेयमेतत् सकलं मुमुक्षवे इति. उप. 324. बृहदारण्यके तु-शान्तो-दान्तः उपरतस्तितिक्षुः समाहितः इत्याद्युक्तम्.

[3] संशये सत्येव विशेषज्ञानगोचरेच्छायाः उदयात्.

तत्रैव प्रतिष्ठितं प्रतिव्यक्ति किं भिन्नं परिमाणवदित्येका संशयकोटिः । किं वा विशेषोल्लेखमन्तरेणानयोः प्रतिव्यक्ति स्वरूपभेदानवगमात् सामान्यमिव तत्तद्व्यक्तिषु सर्वानुस्यूते एकस्मिन् तदुभयं प्रतिष्ठितमिति द्वितीया कोटिः[1] । तस्य 'सर्वात्मनीश्वरे' इति विशेषनिर्देशः, 'ईशावास्यमिदं सर्वम्'[2] 'तस्य लोकः स उ लोक एव'[3] इत्यादिश्रुत्या आपातदर्शननिबन्धनः ॥

ईश्वरजीवसर्वात्मतानां स्वरूपप्रश्नः

ईश्वरत्वं च जीवत्वं सर्वात्मत्वं च कीदृशम् ॥ ५ ॥

पुनरपि श्रुत्यापातदर्शनकृतं संशयान्तरनिबन्धनं प्रश्नमुत्थापयति—ईश्वरत्वं चेति । किमीश्वरत्वं जगत्कर्तुः महाराजकुलालादिवत् ताटस्थ्येन ?[4] किं वा रज्ज्वादिवत् स्वाध्यस्तस्य[5] सत्तादिप्रदत्वनाधिष्ठातृतया[6] वा इति ? तथा जीवत्वमपि प्रत्यगात्मनः स्वाभाविकं ? किं वा परोपाधिनिबन्धनम् ? इति[7] । तथा सर्वात्मत्वं कीदृशं गौणं मुख्यं वा ? इति च विमर्शः कर्तव्यः इत्यर्थः । ॥ ५ ॥

---

[1] तथाच तदुभयस्यापि सामान्यधर्मता, उत विशेषधर्मतेति प्रश्नः.

[2] ई. उ. 1. पृथिव्यां दृश्यमानमिदं सर्वं परमात्मना ईश्वरेण आच्छादनीयम्. ईश्वरात्मभावना सर्वत्र कार्येति यावत्.

[3] बृ. उ. 44.13. अत्र-य एष ब्राह्मणेन प्रत्यगात्मा प्रतिबुद्धतया अनुवित्तः आत्मा अनर्थसङ्कटे प्रविष्टः, सः न संसारी, किन्तु पर एव. यस्मात् विश्वस्य कर्ता परस्यात्मा, तस्य च सर्व एवात्मा, एक एवाद्वितीयः पर एवास्मीत्यनुसन्धातव्यः इत्यर्थः इति भाष्यम्.

[4] यावल्लक्ष्यमनवस्थायित्वे सति व्यावर्तकत्वं ताटस्थ्यम्.

[5] अध्यासो नाम परत्र पूर्वदृष्टावभासः.

[6] अध्यक्षत्वं नियन्तृत्वं वा अधिष्ठातृत्वमिति केचित्.

[7] बुद्ध्यादिसंस्कारवासितं अज्ञानं सुषुप्तौ, जाग्रद्वासनामयं लिङ्गशरीरं स्वप्ने, सूक्ष्मशरीरसंसृष्टं स्थूलशरीरं जाग्रतीति, उक्तोपाधित्रयप्रविष्टं वाङ्मनःप्राणकरणग्रामसंवलितं ब्रह्मैव जीवः इति सिद्धान्तः.

तत्त्वज्ञानसाधनफलजीवेशैक्यविषयकाः प्रश्नाः

जानीयात् तत् कथं जीवः किं तत् ज्ञानस्य साधनम् ।
ज्ञानात् तस्य फलं किं स्यात् एकत्वं च कथं भवेत् ॥ ६ ॥
सर्वज्ञः सर्वकर्ता च कथमात्मा भविष्यति ।
शिष्यं प्रतीत्थं पृच्छन्तं वक्तुमारभते गुरुः ॥ ७ ॥

पुनः प्रश्नान्तरं—जानीयादिति । यदि सत्तादिप्रदत्वेनाधिष्ठातृत्वमेवेश्वरत्वं, परोपाधिनिमित्तं च जीवत्वं, सुवर्णादेरिव स्वविकारैर्मुख्यमेव च सर्वात्मत्वं भवेत् , तत्सर्वं जीवः तत्त्वतः कथं जानीयात् —कीदृशेन ज्ञानेनावगन्ता भवेदित्यर्थः । तस्य—तादृशज्ञानस्य च किं साधनं—केन साधनेन तदुत्पद्यत इत्यर्थः । तस्य जीवेश्वरतत्त्वस्य ज्ञानात् किं फलं स्यात् ? स्वर्गादिवत् प्रयत्नसिद्धं, अप्रयत्नसिद्धं वा कण्ठगतचामीकरवदित्यर्थः[1] । किं च—जीवेश्वरयोरेकत्वं च तादात्म्यं[2] कथं भवेत् ? विरुद्धस्वभावत्वात् गौणं श्रूयमाणमेकत्वं, किं वा विरोधस्याभासत्वात् मुख्यमेवेति ॥

जीवेश्वरयोरैक्यायोगे तदेव विरुद्धधर्मत्वमुपन्यस्यति—सर्वज्ञ इति ॥ आत्मा जीवः किञ्चिद्ज्ञः किञ्चित्कर्ता च, सर्वकर्ता परमेश्वरः कथं भविष्यति ? यद्वा—सर्वज्ञः सर्वकर्ता च सन् ईश्वरः कथं तद्विपरीतात्मा भविष्यति ? इति योजना ॥ एषां प्रश्नानामुत्तरं वक्तुं स्तोत्रमुत्थापयति—शिष्यमिति ।[3] इत्थं पृच्छन्तं शिष्यं प्रति प्रतिवचनं क्रमेण वक्तुं गुरुरारभते इति योजना ॥ ६-७ ॥

---

[1] चामीकरशब्दः तन्निर्मितभूषणपरः, सदा कण्ठसन्निहितमपि भूषणं विस्मृतं चेत् दुःखाकरोति, निर्देशेन चोपदेशमपेक्षते सुखाय, तावदेवात्रापीत्यर्थः ।

[2] भेदसहिष्णुरभेदः, तत्सत्तातिरिक्तसत्ताकत्वाभावश्च तादात्म्यपदार्थः सिद्धान्ते.

[3] सहजसम्पन्नं स्तोत्रं एतादृशप्रश्नोत्तरत्वेन योजयितुमिति यावत् ·

प्रत्यगात्मन एव सकलजगदधिष्ठानत्वम्

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं

तत्र 'अस्ति प्रकाशते' इत्यादिसार्धश्लोकेन कृतप्रश्नस्य साक्षादुत्तरत्वेन आद्यश्लोकमुपादत्ते—विश्वं दर्पणेति ॥ एषा अस्याक्षरयोजना—तस्मै श्रीदक्षिणामूर्तये इदं नमः—नमस्करणमस्त्विति क्रियाकारकयोजना। दक्षिणाऽभिमुखा मूर्तिर्यस्य सः दक्षिणामूर्तिः—शिवः। श्रीमांश्च श्रीरित्युच्यते[1]। तथा च श्रीः—तत्त्वबोधात्मिका आविष्कृता शोभा[2] अस्मिन्नस्तीति श्रीमान्।

अत्रेयं तत्त्वसुधा—

मौनव्याख्या[3]प्रकटितपरब्रह्मतत्त्वं युवानं
वर्षिष्ठान्तेवसदृषिगणैः[4] आवृतं ब्रह्मनिष्ठैः।
आचार्येन्द्रं करकलितचिन्मुद्रमानन्दमूर्तिं
स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ॥ १ ॥
कैवल्यानन्दयोगीन्द्रशुद्धानन्दयतीश्वरौ।
नत्वाऽऽरभे लघुव्याख्यां दक्षिणाऽऽशामुखस्तुतेः ॥ २ ॥

इह खलु सर्वज्ञो भगवान् भाष्यकारः[5] लोकानुग्रहैकप्रयोजनकृतशरीरपरिग्रहः सकलवेदान्तदुग्धाब्धेः न्यायमन्दरेण[6] विचारनिर्मन्थनादाविर्भूताद्वैतामृतस्य विन्यासकलशभूतं श्रीदक्षिणामूर्तिस्तोत्रं सकललोकानुजिघृक्षया भोक्तृजीव-भोग्यजगद्-भोगप्रदपरमेश्वर-मोक्षप्रदगुरूणामत्यन्ताभेदबोधकं सकृत्पाठश्रवणार्थमननादिमात्रेण परमपुरुषार्थप्रापकमारभमाणः तस्य वेदान्तसारभूतनवनीतपिण्डात्मकत्वेन तदीय-

---

[1] तन्मये तद्रूपताभावनायाः अनुभवसिद्धत्वात्.

[2] दैवीसम्पदः एव मुख्यतः श्रीपदार्थत्वात्.

[3] अवाङ्मनसगोचरतत्त्वार्थव्याख्यात्री योगिजनमात्रगम्या मौनमुद्रा नाम.

[4] अतिशयेन वृद्धाः-वर्षिष्ठाः अन्तेवासिनश्च सम्पन्नाः ये ऋषिगणाः तैः.

[5] श्रीशङ्कराचार्यः. [6] स्वानुभवमन्दरेणेति तु युक्ततरं स्यात्.

पश्यन् आत्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।

स चासौ दक्षिणामूर्तिश्चेति—श्रीदक्षिणामूर्तिः, तस्मै इत्यर्थः । तस्य विशेषणं श्रीगुरुमूर्तय इति । गृणाति[1]—तत्त्वज्ञानमुपदिशति शिष्येभ्यः इति गुरुः, श्रीमांश्चासौ गुरुश्च पूर्ववल्लक्षणया श्रीगुरुः, तस्य मूर्तिरिव मूर्तिर्यस्य स तथा, तस्मै । अनेन स्वोपदेष्टृगुवात्मना चास्य ध्येयत्वं विवक्षितम् । देवतारूपेण गुरुरूपेण च गृहीतमर्तिद्वयायेत्युक्तं भवति । तच्छब्दापेक्षितं यच्छब्दं वदन् 'विश्वस्य सत्तास्फुरणयोर्निरपेक्षमधिष्ठानं य ईश्वरः, स एष दक्षिणामूर्तिर्गुर्वात्मा'

विषयादिभिरेव तद्वृत्तासिद्धिं[2] अभिप्रेत्य, आदौ प्रतीचः[3] सकलजगदधिष्ठानत्वेन परमेश्वरतां दर्शयन् दक्षिणाशामुखं परमेश्वरं मनसा पूजयति-विश्वमिति ॥

विश्वं-विविधप्रत्ययगम्यं वियदादि सर्वमिदं जगत्, निजान्तर्गतं निजं—स्वीयं अन्तः-मध्यं गतं-प्राप्तं, प्रत्यक्स्वरूपे स्थितमिति यावत् । निर्विकारे नीरन्ध्रे अतिस्वच्छेऽसङ्गे सूक्ष्मे प्रतीचि जगतस्तद्विपरीतस्य स्थितौ तत्सदृशं दृष्टान्तमाह—दर्पणदृश्यमाननगरीतुल्यमिति । दर्पणे-आदर्शे नीरन्ध्रे असङ्गे स्वच्छे सूक्ष्मे निर्विकारे प्रतिबिम्बिता सती दृश्यमाना-अवलोक्यमाना या नगरी-पुरी चतुर्दशसन्निवेशा सप्तवापीयुक्ता नानोपवना दक्षिणोत्तरतोऽतिमनोहरमार्गद्वयविभूषिता मङ्गळदीपिकाद्वयविराजिता अनेकक्रीडाशिखरियुता नानाविधजनसङ्कुला क्वचित् घट्टमार्गप्रदेशयुता च[4], तत्तुल्यं-तत्समानम् । तदुक्तं भारतीतीर्थैः—

> निश्छिद्रदर्पणे भाति वस्तुगर्भं बृहज्जगत् ।
> सच्चित्सुखे तथा नानाजगद्गर्भमिदं वियत्[5] ॥ इति ।

---

[1] 'गृ शब्दे' श्राविकरणः. व्यक्तवाक्यं च शब्दः इति दुर्गादासः.

[2] विषयप्रयोजनसम्बन्धाधिकारिवैशिष्ट्यासिद्धिम् । [3] प्रत्यगात्मचैतन्यस्य ।

[4] चतुर्दशसंनिवेशेत्यादि योगिमात्रगम्यशारीरतत्त्वप्रकाशकम् । अष्टमार्ग. क. कष्टमार्ग. ख. [5] पञ्चदश्याम् 13-101. अत्र पूर्वार्धे 'बृहज्जगत्' इति, उत्तरार्धे 'सच्चिद्घने' इति च पाठान्तरे ।

यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं

इति प्रश्नोत्तरं प्रकटयति—विश्वमित्यदिना। यो निजान्तर्गतं विश्वमात्मनि मायया बहिरुद्भूतमिव पश्यन् प्रबोधसये स्वात्मानमेवाद्वयं साक्षात्कुरुते इति सम्बन्धः। निजमित्यसाधारणं स्वप्रकाशसदात्मकं स्वस्वरूपमुच्यते। तस्मिन्नन्तर्गतं—तत्सत्ताप्रकाशव्याप्तं, तस्मिन्नध्यस्तमिति यावत्। विश्वं-भूतभौतिकरूप विषयजातम्। मायया अनाद्यनिर्वाच्यया स्वावभास्यया स्वात्मनि कल्पितया। बहिः—स्वात्मनः पृथक् इदन्ताऽऽस्पदतया।

वासिष्ठेऽपि शिलोपाख्याने इदमुक्तम्—

द्यौः क्ष्मा वायुरथाकाशः पर्वतास्सरितो दिशः।
सन्ति तस्यां शिला सा च सुषिरा न मनागपि॥
अप्यत्यन्तघनाङ्गायास्सुनीरन्ध्राकृतेरपि।
विद्यतेऽन्तर्जगद्वृन्दं व्योम्नीव विततोऽनिलः[1]॥ इति।

ननु प्रतीचोऽन्तरे यदि सदा विश्वं तिष्ठति, तर्हि रागादिवदन्तरेवानुभूयेतेत्याशङ्क्याह—आत्मनीत्यादिना। आत्मनि—स्वप्रकाशे प्रतीचि विषये आश्रये च या माया—अविद्या, सूर्ये पेचकादीनां[2] अन्धकारप्रतीतिवत् मामहं न जानामीति भ्रमानुभवसिद्धा, तया मायया बहिः—स्वस्माद्बाह्यदेशे उद्भूतमिव—आविर्भूतमिव पश्यन्—अवलोकयन्। अस्य यः इत्युत्तरत्र सम्बन्धः। अन्तर्विद्यमानस्य जगतो बाह्यत्वेनानुभवे दृष्टान्तमाह—यथा निद्रयेति। यथा निद्रया स्वाप्नं जगत् साक्षिणि स्वस्मिन्नध्यस्ततया स्थितमपि स्वस्माद्बहिस्स्थितमिवानुभवति, तद्वदेवेदं जाग्रत्प्रपञ्चमपि स्वस्मिन् प्रत्यक्चैतन्ये अध्यस्ततया स्थितमेव स्वाध्यस्तदेहादितादात्म्याध्यासवशात् स्वस्माद्बहिरिव पश्यति। अन्यथा जडस्य जगतः प्रत्यक्चैतन्येन सह संयोगाद्यन्यतमसम्बन्धासम्भवेन प्रतीचस्सकाशाज्जाग्रद्भानं न स्यात्। तस्मात्तत्राध्यस्तमेव तत्। तथा च प्रत्यगात्मानं प्रकृत्य श्रुतिर्भवति—

---

[1] योगवासिष्ठे निर्वाणप्रकरणे. 46. [2] दुष्टप्रकृत्या अनवरतं पच्यमानत्वात् घूकाः पेचकाः इत्युच्यन्ते। 'उलूके तु वायसारातिपेचकौ' इत्यमरः. 2.5.15.

तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ १ ॥

उद्भूतमिवेतीवशब्दो विद्वद्दृष्ट्या प्रयुक्तो नतु प्रतीत्यभिप्रायेण । वस्तुगत्याअनुद्भूतमेवोद्भूतं पश्यन्नित्युक्तं भवति । इवशब्दार्थं दृश्यस्य मायामयत्वं तत्त्वज्ञाननिवर्त्यत्वेनोपपादयति—प्रबोधेति । प्रबोधसमयः—आचार्योपदिष्टमहावाक्यार्थसाक्षात्कारसमयः[1] तस्मिन् समये । स्वात्मानमेव—सत्ताप्रकाशात्मकमेव । एवकारार्थं स्वयमेवाह—अद्वयमिति । द्वयशब्दवाच्यविश्वशून्यं प्रविलीनप्रपञ्चम् स्वात्मानमसाधारणस्वस्वरूपं साक्षात्कुरुते—अहमस्म्यद्वयानन्दप्रकाशात्मेति । तस्मै इत्यर्थः । स्वात्मनि वस्तुतोऽसतोपि तत्रत्यमिवावभासे दृष्टान्तमाह—दर्पणदृश्यमाननगरीतुल्यमिति । विश्वविशेषणमेतत् ।

पुरत्रये क्रीडति यश्च जीवः ततस्तु जातं सकलं विचित्रम् ।
आधारमानन्दमखण्डबोधं यस्मिन् लयं याति पुरत्रयं च ॥[2]
एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥[3]
मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ।
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम् ॥[4] इति ।
यथा स्वप्नप्रपञ्चोऽयं मयि मायाविजृम्भितः ।
एवं जाग्रत्प्रपञ्चश्च मयि मायाविजृम्भितः ॥ इति पुराणवचनं च ।

ततः प्रतीच्येव जाग्रत्प्रपञ्चोऽध्यस्तोऽनुभूयते भ्रान्त्या बहिरिवेति भावः ॥

---

[1] ज्ञानिनां समाधिसमयः, सुसिद्धानां व्युत्थानसमयश्चेति भाष्यम्.

[2] जाग्रदाद्यवस्थावच्छिन्नशरीरत्रये यो जीवः विहरति तस्मादेव प्रत्यगभिन्नपरमात्मनः विविधनामरूपकर्मात्मकं विश्वं जातम् इत्यर्थः ।

[3] क्रियाशक्त्यात्मकः प्राणः, ज्ञानशक्त्यात्मकं मनः इति भेदः । 'च' शब्दात् देहादिकमपि । कैवल्योपनिषदि 14.15.

[4] त्रिषु धामस्वित्यादिपूर्वमन्त्रेण प्रपञ्चवैलक्षण्यमुक्त्वा मूलबीजांशयोगतः सृष्टिस्थित्यन्तकारणत्वमप्याह—मय्येवेत्यादिना । कैवल्ये. 19.

अनेनात्मनो विश्वाकारपरिणामशङ्का निरस्ता[1] । बहिरविद्यमानस्यापि बहिरवभासे दृष्टान्तं वदन् प्रबोधनिवर्त्यत्वमपि तेनैव द्रढयति—यथा निद्रयेति । यथा कश्चित् सुप्तो निजान्तर्गतमेव वासनामयं विश्वं निद्रया बहिर्विषयत्वेन उद्भूतमिव पश्यन् प्रबोधसमये—जाग्रदवस्थागमनसमये स्वात्मानमेवाद्वयं स्वप्नोपलब्धप्रपञ्चरहितं साक्षात्कुरुत तथेत्यर्थः । अत्र विश्वं पश्यन् अद्वयमात्मानं

ननु स्वात्मनि प्रपञ्चोऽध्यस्तश्चेद्बाध्येत। न च कदाचिदपि बाधोऽनुभूयते । अतो नात्मन्यध्यस्तः, किन्तु बहिः परमार्थत एव स विद्यत इत्याशङ्क्य यथा स्वप्नप्रपञ्चोऽध्यस्तोऽपि तदा सत्य इवैव भाति, प्रबोधसमये तु बाध्यते, तथैवायमपि जाग्रत्प्रपञ्चः तत्त्वज्ञानात्पूर्वं सत्यत्वेन भातोऽपि आचार्येण परमदयालुना साक्षात्परमेश्वरावताररूपेणोपदिष्टतत्त्वमस्यादिमहावाक्यजन्यप्रत्यग्ब्रह्मैक्यसाक्षात्कारसमये समूलं बाधितस्सन् प्रत्यगभिन्नाद्वितीयब्रह्ममात्रतया परिशिष्यते इत्यभिप्रेत्याह—यस्साक्षादित्यादिना । यः—अध्यस्तप्रपञ्चाधिष्ठानभूतः प्रत्यगात्मा, प्रबोधसमये—गुरूपदिष्टमहावाक्यात् ज्ञानोत्पत्तिकाले अद्वयं—सर्वप्रपञ्चस्य समूलस्य बाधितत्वेन वियदादिद्वयरहितं, स्वात्मानमेव—वियदाद्यधिष्ठानभूतब्रह्माभिन्नं सच्चिदानन्दात्मकं प्रत्यञ्चमेव साक्षात्कुरुते—सच्चिदानन्दात्मकं ब्रह्माऽहमस्मीत्यप्रतिबन्धेनाव्यवधानमनुभवतीत्यर्थः । 'यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्,'[2] इत्यादिश्रुतेः । तस्मै—उक्तरूपाय, श्रीगुरुमूर्तये श्रीगुरुः—साक्षात्कृतब्रह्मतत्त्वतया त्रिविधपरिच्छेदशून्यो ज्ञानोपदेष्टा पुरुषः, तन्मूर्तये—तद्रूपेणावस्थिताय, श्रीदक्षिणामूर्तये दक्षिणा—दक्षिणदिगभिमुखा मूर्तिर्विग्रहो यस्य तस्मै ।

परमाद्वैतविज्ञानं कृपया वै ददाति यः ।
सोऽयं गुरुर्गुरुस्साक्षाच्छिव एव न संशयः ॥[3]

---

[1] उच्छेदस्य गुणान्तराधानस्य वा असम्भवादिति भावः.

[2] यत्र तु अस्य प्रबुद्धस्य सर्वमात्मैवाभूत्, तदा क्रियासामान्यस्य कारकनिमित्तत्वेन, कारकाभावे क्रियाऽभावः, क्रियाऽभावे च तत्फलाभावः इति भावः । बृहदारण्यके. 2.4.14. [3] योगवासिष्ठे.

साक्षात्कुरुते इति शतृनिर्देशो न लक्षणार्थः, नापि हेत्वर्थः, किन्तु तिष्ठन् गायतीतिवत् क्रियाद्वयनैरन्तर्यद्योतनार्थः । यद्वा—लक्षणार्थोऽयं शता । पूर्वं यः स्वसम्बन्धिविश्वदर्शनेन सद्वयः संसारीव लक्षितः, स एव प्रबोधसमये विद्याबाधितविश्वः स्वात्मानमेवाद्वयं साक्षात्कुरुते इत्यर्थः इति द्रष्टव्यम् ॥ १ ॥

इत्यादिवचनशतेभ्यो ज्ञानोपदेष्टा गुरुस्साक्षात्परमेश्वर एव । अथवा—श्रीमती—सच्चिदानन्दात्मिका गुर्वी—अतिमहत्तरा मूर्तिः—स्वरूपं यस्य स तथा, तस्मै श्रीगुरुमूर्तये । श्रिया—अनाद्यचिन्त्यमाया शक्त्या दक्षिणः—सृष्टिस्थित्यन्तविरचना-निपुणश्चासौ परमार्थतः अमूर्तिश्च आकारविशेषरहितः । 'अस्थूलमनणु'[1] इत्यादिश्रुतेः । सः दक्षिणामूर्तिः, तस्मै इदं नमः—प्रह्वीभावः अस्त्विति शेषः । प्रह्वीभावश्च—स्वात्मनः परमेश्वरे एकत्वेन समर्पणम् ।[2] अत्र च पूर्वार्धेन त्वंपदार्थ उक्तः, उत्तरार्धे श्रीगुरुमूर्तये श्रीदक्षिणामूर्तय इति पदद्वयेन मूर्तिद्वययुक्तस्तत्पदार्थ उक्तः । स्वात्मान-मद्वयमिति पदद्वयसामानाधिकरण्येन यत्तच्छब्दाभ्यां च प्रत्यग्ब्रह्मैक्यलक्षणो वाक्यार्थः उक्तः । सकलवेदान्तप्रसिद्धोऽयमेवार्थः उत्तरश्लोकैः प्रपञ्च्यते ॥

दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं विश्वं यथा निद्रया तथाऽऽत्मनि मायया बहिरुद्भूतमिव पश्यन् यः प्रबोधसमयेऽद्वयं स्वात्मानमेव साक्षात्कुरुते तस्मै इदं नमः इत्यन्वयः ॥

एवमेवास्यार्थो वार्तिककारेण च सङ्गृह्योक्तः—

ईश्वरो गुरुरात्मेति मूर्तिभेदाद्विभागिने ।[3]
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः ॥ इति ॥ १ ॥

---

[1] 'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति' इति एतत्पूर्वभागः । बृ. उ. 3.8.8. [2] प्राणान् प्रणामयतीति, नमस्त्वैक्यं प्रचक्षते इति च श्रुतिः ।

[3] मूर्तिभेदविभागिने. क.

अस्यार्थः[1]—

अन्तरस्मिन्निमे लोकाः अन्तर्विश्वमिदं जगत् ।[2]
बहिर्वन्माययाऽऽभाति दर्पणे प्रतिबिम्बितम् ॥ ८ ॥

उदाहृतं मूलश्लोकं तात्पर्यतो वार्तिकश्लोकैर्व्याख्यातुमारभते— अस्यार्थ इति ॥ तत्र प्रथमपादार्थं श्रुतिमुदाहृत्य व्याचष्टे— अन्तरस्मिन्निति ॥ इमे—प्रसिद्धाः—प्रत्यक्षादिप्रमाणसिद्धाः लोकाः[3]—विश्वशब्द-निर्दिष्टाः अस्मिन् परमात्मनि अन्तः- मध्ये वर्तन्ते, न ततो बहिः स्वतन्त्र-तयेत्यर्थः । उक्तमेवार्थं प्रकटयति— अन्तर्विश्वमिदं जगदिति । विश्वं सर्वमेवेदं जगत् अन्तः, नात्र सङ्कोचकारणमित्यर्थः । 'ब्रह्मैव भूतानां ज्येष्ठम् । तेन कोऽर्हति स्पर्धितुम् । ब्रह्मन् देवास्त्रयस्त्रिꣳशत् । ब्रह्मन्निन्द्र-प्रजापती । ब्रह्मन् ह विश्वा भूतानि । नावीवान्तस्समाहिता ।'[4] इति श्रुतिवाक्यशेषः ॥ इदं विश्वं दर्पणे प्रतिबिम्बितमिव—दर्पणान्तर्गतमिव अन्तस्स्थमेव विश्वं मायया बहिर्वत्[5] आभातीति योजना ॥ ८ ॥

---

[1] विश्वमित्यादिप्रथमश्लोकस्यार्थः इत्यर्थः.

[2] तैत्ति. ब्रा. 2.8.8. लोकाः भूरादयः, स्थावरजङ्गमस्वरूपं जगत्, इति लोक-जगतोः भेदः.

[3] आविर्भूतं सर्वं विश्वशब्देनोच्यते, ज्ञानविज्ञानगोचरं तु लोकशब्देनोच्यते इति विश्वलोकयोः भेदः.

[4] तै. ब्रा. 2.8.8. तस्मात् आकाशादिपञ्चमहाभूतानां प्राणिनां च मध्ये ब्रह्मैव अतिशयेन श्रेष्ठम्, तेन को नामान्यः पुरुषः स्पर्धितुमर्हति, समानाभावात्, तस्मिन्नेव लोकत्रयेऽप्येकादशसंख्यया स्थिताः त्रयस्त्रिंशद्देवा अपि समाहिताः, तत्रैव इन्द्रः प्रजापतिः सर्वाणि भूतानि च, समुद्रतरणे सन्नद्धाः प्रजाः नावीव सम्यगवस्थिताः इत्यर्थः.

[5] स्वस्य स्वस्थानादन्यत्र प्रकाशे दृष्टान्त उपात्तः इति भाष्यम् । क्रमशो विवर्त-भावनया निर्दिष्टेऽपि स्थाने स्वस्य परमार्थतोऽसत्त्वैव च प्रतिपाद्यते ।

स्वप्नजाग्रदवस्थयोः साम्यम्

स्वप्ने स्वान्तर्गतं विश्वं यथा पृथगवेक्षते ।[1]
तथैव जाग्रत्कालेऽपि प्रपञ्चोऽयं विविच्यताम् ॥ ९ ॥

इदानीं यथा निद्रयेति दृष्टान्तार्थमाह—स्वप्ने इति[2] ॥ निगद-व्याख्यातं पद्यमेतत् ॥ ९ ॥

सत्तासामान्यस्य आत्मायतनत्वम्

स्वप्ने स्वसत्तैवार्थानां सत्ता नान्येति निश्चिता ।
को जाग्रति विशेषोऽस्ति जडानामाशु नाशिनाम् ॥ १० ॥

स्वप्नदृष्टान्तेनैव सत्तास्फुरणयोः आत्मैकायतनत्वमुक्तमित्याह—स्वप्ने स्वसत्तैवेति ॥ स्वप्ने दृश्यमानानामर्थानां या सत्ता सा स्वसत्तैव—आत्मसत्तैव[3] निश्चिता, नान्या सामान्यात्मिका कार्यात्मिका वा । तथाहि—न तावत् स्वप्ने बाह्यार्थानुपलभते द्रष्टेति श्लिष्यते, तदुपलम्भकारणानामिन्द्रियाणा-मुपरतत्वात्, 'स यत्र प्रस्वपित्यस्य लोकस्य सर्वावतो मात्रामपादाय'[4] इति श्रुतेः, स्वप्नदृष्टदेशकालवस्तूनां जाग्रति संवादादर्शनाच्च ! तस्मात् स्वप्ने देहनाड्यन्तस्स्थितो न बाह्यार्थान् पश्यति, नापि बहिर्निर्गत्य पश्यति, तथा सति वस्तुदर्शनदेशेऽपि जागरणप्रसङ्गः स्यात् । देशान्तरगतं तत्रत्यवस्त्ववलो-किनमात्मानं मन्यमान एव, विना प्रत्यागमनं सुप्तदेहदेशेऽपि प्रबुध्यमानः उपलभ्यते । अतो न बहिर्गत्वोपलभ्यते इति । अन्तस्तु यथाप्रदर्शनयोग्य-देशकालनिमित्तविरहात्[5] न वास्तवं दृश्यमस्ति, तदभावे च न सत्तासामान्यं

---

[1] पृथगिवेक्ष्यते· क. [2] अत्र 'स्वप्न इव यः पश्यतीन्द्रियबिले' (मैत्रा. 6.25) इत्याद्याः श्रुतयोऽनुसन्धेयाः. [3] अधिष्ठानसत्तैव·

[4] सः यस्मिन् काले प्रस्वपिति, तदा सर्वेषां भूतभौतिकानां एकदेशं अवयवं अपच्छिद्य गृहीत्वा दृष्टजन्मवासनावासितः सन् भवतीत्यर्थः, बृ· उ· 4.3.9.

[5] दर्शनयोग्यदेशकालादिनिमित्तवत्त्वमेव विज्ञानिभिरङ्गीकृतम् । तत्तु असंस्कृत-मनसामगोचरमिति तेषां भावः.

कार्यं वाऽन्यत् सद्रूपं सम्भाव्यते । 'अथ रथान् रथयोगान् पथः सृजते'[1] इति श्रुतिर्वासनोद्भूतिनिमित्तदर्शनमात्रविषया, औचित्यायोगेन परमार्थत्वानुपपत्तेः । तस्माज्जाग्रद्दर्शनवासनाऽन्तस्स्थैव सती, निद्रादोषात् बहिरिवावभासते- इति युक्तोऽयं जाग्रद्विषयदर्शनस्य मिथ्यात्वे दृष्टान्तः । तस्मादारोपितस्याधिष्ठानसत्ताव्यतिरेकेण सत्ताऽनिरूपणात्, अधिष्ठानभूतात्मसत्तैव स्वप्ने सर्वस्य सत्ता, न पृथगिति सिद्धम् । दृष्टान्तोक्तमर्थं दार्ष्टान्तिके योजयन्ननुमानं सूचयति—को जाग्रतीति ॥ जाग्रद्दृष्टार्थाः सर्वे आत्मसत्तयैव सत्तावन्तः, तस्मिन्नेवाव्यभिचारेणोपलभ्यमानत्वात्, स्वाप्नार्थवत् । तथा विमताः स्वसत्तारहिताः, जडत्वात् स्वाप्नार्थवत् । न चासिद्धौ हेतू; विमताः अन्यसत्तयैव सत्तावन्तः, तथा इमे जडाः, अव्यभिचरितेऽर्थे उपलभ्यमानत्वे सति व्यभिचारित्वात्, आशुतरविनाशित्वाद्वा, रज्ज्वां सर्पधारादण्डमालादिवत्,[2] स्वप्नार्थवच्चेत्यर्थः ॥ १० ॥

स्फुरणस्यापि आत्मायतनत्वम्

स्वप्ने प्रकाशो भावानां स्वप्रकाशान्न हीतरः ।
जाग्रत्यपि तथैवेति निश्चिन्वन्ति विपश्चितः ॥ ११ ॥

एवं दृश्यसत्तायाः अधिष्ठानपर्यवसायित्वं व्युत्पाद्य तत्स्फुरणस्यापि तत्पर्यवसायित्वं व्युत्पादयति—स्वप्ने प्रकाश इति ॥ 'आत्मनैवायं ज्योतिषाऽस्ते'[3]

---

[1] न तत्र रथाः, नाप्यश्वादयः, न च रथमार्गाः, अथापि तान् सर्वानपि वासनारूपान्तःकरणवृत्त्या व्यवस्थापयतीत्यर्थः. बृ. उ. 4.3.10.

[2] सर्प-जलधारा-काष्ठदण्ड-कुसुममालादर्शनवदित्यर्थः.

[3] आदित्यादिषु ज्योतिःषूपरतेषु चक्षुरादिभिः कार्यकारणसंघाततदनुग्राहकाणामनुपलम्भात् आत्मनैव ज्योतिषा अयमास्ते इत्यर्थः. बृ. उ. 4.3.6.

'अत्रायं पुरुषस्स्वयंज्योतिः'[1] इति श्रुतेश्च स्वप्ने भावानां दृश्यानामर्थानां प्रकाशः स्वप्रकाशात् अधिष्ठानात्मप्रकाशान्न हीतरः स्वतन्त्रः ; स्वतस्सत्ताहीनस्य स्वतस्स्फुरणस्याप्यभावादित्यर्थः । अत्राप्यनुमानमाह—जाग्रत्यपीति । विमताः जाग्रद्दृश्याः अन्याधीनप्रकाशाः, अन्यस्मिन् भासमान एव सति भासमानत्वात्, स्वप्नदृश्यवत्, इति विपश्चितो निश्चिन्वन्तीत्यर्थः । न चाप्रयोजकत्वं शङ्क्यम्,[2] दृश्यानामप्यनन्याधीनप्रकाशत्वे सति इन्द्रियाद्यनपेक्षणात् तत्सृष्टिवैयर्थ्यप्रसङ्गादिति द्रष्टव्यम् ॥ ११ ॥

स्वप्नान्तजागरितान्तयोः साम्यम्

निद्रया दर्शितानर्थान् न पश्यति यथोत्थितः ।
सम्यग्ज्ञानोदयादूर्ध्वं तथा विश्वं न पश्यति ॥ १२ ॥

तदेवं मायाऽवस्थमेव मायिकं विश्वदर्शनं, न विश्वस्यान्यनिरपेक्षसत्तास्फुरणे स्तः इति, पूर्वार्धव्याख्यानेन प्रतिपाद्य, इदानीमुत्तरार्धं व्याचक्षाणः आत्मसत्तास्फुरणयोरव्यभिचारात् नित्यत्वं सूचयति—निद्रया दर्शितानिति ॥ सर्वाधिष्ठानस्य[3] प्रत्यगात्मनो ब्रह्मणो याथात्म्यज्ञानोदयादित्यर्थः ॥ १२ ॥

प्रबुद्धस्यैव अद्वैतभानम्

अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
अजन्मनिद्रं[4] अस्वप्नमद्वैतं बुध्यते तदा ॥ १३ ॥[5]

उक्तेऽर्थे वृद्धस्मृतिं संवादयन् अद्वैतसाक्षात्कारोदयप्रकारं सूचयति अनादीति ॥ 'अनादिमायया सुप्तः इति' स्वतो जीवस्य ज्ञानं न सम्भाव्यत

---

[1] सर्वसंसर्गरहितं चक्षुरादिकार्यकारणव्यावृत्तस्वरूपं अलुप्तदृगात्मज्योतिः स्वेन रूपेणावभासयन् यतो गृह्यते, अतः अत्रायं पुरुषः स्वयंज्योतिर्भवतीत्यर्थः. बृ. 4.3.9.

[2] हेतुरस्तु साध्यं मास्त्विति अप्रयोजकत्वाशङ्का.

[3] यस्य सर्वाधिष्ठानस्य. क. [4] अजमनिद्रम्. क.

[5] अज्ञानान्यथाज्ञानरूपेण अनादिकालप्रवृत्तेन मायालक्षणेन स्वप्नेन युतः जीवः, गुरुणा यदा बोध्यमानः प्रतिबुध्यते, तदा सर्वभावविकारवर्जितं तुरीयमात्मानं बुध्यते-इत्यर्थः. गौड. का. 1.16.

इति सूचयति । 'यदा प्रबुध्यते' इत्युक्तया अन्यतोऽपि प्रबोधस्य दुर्लभत्वं द्योतयति । तथा च श्रुतिः—

श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यन्न विद्युः ।
आश्चर्यो वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्टः[1] ॥

इति । स्मृतिरपि—'आश्चर्यवत् पश्यति कश्चिदेनम्'[2] इत्यादि । यदैवं जीवः प्रबुध्यते-आचार्योपदेशतो वेदान्तवाक्यात् प्रबोधं लभते तदा अद्वैतमात्मतत्त्वं प्रबुध्यते—साक्षात्करोति । किंलक्षणमद्वैतं? अजं-आगन्तुकप्रबोधवज्जाग्रदवस्थावर्जितम् । अनिद्रं—निद्रोपलक्षितमूर्छासुषुप्तिरहितम् । अस्वप्नं—स्वप्नाख्यमन्यावस्थाविरहितम् । अत एवावस्थात्रयद्वैतशून्यत्वात् अद्वैतमित्यर्थः ॥ १३ ॥

प्रसन्नतायाः स्वात्मबोधं प्रति हेतुत्वम्

श्रुत्याचार्यप्रसादेन योगाभ्यासवशेन च ।
ईश्वरानुग्रहेणापि स्वात्मबोधो यदा भवेत् ॥ १४ ॥
भुक्तं यथाऽन्नं कुक्षिस्थं स्वात्मत्वेनैव पश्यति ।
पूर्णाहन्ताकबलितं विश्वं योगीश्वरस्तथा[3] ॥ १५ ॥

उदाहृतस्मृतौ यदातदेत्यनयोरर्थमाह—श्रुत्याचार्येति वार्तिकद्वयेन ॥ आचार्यप्रसादेनानुग्रहेण, असम्भावनारहितस्वार्थया श्रुत्या, योगाभ्यासो निदिध्यासनं तद्वशेन तदनुष्ठानप्रभावेन, ईश्वरः प्राक्सेवितोऽन्तर्यामी श्रवणादिना चाराध्यमानः परमात्मा, तस्यानुग्रहः-उपासकचित्ते स्वतत्त्वाविष्करणं,

---

[1] अयमात्मा श्रोतुमपि अनेकैः न लभ्यते, शृण्वन्तोऽप्यनेके असंस्कृतात्मानः न विजानीयुः, आश्चर्यरूपः कश्चिदेव वक्ता, अनेकेषु निपुणः कश्चिदेव अस्य लब्धा, निपुणेन गुरुणा अनुशिष्टः कश्चिदेवास्य ज्ञाता च इत्यर्थः. क. उ. 2.7.

[2] आश्चर्यवत् वदति तथैव चान्यः । आश्चर्यवच्चैनं अन्यः शृणोति श्रुत्वाऽप्येनं वेद न चैव कश्चित् ॥ इति शेषः । गीता. 2.29. [3] योगेश्वरस्तथा. क.

तेन । अपिशब्दः उक्तसर्वसाधनसमुच्चयार्थः । तथाच श्रुतयः— 'वेदान्तविज्ञानसुनिश्चितार्थाः'[1] 'आचार्यवान् पुरुषो वेद'[2] 'ततस्तु तं पश्यते निष्कळं ध्यायमानः'[3] 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वाम्'[4] इति । एतैस्साधनैः यदा सम्पद्यते पुरुषः तदा प्रबुद्ध्यत इति स्मृत्युक्तयदाशब्दो व्याख्यातः ॥ १४ ।

तदाशब्दार्थं अद्वैतबोधं विवृणोति—भुक्तमिति ॥ स्फुटार्थमेतत् । अनेन 'जानीयात् तत् कथं जीवः' इति प्रश्नस्याद्वैतप्रत्यगात्मरूपेण जानीयादित्युत्तरमुक्तं वेदितव्यम् । श्रुत्याचार्येतिपूर्वश्लोकेन 'किंतत् ज्ञानस्य साधनम्' इत्यस्योत्तरमुक्तं द्रष्टव्यम् । अस्य ज्ञानस्य फलं तृतीयश्लोकेन[5] संसारनिवृत्तिलक्षणं वक्ष्यति ॥ १५ ॥

चिदात्मन एव ईश्वरत्वम्

यथा स्वप्ने नृपो भूत्वा भुक्त्वा भोगान् यथेप्सितान् ।
चतुरङ्गबलोपेतः शत्रुं जित्वा रणाङ्गणे ॥ १६ ॥

एवं श्लोकस्य पदशः प्राप्तमर्थमाविष्कृत्य आर्थिकमर्थमाविष्कुर्वन् 'ईश्वरत्वं च जीवत्वम्' इत्याद्यवशिष्टप्रश्नानामुत्तरमाह—यथा स्वप्न इत्यादिना ॥ चिदात्मनो जीवेश्वरभावो मायानिबन्धनः इत्यत्र दृष्टान्त उच्यते—स्वप्ने कश्चिद्यथा नृपात्मतामात्मनोऽनुभूय स्वातन्त्र्यं मन्यते, तद्वत् परान् स्ववशीकृत्य जगत्पतितया स्वातन्त्र्यावस्थाऽऽपत्तिः चिदात्मनः ईश्वरत्वमित्यर्थः ॥ १६ ॥

---

[1] तै. उ. 4.12. [2] गुरुदीक्षासम्पन्नः पुरुषः आत्मानमुपसम्पद्य सुखी निर्वृतो भवतीत्यर्थः. छां. उ. 6.14.2.

[3] यतोऽयं ज्ञानप्रसादेव विशुद्धान्तःकरणः ब्रह्म द्रष्टुं योग्यः भवति अत एव ध्यानसाधनसम्पन्नः सर्वावयवभेदवर्जितं तमात्मानं उपलभते इत्यर्थः. मुं. उ. 3.1.8.

[4] एषः परमात्मा यं जीवं वृणुते तेनैव लभ्यः, तस्यैव स्वस्वरूपं प्रकाशयति च. इत्यर्थः. मुं. उ. 3.2.3. [5] 'यस्यैव स्फुरण'मित्यादिना.

ईश्वरस्यैव जीवभावः

परात्[1] पराजितो भूत्वा वनं प्राप्य तपश्चरन् ।
मुहूर्तमात्रमात्मानं मन्यते कल्पजीविनम् ॥ १७ ॥
तथैव जाग्रत्कालेऽपि मनोराज्यं करोत्यसौ ।
कालनद्योघयोगेन[2] क्षीणमायुर्न पश्यति ॥ १८ ॥
मेघच्छन्नोंऽशुमालीव[3] मायया मोहितोऽधिकम् ।
किञ्चित्कर्ता च किञ्चिज्ज्ञो लक्ष्यते परमेश्वरः ॥ १९ ॥

जीवत्वे दृष्टान्तमाह—परादिति[4] ॥ परतन्त्रः—अप्राप्तार्थाभिलाषो जीव इत्यर्थः ॥ १७ ॥

यथा स्वप्ने जीवभावः तथा जाग्रद्दशायामपि । अस्ति दृष्टान्त इत्याह —तथैवेति ॥ १८ ॥

आयुःक्षयादर्शनमस्याज्ञत्वमीश्वरवैपरीत्यमुक्तम् । ईश्वर एव सन् मायापरवशतया जीवो भवति, न जीवो नाम कश्चित् स्वतन्त्रोऽस्तीत्येतत् दृष्टान्तेनोपपादयति—मेघच्छन्नः इति ॥ १९ ॥

व्यावहारिकेश्वरत्वोपपादनम्

यद्यत्करोति जानाति तस्मिंस्तस्मिन् परेश्वरः ।
राजा विद्वान् स्वसामर्थ्यादीश्वरोऽयमितीर्यते ॥ २० ॥

स्वप्नमनोरथस्य जीवदृष्टान्तस्य दार्ष्टान्तिकमुक्त्वा, स्वप्नेश्वरदृष्टान्तस्य दार्ष्टान्तिकमाह—यद्यत्करोतीति ॥ यो यद्यत् स्वसामर्थ्यात् स्वातन्त्र्येण, करोति, तस्मिंस्तस्मिन् क्रियमाणे 'परेश्वरः परमेश्वरो राजेति, तथा स्वसामर्थ्याद्यद्यज्जानाति तस्मिंस्तस्मिन् सः 'विद्वान् स्वतन्त्रज्ञानवानीश्वरोऽयं' इति चेर्यते इति योजना ॥ २० ॥

---

[1] पश्चात्. क. [2] वेगेन. क. [3] सदा चण्डकिरणः सूर्य इवेत्यर्थः. [4] पश्चादिति. क.

जीवेषु ईश्वरशक्तियोगोपपादनम्

ज्ञानक्रिये शिवेनैक्यात् सङ्क्रान्ते सर्वजन्तुषु ।
ईश्वरत्वं च जीवानां सिद्धं तच्छक्तिसङ्क्रमात् ॥ २१ ॥

मायिकमीश्वरत्वं जीवत्वमन्यसापेक्षं व्युत्पाद्य सर्वात्मत्वं चिदात्मनो व्युत्पादयन् 'सर्वात्मत्वं च कीदृशम्' इत्यस्य प्रश्नस्योत्तरमाह—ज्ञानक्रिये इति ॥ सर्वजन्तुषु ये ज्ञानक्रिये ज्ञातृत्वं कर्तृत्वं च ते स्वातन्त्र्येण ज्ञातृकर्तृशिवेनैक्यात्तेषु सङ्क्रान्ते, अग्न्यैक्यादिवायःपिण्डे दग्धृत्वम् । अतः ईश्वरशक्तियोगात् जीवानामीश्वरत्वं सिद्धम् । ईश्वर एव सर्वात्मेति, सिद्धं तस्य सर्वात्मत्वमित्यर्थः ॥ २१ ॥

ज्ञानस्य स्वप्रकाशत्वम्

अयं घटोऽयं पट इत्येवं नानाप्रतीतिषु ।
अर्कप्रभेव ज्ञानं तत् स्वयमेव प्रकाशते ॥ २२ ॥

सर्वजन्तुष्वविशिष्टं यत् ज्ञानं तस्य स्वप्रकाशत्वमेकत्वं च साधयति—अयमिति ॥ स्वज्ञानं—स्वस्य द्रष्टुः स्वरूपभूतं ज्ञानं स्वयमेव प्रकाशते स्फुरतीत्यर्थः ॥ २२ ॥

ज्ञानं न चेत् स्वयं सिद्धं जगदन्धं तमो भवेत् ।
न चेदस्य क्रिया काचित् व्यवहारः कथं भवेत् ॥ २३ ॥

ज्ञानस्यास्वप्रकाशत्वाभ्युपगमे बाधकमाह—ज्ञानं न चेदिति ॥ भवत्वेवं ज्ञानमीश्वरस्य, तस्यामूर्तस्य कुतः क्रियेत्यत आह—न चेदिति । ईश्वरः करोति व्यवहारसिद्ध्ये क्रियापि यादृशी तादृश्यस्याङ्गीकार्यत्यर्थः ॥ २३ ॥

अमूर्तेष्वपि क्रियाभानोपाधिदर्शनम्

क्रिया नाम परिस्पन्दपरिणामस्वरूपिणी ।
स्पन्दमाने बहिर्ज्ञाने तदङ्कुरवदुद्भवेत् ।। २४ ।।

तर्हि किंस्वरूपा क्रियेत्यपेक्षायामाह—क्रिया नामेति ।। परिस्पन्दश्चलनं, परिणामोऽवस्थान्तरापत्तिः । एवंस्वरूपिणी क्रिया प्रसिद्धा शरसुवर्णादिष्वित्यर्थः । सा अमूर्तेष्वप्युपाधिवशात् भातीत्याह—स्पन्दमाने इति । इन्द्रियद्वारकमनोवृत्तिद्वारा ज्ञाने बहिः स्पन्दमाने तदङ्कुरवत् तस्य ज्ञानस्याङ्कुरवत् कार्यमिव पूर्वोक्ता क्रिया उद्भवेत्—ज्ञानव्याप्तेऽर्थे अतिशयहेतुक्रिया ज्ञानाश्रयायत्तप्राणाधिष्ठितस्थूलोपाधिनिबन्धना भवेदित्यर्थः । अन्तर्यामीश्वरसन्निधानायत्तत्वात् प्राणादिचेष्टायाः, सर्वजन्तुषु प्रतीयमाना चेष्टापि ईश्वरस्यैवेत्यर्थः ।। २४ ।।

परिणामक्रियाभेदाः

उत्पाद्यप्राप्यसंस्कार्यविकार्योपाश्रया क्रिया ।
करोति गच्छत्युन्मार्ष्टि छिनत्तीति प्रतीयते ।। २५ ।।

इदानीं क्रियाकार्यं दर्शयन् क्रियासद्भावं साधयति—उत्पाद्येति ।। यद्वा—परिस्पन्दरूपां क्रियामुक्त्वा परिणामरूपामुदाहरति—उत्पाद्येति ।। उत्पाद्यादीनां यथासङ्ख्यमुदाहरणं—करोतीत्यादि । उन्मार्ष्टि—मार्जनेन संस्करोतीत्यर्थः । इति कर्मकारकव्यपाश्रया परिणामक्रिया प्रतीयते इत्यर्थः ।। २५ ।।

सर्वज्ञत्वकिंचिज्ज्ञत्वोपाधी

शिवो ब्रह्मादिदेहेषु सर्वज्ञ इति भासते ।
देवतिर्यङ्मनुष्येषु किञ्चिज्ज्ञस्तारतम्यतः ।। २६ ।।
जरायुजोऽण्डजश्चैव स्वेदजः पुनरुद्भिदः ।
एते चतुर्विधाः पूर्व(देहाः)क्रमशो न्यूनवृत्तयः ।। २७ ।।

इदानीं सर्वज्ञत्वकिंचिज्ज्ञत्वे एकस्मिन्नप्युपाधिभेदेनाप्यवतिष्ठेते इत्युपपादयति—शिव इति ।। तारतम्यतः इत्युक्तम्, किङ्कृतं जीवेषु तारतम्यमित्यपेक्षायां तत्तच्छरीरोपाधिकृतं तदित्याह—जरायुजः इति ।। अत्रापि 'पुरुषे त्वेवाविस्तरामात्मा'[1] इति श्रुतेः जरायुजेष्वपि ज्ञानादितारतम्यं द्रष्टव्यम् ।। २७ ।।

उक्तार्थनिगमनम्

ब्रह्मादिस्तम्बपर्यन्ता स्वप्नकल्पैव कल्पना ।
साक्षात्कृतेऽनवच्छिन्ने प्रकाशे परमात्मनि ।। २८ ।।

ईश्वरत्वादेर्मायामयत्वमुपपादितमुपसंहरति—ब्रह्मादीति ।। अनवच्छिन्नेप्रकाशे परमात्मनि साक्षात्कृते सति सर्वकल्पना जाग्रति प्रबोधे विलीयमानस्वप्नवत् सहसैव विलीयमानत्वात् स्वप्नतुल्यैवेत्यर्थः ।। २८ ।।

सर्वात्मत्वे प्रमाणदर्शनम्

अणोरणीयान्महतो महीयान्[2] इति वेदवाक् ।
रुद्रोपनिषदप्येवं स्तौति सर्वात्मकं शिवम् ।। २९ ।।

उक्ते सर्वात्मत्वे प्रमाणमाह—अणोरणीयानिति ।। २९ ।।

---

[1] 'पुरुषेष्वेवाविस्तरामात्मा : स हि प्रज्ञानेन सम्पन्नतमः, विज्ञातं वदति विज्ञानं पश्यति, वेदश्वस्तनं, वेदलोकालोकौ मर्त्येनामृतत्वमीप्सत्येवंसम्पन्नः' इति पूर्णा श्रुतिः । प्राणिभृतां मध्ये मनुष्येष्वेवातिशयेनात्माविर्भावः इत्यर्थः. ऐत. आ. 2. 3. 2.

[2] अणोरणीयान् महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः । तमक्रतुं पश्यति वीतशोको धातुप्रसादान्महिमानमीशम् ।। इति पूर्णा श्रुतिः । शरीरधारणहेतुभूतस्य धातोः प्रसन्नतासम्पादनात् तं विषयभोगसङ्कल्परहितं परमात्मानं साक्षात्करोतीत्यर्थः. श्वेता. उ. 3.20.

अनुग्राहकमूर्तित्रयम्

ईश्वरो गुरुरात्मेति[1] मूर्तिभेदविभागिने ।[2]
व्योमवद्व्याप्तदेहाय[3] दक्षिणामूर्तये नमः ॥ ३० ॥

गुरुमूर्तये दक्षिणामूर्तय इति पदद्वयस्यार्थमाह—ईश्वर इति ॥ इदं नमः इत्यस्य आत्मसमर्पणं प्रह्वीभावं विवक्षन् 'आत्मेति मूर्तिभेदे'त्युवाच । तथा चेश्वरो गुरुरात्मेत्येवं मूर्तिभेदभिन्नाय दक्षिणामूर्तये नमः इत्यर्थः । मूर्तित्रयकृतपरिच्छेद[4]शङ्काव्यावृत्तये व्योमवद्व्याप्तदेहायेति विशेषणं । व्यापकायेत्यर्थः ॥ ३० ॥

प्रथमश्लोकार्थोपसंहारः

इति श्रीदक्षिणामूर्तिस्तोत्रार्थप्रतिपादके ।
प्रबन्धे मानसोल्लासे प्रथमोल्लाससंग्रहः[5] ॥ ३१ ॥

प्रथमश्लोकव्याख्यामुपसंहरति—इतीति ॥ ३१ ॥

इति श्रीमानसोल्लासे वृत्तान्ते च प्रथमोल्लासः ॥

---

[1] प्रेरकत्वादीश्वरत्वं, बोधकत्वात् गुरुत्वं, स्वस्वरूपतः आत्मत्वं च बोध्यम्.

[2] कालिदासोऽपि 'एकैव मूर्तिर्बिभिदे त्रिधा सा' इति प्रकरणान्तरे आह. मूर्तिभेदाद्विभागिने. क. मूर्तित्रयविभागिने. ख.

[3] अत्र 'आकाशवत् सर्वगतं सुसूक्ष्मम्' (शांडि. 2.1.3.) 'आकाशवत् सूक्ष्मशरीर आत्मा' (पैङ्गलो. 4.12.) इत्यादयः श्रुतयः अनुसन्धेयाः.

[4] परिच्छेदो नाम सीमितत्वम्.

[5] प्रथमश्लोके उल्लसतां—मतसिद्धान्तादिदृष्ट्या स्तोत्रं परिशीलयतां मनसि प्रकाशमानानां अर्थानां सङ्ग्रहः इति यावत्.

अथ द्वितीयः उल्लासः

न्यायवैशेषिकमतसंग्रहः,

तत्र जगतः सत्योपादानकत्वम्

उपादानं प्रपञ्चस्य संयुक्ताः परमाणवः ।
मृदन्वितो घटः तस्माद्भासते नेश्वरान्वितः ॥ १ ॥

मायया बहिरिवोद्भूतं स्वान्तर्गतं विश्वं पश्यन्निति विश्वस्यात्मनि मायाध्यस्तत्वमुक्तं, तन्नोपपद्यते, विश्वस्य आत्माऽन्यसत्योपादानकत्वात्, इति वादिनः केचित् प्रत्यवतिष्ठन्ते । तेषां मतमुत्तरश्लोकेन निराकर्तुमुपन्यस्यति —उपादानमित्यादिना ॥ अत्र वैशेषिका मन्यन्ते—प्रपञ्चस्य कार्यद्रव्यात्मकस्य परस्परं संयुक्ताः परमाणवो निरवयवाः परमसूक्ष्मद्रव्यविशेषाः (षः) उपादानं आश्रयविशेषाः (षः) । तद्गतगुणविशेषाश्च तदुपादानकाः । कर्मापि मूर्तद्रव्यसमवेतत्वात् तदुपादानकमेव । नित्यद्रव्यगुणजातिविशेषसमवायास्तु नित्या एवेति न तेषां कारणापेक्षा । एतदतिरिक्तं च भावरूपं न किंचिदस्ति, अभावश्च भावप्रतियोगिको न स्वतन्त्रः इति । नेश्वरात्मो(रो)पादानकः प्रपञ्चः, नापि मायामय इति । प्रपञ्चस्य ईश्वरानुपादानत्वं साधयति—मृदन्वितः इति । अयमर्थः—विमताः अचेतनोपादानकाः, अचेतनान्विततया भासमानत्मात्; यः स्वसत्तायां यदन्वितो नियमेन भासते स तदुपादानको दृष्टः, यथा मृदन्विततया अवभासमानो घटः मृदुपादानकः, तथाचेमे, तस्मात्तथेति । तस्मादीश्वरात्मान्वि(रान्वि)ततया कस्याप्यवभासादर्शनात् नेश्वरोपादानकः प्रपञ्चः इत्यर्थः ॥ १ ॥

परमाणुगता एव गुणाः रूपरसादयः ।
कार्ये समानजातीयमारभन्ते गुणान्तरम् ॥ २ ॥

कारणगतगुणविशेषैरेव कार्यगुणोत्पत्तेः तत्रापि नेश्वरः कार्यहेतुरित्याह—परमाणुगता इति ।। समानजातीयमिति विशेषगुणाभिप्रायम्[1], द्व्यणुकादि-परिमाणस्य परमाण्वादिगतसङ्ख्यायोनित्वाङ्गीकाराच्च[2] ।। २ ।।

समवायिकारणम्

कार्यं यत्र समन्वेति कारणं समवायि तत् ।
चक्राद्यं साधनं यत्तु घटस्यासमवायि तत् ।। ३ ।।

भावकार्याणां कारणं त्रिविधं प्रसिद्धं—समवायिकारणं निमित्ताकारणम-समवायिकारणं चेति । तेषु त्रिविधेष्वपि कारणेषु ईश्वरस्य कर्तृतारूप-निमित्ताविशेषत्वमन्तरेण अन्यः कारणत्वप्रकारो नास्तीति कथयितुं कारण-भेदानां लक्षणान्याह—कार्यं यत्रेति ।। यस्मिन् समवायसम्बन्धसम्बद्धं कार्यं जायते तत् समवायिकारणं,[3] तदेवोपादानशब्दवाच्यं चेत्यर्थः । यत् पुनः समवायेतरसम्बन्धसम्बद्धं कार्योत्पत्तिकारणं तत् निमित्तामिति विवक्षित्वा उदाहरति—चक्राद्यमिति । न समवायि यत् तदसमवायि, निमित्त-मित्यर्थः[4] ।। ३ ।।

असमवायिकारणम्

समवायिनि तिष्ठद्यत् समवाय्याश्रये तथा ।
कार्येऽवधृतसामर्थ्यं कल्प्यतेऽसमवायि तत् ।। ४ ।।

असमवायिकारणं लक्षयति—समवायिनीति ।। स्वकार्यस्य समवायो

---

[1] बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्माः रूपरसगन्धस्पर्शाः स्नेहसांसिद्धिकद्रवत्व-भावनाशब्दाश्चेतीमे विशेषगुणाः.

[2] संख्यादिः योनिः यस्येति बहुव्रीहिः. दिक्पिण्डसंयोगः कालपिण्डसंयोगश्चेति विभागः.

[3] समवायसम्बन्धेन कार्याधिकरणं इति यावत् .

[4] समवाय्यसमवायिभिन्नत्वमेव निमित्तकारणलक्षणम् .

यस्मिन् तत् समवायि, तस्मिन् यत् तिष्ठेत्, यथा—तन्तुसंयोगःपटसमवायिकारणेषु तन्तुष्वित्यर्थः। अनेन कार्यैकार्थसमवायलक्षणा प्रत्यासत्तिरुक्ता। तथा समवाय्याश्रये यत् तिष्ठेदिति योजना। स्वकार्यसमवायिकारणस्याश्रये इत्यर्थः। अनेन कारणैकार्थसमवायरूपा प्रत्यासत्तिरुक्ता। यथा—तन्तुगताः रूपादयः पटगतरूपाश्रयेण सहैकार्यसमाश्रयाः इति अस्योदाहरणम्[1]। अन्यथासिद्धतन्तुत्वादौ प्रसङ्गवारणायाह—कार्य इति। अवधृतसामर्थ्य-अनन्यथासिद्धमित्यर्थः[2] ॥ ४ ॥

निमित्तकारणम्

निमित्तं कारणं तेषामीश्वरश्च कुलालवत्।

एवं कारणत्रयं कार्यापेक्षितं स्वरूपतो निर्दिश्य तत्रेश्वरस्यापि सर्वकार्योत्पत्तिनिमित्तकारणत्वमेष्टव्यमिति तत्सद्भावं साधयति—निमित्तमिति ॥ अन्येषु निमित्तेषु सत्स्वपि ईश्वरोऽपि निमित्तं तेषां सर्वेषां कार्याणां चाङ्गीकार्यम्, चेतनेनाधिष्ठात्रा[3] विना अचेतनप्रवृत्तेरयोगात्; यथा—चक्रादिषु कारणान्तरेषु सत्स्वपि कुलालादिना विना घटादिकार्यानुत्पत्तिः इत्यक्षरार्थः। तथा च विमतं चेतनाधिष्ठिताचेतनकारणकं, कार्यत्वात्, घटादिवदित्युक्तं भवति ॥

कार्यसामान्यस्य अचेतनोपादानकत्वम्

यत् कार्यं जायते यस्मात् तस्मिन् तत् प्रतितिष्ठति ॥ ५ ॥
मृत्तिकायां घटः तन्तौ पटः स्वर्णेऽङ्गुलीयकम्।
इति वैशेषिकाः प्राहुः तथा नैयायिका अपि ॥ ६ ॥

---

[1] समवाय-स्वसमवायिसमवेतत्वैतदन्यतरसम्बन्धेन समवायिकारणवृत्तिकारणत्वं असमवयिकारणलक्षणम्.

[2] अवश्यक्लृप्त (लघु) नियतपूर्ववृत्तिन एव कार्यसम्भवे तद्भिन्नं अन्यथासिद्धम्.

[3] चेतनाधिष्ठात्रा. क.

यस्मादेवं युक्तियुक्ता कल्पना, तस्मात् चेतनस्य जगदुपादानत्वं सर्वात्मत्वमिति कल्पनं व्यापकोपलब्धिविरुद्धमित्युपसंहरति—यत् कार्यमिति ॥ यस्मात् उपादानात् यत् कार्यं जायते तत् तस्मिन् प्रतितिष्ठति । यथा—मृत्तिकायां घट इत्याद्युदाहरणम् । तथा च सर्वस्य कार्यस्याचेतनप्रतिष्ठत्वोपलम्भविरुद्धं चेतनोपादानत्वकल्पनमित्यर्थः ॥

केषामियं कल्पनेत्यपेक्षायामाह—इति वैशेषिकाः इति ॥ ६ ॥

सांख्योक्ताः प्रधानगुणाः

रजस्सत्त्वं तमश्चेति प्रधानस्य गुणास्त्रयः ।[1]

इदानीं साङ्ख्यकल्पनामाह—रज इत्यादिना ॥ प्रधानं-प्रकृतिः, 'मायाप्रधानमव्यक्तम्'[2] इत्यत्र वक्ष्यमाणलक्षणम् । तस्य प्रधानस्य रजः सत्त्वं तमश्चेति त्रयो गुणाः । 'त्रिगुणमविवेकि विषयः'[3] इत्यादौ साङ्ख्यशास्त्रे निर्दिष्टं प्रधानस्य गुणत्रयात्मकत्वमित्यर्थः ॥

गुणानां स्वरूपक्रियाप्रयोजनानि

रजो रक्तं चलं तेषु सत्त्वं शुक्लं प्रकाशकम् ॥ ७ ॥
तमः कृष्णं चावरकं सृष्टिस्थित्यन्तहेतवः ।

तत्रोक्तमेव गुणानां लक्षणमाह—रजो रक्तमिति ॥ तेषु—गुणेषु मध्ये रक्तं—रञ्जनात्मकं, उपष्टम्भकमिति यावत् । तथा चलं—चलनस्वभावं यत्

---

[1] राहोः शिरः इतिवत् प्रधानस्य गुणाः इति निर्देशः. गुणाभेदाङ्गीकारात् प्रधानस्य.

[2] मानसोल्लासे. 2. 31. पुरुषदृष्ट्या अप्रधानायाः अपि प्रकृतेः प्रधानाख्या गुणनिबन्धना. आधीयमानानां अंशानां रक्षणपूर्वकं विकासनेन बहिः प्रकाशकरणात् .

[3] 'सामान्यमचेतनं प्रसवधर्मि, व्यक्तं तथा प्रधानम्' इति कारिकाभागशेषभागः । सुखदुःखमोहात्मकगुणमयत्वं, सम्भूयकारित्वं, ग्राह्यत्वं, सर्वपुरुषसाधारण्यं, स्वप्रकाशचेतनात् भिन्नत्वं, पदार्थान्तराविर्भावहेतुत्वं च प्रकृतिविकृत्योः साधारणाः धर्माः इत्यर्थः. सां. का. 11.

आत्मन एव मायासहकारेण सकल-
जगदुत्पत्त्यादिकारणत्वम्

बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्निर्विकल्पं पुनः

तत् रजोगुणमित्यर्थः । एवमुत्तरत्रापि योजना । शुक्लं—शुद्धं लघु प्रकाशकं-सर्वार्थसाधकं सत्त्वम् । तमः कृष्णं—गुरुत्वोतं मलिनस्वभावं च आवरकं—अविवेककरमित्यर्थः । एषां सद्भावं साधयति—सृष्टिस्थित्यन्त-हेतवः इति । रजोगुणः सृष्टिहेतुः, सत्त्वं स्थितिहेतुः, तमः प्रलयहेतुरिति योजना । कथमेषां सृष्ट्यादिहेतुत्वम्? इत्यस्योत्तरं उत्तरत्र भविष्यति ॥

उत्तरश्लोकसारम्

इति साङ्ख्याश्च भाषन्ते तेषां दूषणमुच्यते ॥ ८ ॥

अस्मिन् मते निमित्तत्वेनापि न चेतनापेक्षा जगतः इत्युपसंहरति—इति साङ्ख्याश्च भाषन्ते इति ॥ चकारात् अन्येऽपि ये स्वभाववादिनः,[1] शून्य-वादिनः,[2] शैवाः, यौगाः,[3] पौराणिकाश्च गृह्यन्ते, तेषां सर्वेषां दूषण-मुच्यते इत्युत्तरश्लोकोत्थापनमेतत् ॥ ८ ॥

अत्र 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्'[4] 'आत्मा वा इदमेक

अत्रेयं तत्त्वसुधा—

नन्वात्मनि प्रपञ्चस्यावस्थानं नोपपद्यते, तदकारणत्वात् । तथाहि—किमात्मा जगदारम्भकः उत तदाकारपरिणामी ? नाद्यः ; एकस्य विभोश्चिद्रूपस्य जडप्रपञ्चा-रम्भकत्वासम्भावत् । नापि द्वितीयः ; निरवयवनिर्विकारचिद्रूपस्य परिणामासम्भवात् । ततो नित्याश्चतुर्विधाः परमाणवः[5] जगदारम्भका इति तेष्वेव तस्य स्थितिः[6] । यद्वा —प्रधानमेव जडं त्रिगुणात्मकं[7] जगदाकारपरिणामि, तत्रैवेदं जगत् परमार्थतोऽस्ति, न

---

[1] चार्वाकाः. [2] बौद्धाः. [3] पातञ्जलाः. [4] छान्दोग्ये. 6. 1.

[5] तत्तत्कर्मानुगुणेश्वरसङ्कल्पेन लब्धवृत्तिकादृष्टविशिष्टात्मसंयुक्ताः इति शेषः.

[6] परमाणुष्वेव प्रपञ्चस्य स्थितिरिति नैयायिकानाम्. [7] सत्त्वरजस्तमोरूपम्.

मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम् ।

एवाग्र आसीन्नान्यत्किञ्चन मिषत्'[1] इत्यादिश्रुतिमाश्रित्य जगत्कारणत्वं[2] अस्मिन् पद्ये निरूप्यते । अतः स्वबुद्धिमात्रोत्प्रेक्षितं मतान्तरं श्रुतिविरुद्धमित्यभिप्रायः[3] । अस्यैषाऽक्षरयोजना—इदं–जगत् प्राक्-उत्पत्तेः पूर्वं निर्विकल्पं-जातिगुणक्रियादिविकल्परहितं सन्मात्रमासीदिति शेषः । सन्मात्रं च ब्रह्मेति पूर्वमुपपादितम् । तत्र दृष्टान्तमाह—बीजस्यान्तरिवाङ्कुरः इति । न हि बीजावस्थायां तस्मिन्नविद्यमानोऽङ्कुरः अनेकसहकारिसन्निधानानन्तरं जायते इतीष्यते, कुटज[4]बीजादपि वटाङ्कुरोत्पत्तिप्रसङ्गात् । तस्य तत्र असामर्थ्यात् न प्रसङ्गः इति चेत्, कुतोऽसामर्थ्यमवगतम्? कुटज[4]बीजात् वटाङ्कुरोत्पत्त्यदर्शनादिति चेत्—तर्हि वटबीजादपि वटाङ्कुरोत्पत्त्यदर्शनात्

तु चिदात्मनि. इति नैयायिकानां साङ्ख्यानां वा मतमाशङ्क्य—न तावत्परमाण्वारम्भवाद उपपद्यते, निरवयवानां तेषां सर्वात्मना संयोगे प्रथिमानुपपत्तेः, भिन्नयोर्गवाश्ववत् कार्यकारणभावायोगात्, पूर्वमसतश्च कार्यस्य शशविषाणवदुत्पत्त्यनुपपत्तेः, अत्यन्तभिन्नकार्यारम्भे कार्ये गुरुत्वादितद्वैगुण्यापत्तेः, परमाणुसद्भावे प्रमाणाभावात्, कार्यद्रव्यस्य स्वन्यूनपरिमाणारब्धत्वनियमस्य स्थूलतूलपिण्डारब्धतन्त्वादावदर्शनाच्च । नापि प्रधानपरिणामवादः ; तस्य चेतनानधिष्ठितस्य कार्योत्पादे स्वतोऽसामर्थ्यात्, लोके रथादेश्चेतनाधिष्ठितस्यैव प्रवृत्तिदर्शनात्. तत्सद्भावे प्रमाणाभावात्, 'अजाम्'[5]

---

[1] नान्यत् किंचिदपि मिषत् निमिषत् व्यापारवत् इतरद्वा इत्यर्थः. ऐ. उ. 1. 1.

[2] जगत्कारणतत्त्वं. क.

[3] मन् धातोः क्तप्रत्यये मतमिति पदम् । ज्ञातमित्यर्थः । ज्ञानमूलं च-तर्कमात्रजन्या स्वबुद्धिकल्पना चेत् तत् त्याज्यमेव, श्रुतिः तपो वा चेत् तदेव ग्राह्यं भवतीत्याशयः. यथोक्तं—'श्रुतिमतः तर्कोऽनुसन्धीयता'मिति. [4] कुटजो गिरिमल्लिका.

[5] 'अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां सृजमानां सरूपाम् । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः' इति पूर्णा श्रुतिः. श्वेता. उ. 4. 5.

मायावीव विजृम्भयत्यपि महायोगीव यः स्वेच्छया

तस्यापि तत्र कुतः सामर्थ्यमवगम्येत ? तदन्वयव्यतिरेकाभ्यां तदवगमः इति चेत्—तर्हि वटाङ्कुरजननात् प्राक् नियमेनान्वितानामनन्यथासिद्धानां सर्वेषामेव भावानां तदुपादानत्वप्रसङ्गः। तत्र—यदन्वितं कार्यं सदा दृश्यते तदुपादानम्, इतरदुत्पत्तिमात्रे निमित्तमिति नातिप्रसङ्गः इति चेत्—एवं तर्हि बीजान्वितस्याङ्कुरस्य क्वाप्यदर्शनात् न बीजमुपादानं सिद्ध्यति। बीजावयवानामेवोपादानत्वं, न बीजावयविनः इति चेत्—ते किमङ्कुरावयवेभ्योऽन्ये, त एव वा ? आद्ये न तेषामङ्कुरे अनुगतिः। द्वितीये त्वस्मन्मतापत्तिः; बीजावयवानामेव बीजसंस्थानपरित्यागेनाङ्कुरात्मतापत्तिरिति अस्माभिरङ्गीक्रियते। अतः सर्वेऽपि संस्थानविशेषाः कार्यशब्दवाच्याः सर्वानुगतावयवात्मना स्थिताः एव तत्रतत्र सहकारिविशेषेण अविर्भावतिरोभाववत्तया विभाव्यन्ते इति

इत्यादिश्रुतेश्च तेजोऽबन्नादिप्रकृत्यव्याकृतपरत्वाच्च। किंतु—श्रुतौ 'सत्यं ज्ञानमनन्तं ब्रह्म'[1] 'तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः'[2] 'सदेव सोम्येदमग्र आसीत्'[3] 'तदैक्षत बहु स्यां प्रजायेयेति'[4] 'यतो वा इमानि भूतानि जायन्ते'[5] 'यस्सर्वज्ञस्सर्ववित् यस्य ज्ञानमयं तपः। तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते'[6] इत्यादिषु सहस्रशः परमात्मन एव चेतनाज्जगदुत्पत्तिश्रवणात्, विलक्षणयोरपि कार्यकारणभावस्य

---

[1] यद्रूपेण यन्निश्चितम् तद्रूपमव्यभिचरत् सत्यमिति, अवबोधात्मकं ज्ञानमिति, कुतश्चित् न प्रविभक्तं अनन्तमिति चोच्यते. (तै. उ. 2.1.) इति प्रकृत्येति शेषः.

[2] तै. उ. 2. 1. अत्र ब्रह्मण्येव आत्मशब्दप्रयोगः.

[3] सृष्टेः प्राक् तदेव सच्छब्दबुद्धिमात्रगम्यमिति. छा. 6. 2.

[4] प्रजायेय—प्रकर्षेण उत्पद्येय. छा. 6. 2.

[5] भूतानि—ब्रह्मादिस्तम्बपर्यन्तानि. तै. उ. 3 1.

[6] सामान्यतः सर्वं जानाति, विशेषतः सर्वं वेत्ति. ब्रह्म-हिरण्यगर्भाख्यम्. मुं उ, 1. 1. 9.

अनिच्छद्भिरपि अच्छमतिभिः[1] अङ्गीकार्यम् । तथा च सर्वेषु विशेषेषु कार्यकारणभावाद्यात्मना विभाव्यमानेषु 'इदं अयं तत्' इत्याद्युल्लेखयोग्यं यदव्यभिचारि सन्मात्रमनुगम्यमानमस्ति तदेव सर्वस्योपादानं; तच्च ब्रह्मैव नान्यदिति । तथा च—बीज इवाङ्कुरो जगदिदं स्वान्तर्गतं यो विजृम्भयति तस्मै नमः इत्यन्वयः[2] । तर्हि यथा बीजस्याङ्कुरजनने सलिलधामतेज[3]आद्यनेकसहकार्यपेक्षा दृष्टा, तथा अस्य ब्रह्मणो जगज्जनने किमस्ति, उत नास्ति ?[4] अस्ति चेत्—'एकमेवाद्वितीयं'[5] 'नान्यत् किञ्चन मिषत्'[6] इति श्रुतिविरोधः । नास्ति चेत्—दृष्टविरोधः इत्यत आह—पुनरिति । पुनः—सृष्टिकाले प्राप्ते, मायया—'देवात्मशक्तिं स्वगुणैर्निगूढाम्'[7] इत्यदिश्रुतौ ब्रह्मणः शक्तित्वेन

गोमयवृश्चिक-पुरुषकेशलोमादौ दर्शनात्, आरम्भपरिणामव्यतिरेकेण तत्त्वतोऽन्यथाभानलक्षणविवर्तरूपप्रकारस्यापि कार्योत्पादे स्वप्नप्रपञ्चशुक्तिरजतादौ दर्शनात्, अत्र विवर्तवादस्यैव विवक्षितत्वात्,[8] 'सर्वं तं परादाद्योऽन्यत्रात्मनस्सर्वं वेद'[9] इत्यादिश्रुतौ आत्मनोऽन्यत्र जगद्वेदनस्य निन्दितत्वात्, घटोऽस्ति पटोऽस्ति घटः स्फुरति पटः स्फुरतीति सत्तास्फुरणानुविद्धतया अनुभूयमानस्य जगतः, मृदनुविद्धघटस्य मृत्कार्यत्ववत्, सत्तास्फुरणात्मकार्यत्वस्यैव युक्तत्वाच्च आत्मैव जगदुत्पत्त्यादिकारणमित्यभिप्रेत्याह—बीजस्यान्तरिवेति ॥

---

[1] प्रसन्नमनस्कैः· [2] इत्यर्थः· क·

[3] सलिलयुतभूप्रदेशसूर्यालोकादीत्यर्थः· 'त्रिषु धामसु' इत्यादौ च धामशब्दः स्थानार्थकः प्रयुक्तः· [4] सहकार्यपेक्षेति शेषः· [5] छां· उ· 6. 1.

[6] ऐत· उ· 1· 1· [7] श्वेता उ· 1. 3.

[8] यस्तात्त्विकोऽन्यथाभावः परिणाम उदीरितः । अतात्त्विकोऽन्यथाभावः विवर्त इति ह्युच्यते इति, उपादानसमसत्ताककार्यापत्तिः परिणामः, उपादानविषमसत्ताककार्यापत्तिः विवर्तः इति च आहुः.

[9] तत्त्वतः सर्वस्याप्यात्मरूपत्वेऽपि इदमज्ञात्वा यः कश्चन आत्मस्वरूपव्यतिरेकेण सर्वं पश्येच्चेत् तत् सर्वमपि इमं मूढं पराकुर्यादेवेत्यर्थः. बृ. 2. 4. 6.

तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ २ ॥"

निर्दिष्टया, कल्पिता ये देशाः कालाश्च । उपलक्षणमेतत् तत्तत्कार्यसाधनानामपि । तेषां कलना—सम्बन्धविशेषः, तस्माद्यद्वैचित्र्यं तेन चित्रीकृतं—विविधविशेषावस्थापन्नमित्यर्थः । एतेन ब्रह्मणः कारणत्वस्य मायामयत्वोपपादनात् आरम्भवादः, परिणामवादः, स्वभाववादश्च[1] निराकृतः । शून्यवादश्च[2] सद्रूपोपादानत्वाङ्गीकारादेव निरस्तो वेदितव्यः । ननु कार्यस्यापि मायाकल्पितत्वे प्रागिति च पुनरिति च कथं निर्देश इति चेत्—नैष दोषः, परप्रत्यायनार्थतया यथाव्यवहारं प्राप्तानुवादमात्रत्वात् । एवं सति न श्रुतिविरोधो नापि दृष्टविरोधः ; परमार्थस्य सहकारिणोऽनङ्गीकारादिति सर्वमनवद्यम् ॥ मायासहकारिकस्य कारणत्वं क्वोपलब्धमित्यतः उदाहरणमाह—मायावीवेति ।

इदम्—अनुभूयमानं सर्वं जगत् प्राक्—उत्पत्तेः पूर्वं निर्विकल्पं—भोक्तृभोग्यादिविकल्परहितमात्ममात्रमेवासीत् ; 'आत्मा वा इदमेक एवाग्र आसीत्[3] सदेव सोम्येदमग्र आसीत्'[4] इत्यादिश्रुतेः । तत्र दृष्टान्तमाह—बीजस्येति । बीजस्यान्तः—मध्ये अङ्कुर इव । उपलक्षणमेतत्—पल्लवपत्रपुष्पफलशाखाविटपात्मकवृक्षो यथा उत्पत्तेः पूर्वं निर्विकल्पं बीजमात्रमासीत्तद्वत् । पुनः—पश्चात् सृष्टिसमये, मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतं—मायया ईश्वराधिष्ठितया कल्पितौ यौ देशकालौ तयोश्च कलना सम्बन्धः तद्वैचित्र्येण चित्रीकृतं नानाविधभेदभिन्नतया

---

[1] सतः असत् जायते इत्यारम्भवादः, सत एव सज्जायते इति परिणामवादः, चार्वाकाणां च स्वभाववादः.

[2] असतः सज्जायते इत्यभावकारणतावादः सौगतानाम्.

[3] उत्पत्तेः प्राक् इदं जगत् अव्याकृतनामरूपभेदं आत्मैकशब्दप्रत्ययगोचरं च आसीदित्यर्थः. ऐ. 1. 1. 1.

[4] सोममर्हति सोम्यः इति असाधारणब्रह्मधर्मवानित्यर्थः. तस्य सम्बुद्धिः. सदित्यस्तितामात्रमुच्यते. छां. उ. 6. 2.

मायावी[1] लोकप्रसिद्धः ऐन्द्रजालिकः[2] । स यथा मणिमन्त्रादिप्रयोगसङ्क्षुभ्यमाणमायामात्रसहायः रथगजतुरगाद्यनेकं जगत् सृजति, तथा अयमीश्वरोऽपि इत्यर्थः । दृष्टान्तान्तरमाह—अपि महायोगीव यस्स्वेच्छयेति । अपिः

विभक्तम् । 'तन्नामरूपाभ्यामेव व्याक्रियत'[3] इति श्रुतेः । ननु कथमीश्वरस्याद्वितीयस्य बाह्यसाधनरहितस्य जगदुत्पादकत्वम्? लोके कुलालादेर्बाह्यसाधनवत एव कार्यकरत्वदर्शनात् इत्याशङ्क्य, ईश्वरस्य अनाद्यनिर्वचनीयमायाशक्त्युपहितस्य स्वेच्छामात्रेणैव ऐन्द्रजालिकवत् देवर्षिपित्रादियोगिवच्च उपपद्यते जगदुत्पादकत्वं इत्यभिप्रेत्याह—मायावीवेत्यादिना । यः परमेश्वरः मायावीव—लोकप्रसिद्धैन्द्रजालिकमायाविवत् महायोगीव— विश्वामित्रादिमहायोगिवच्च स्वेच्छया—स्वसङ्कल्पमात्रेण, विजृम्भयति—इदं जगदुत्पादयति । 'इन्द्रो मायाभिः पुरुरूप ईयते'[4] 'तदात्मानँ स्वयमकुरुत'[5] 'सच्च त्यच्चाभवत्'[6] इति श्रुतेः । नापि मायया तस्य सद्वितीयत्वम्, तस्या अपि कल्पितत्वात् । नापि तस्य कारणत्वेन विकारित्वम्, जगत्कारणत्वस्यानाद्यनिर्वचनीयमायाघटिततया कल्पितत्वेन उपलक्षणत्वेनापि[7] तत्र विकारानापादकत्वात्[8] । ततश्च तत्र कस्यापि दोषस्याभावात् ब्रह्मैव प्रत्यगभिन्नं सकलजगदुत्पत्तिस्थितिलयहेतुरिति भावः । तस्मै नमः ॥ २ ॥

---

[1] प्रशस्ता माया—कापट्यं अस्यास्तीति मायावी, 'अस्मायामेधास्रजो विनिः', पा. सू. 5. 2. 121.

[2] इन्द्राणां-इन्द्रियाणां जालं आवरकं कर्म । तेन दीव्यतीति ऐन्द्रजालिकः.

[3] बीजात्मकं अव्याकृतं सत जगत् विस्पष्टं नामरूपावधारणमर्यादं व्यक्तीभावं स्वयमेवापद्यतेत्यर्थः. बृ. उ. 1. 4. 7.

[4] इदि परमैश्वर्ये. परमेश्वरः परमात्मैव अनिर्वचनीयाभिः मायाभिः बहुप्रपञ्चरूपः गम्यते इत्यर्थः. बृ. उ. 2. 5. 19.

[5] उत्पन्नं प्रविभक्तनामरूपविशेषं सर्वं तज्जगत् स्वसङ्कल्पेन आत्मरूपमेवाकुरुतेत्यर्थः. तै. उ. 2. 7.

[6] स एवात्मा मूर्तरूपं अमूर्तरूपं चाभवदित्यर्थः. तै. उ. 2. 6.

[7] उपलक्षणस्य. ख.

[8] यावत्कार्यमवस्थायिभेदहेतुः उपाधिः, कादाचित्कतया भेदधीहेतुः उपलक्षणं इति भेदः.

दृष्टान्तयोर्मिथस्समुच्चयार्थः । बाह्यसहकारिसाधनहीनाः सङ्कल्पमात्रसहकारिणो[1] यथा योगिनः विश्वामित्रादयो[2] विचित्रं जगत् भोगक्षममारचितवन्तः इति पुराणादिषु प्रसिद्धम् , तथैवेक्षणमात्रेण स्वेच्छाऽपरपर्यायेण[3] भगवानपि विचित्रं जगत् सृजेदिति नात्रासम्भावना कार्येत्यर्थः ।। २ ।।

अस्यायमभिप्रायः—

जगतः परमाणुकारणत्वनिराकरणम्

अङ्कुरादिफलान्तेषु कार्येष्वस्तित्वमिष्यते ।
कुत आगत्य सम्बद्धाः वटबीजेषु ते कणाः ।। ९ ।।

श्लोकव्याख्यां प्रतिजानीते—अस्यायमभिप्राय इति ।।

यदुक्तमणुकारणं जगदिति तद्व्यापकविरुद्धोपलब्धिपराहतमिति उपपादयति—अङ्कुरादीति ।। कार्येषु सर्वेष्वन्विततया उपलभ्यमानस्योपादानत्वमिति स्थितौ, सर्वत्र सत्तामात्रस्यान्वयदर्शनात्, परमाण्वादेस्तददर्शनात्[4], सच्छब्दवाच्यं ब्रह्मोपादानं, न तु अण्वादय इति वार्तिकश्लोकतात्पर्यार्थः । पूर्वार्धाक्षरार्थस्तु स्पष्ट एव । वटबीजेषु—चरमकार्यभूतेषु ते कणाः—परमाणुलक्षणाः कुत आगत्य सम्बद्धाः ? तेषां द्व्यणुकमात्रेऽन्वयसम्भवेपि सर्वकार्यानन्वयात् न ते उपादानमित्यर्थः । द्व्यणुकादीनां तु त्र्यणुकाद्यन्वयित्वे नास्ति प्रमाणम् । तथा सति पिण्डान्वितो घटः उपलभ्येत, शकलेषु घटः, कपालेषु

---

[1] सङ्कल्पमात्रेणैव बाह्यसहकारसम्पत्तिमपि भूततत्त्ववशीकारेण विन्दमानाः ,इति यावत् ·

[2] विश्वमेव मित्रमस्येति विग्रहः· 'अन्यमिन्द्रं करिष्यामि लोको वा स्यादनिन्द्रकः' इत्यादिरूपेण पराक्रान्ताः इत्यर्थः· [3] सङ्कल्पापरपर्यायेणेति यावत् ·

[4] अन्वयादर्शनात् · उत्तरावस्थां प्रति पूर्वावस्थानाशस्यैव हेतुत्वाङ्गीकारात् ·

वा पिण्डः । नैतदस्ति । पूर्वावस्थाविनाशमन्तरेणोत्तरावस्थाप्राप्त्ययोगात्, नष्टस्य चानुपादानत्वात् । नश्यत्पूर्वावस्थावयवानां उत्तरावस्थोपादानत्वे चरमकार्यस्यापि[1] परमाणव एवोपादानमिति प्रसज्येत । तेषां च अतीन्द्रियत्वात् तदाश्रितं कार्यमप्यप्रत्यक्षं स्यात् । तस्मात् सर्वकार्यान्वयिनः उपादानत्वम् । तच्च सन्मात्रं ब्रह्मैवेति उत्तरार्धतात्पर्यार्थः ॥ ननु कार्यार्थिना यत् उपादीयते मुख्यतया तत् उपादानं प्रसिद्धं, तच्च बीजाद्येव, न ब्रह्मसत्ता, तत् कथं तस्योपादानत्वमिति चेत्—तुल्यमेतत् परमाणुवादेऽपि । न हि अतीन्द्रियाः परमाणवः कार्यार्थिभिरुपादीयन्ते, विकार्यन्ते वा, किन्तु बीजाद्येवेति । ननु तदारब्धोऽवयवी बीजमुपादीयते इति चेत्—तर्हि इहापि सद्विवर्त्तो बीजमुपादीयते इति तुल्यम् । सतस्तु बीजेऽप्यन्वयदर्शनमस्ति न परमाणूनाम्, इत्यस्त्यधिका युक्तिरित्यलं विस्तरेण ॥ ९ ॥

कारणान्तर्गतं कार्यमिति सर्वैश्च सम्मतम् ।
तस्मात् सत्ता स्फुरत्ता च सर्वत्राप्यनुवर्तते ॥ १० ॥

उक्तमेव स्पष्टयति—कारणान्तर्गतमिति ॥ उपादानान्तर्गतमित्यर्थः । प्रकाशमाना सत्ता सर्वत्र कार्यमात्रे अनुवर्तते इति सैवोपादानं सिद्धमित्यर्थः ॥ १० ॥

उत्तरकार्यं प्रति पूर्वकार्यस्योपादानत्वाभावः

पुष्पे फलत्वमापन्ने क्षीरे च दधितां गते ।
विजातीयाः प्रवर्तन्ते गुणा रूपरसादयः ॥ ११ ॥

पूर्वपूर्वकार्यस्योत्तरोत्तरोपादानत्वे बाधकमाह—पुष्पे फलत्वमिति ॥ उपादानगतगुणाः कार्ये समानजातीयं गुणान्तरमारभन्ते इति सम्मतम् । तदिह पुष्पफलयोः क्षीरदध्नोश्च उपादानोपादेयभावे समानस्वभावाः एवोभयत्र

---

[1] कार्यान्तरानुत्पादकघटादिरूपान्त्यावयविनोऽपीत्यर्थः

गुणाः स्युः ; न च तथा दृश्यन्ते । तस्मात् पूर्वापरभावेऽपि न पूर्वं कार्यं उत्तरकार्योपादानमित्यर्थः ॥ ११ ॥

प्रकाशस्यैव कार्यसामान्यारम्भकत्वम्

कारणं कार्यमंशोंऽशी जातिर्व्यक्ती गुणी गुणः ।
क्रिया क्रियावानित्याद्याः प्रकाशस्यैव कल्पनाः ॥ १२ ॥

ननु प्रकाशसन्मात्रस्य आकाशवदमूर्तस्य कथं कार्यारम्भकत्वमिति चेत्—न कथञ्चिदिति ब्रूमः । कथं तर्हि कारणत्वाभ्युपगमः इति चेत्—सर्वकल्पनारूपविवर्ताधिष्ठानत्वेन रज्ज्वा इव सर्पधारादि[1]कारणत्वमित्याह—कारणं कार्यमिति ॥ बीजं कारणं, अङ्कुरः कार्यं; पटः अंशी, तन्तवः अंशाः; गोत्वादिर्जातिः, सास्नादिमल्लक्षणाः पिण्डाः व्यक्तयः ; पटादिर्गुणी, रूपादिर्गुणः ; चलनं क्रिया, तदाश्रयत्वेनाभिमतः क्रियावान् बाणचक्रादिः ; आदिशब्दात्—विशेषो विशेषी, समवायः समवायी, विशेषणं विशेष्यं, सदृशः सादृश्यं इत्यादि गृह्यते । एताः कल्पनाः—व्यवहाराः प्रकाशस्यैव—सन्मात्रस्फुरणस्यैव विवर्तरूपा इत्यर्थः । आरम्भवादे वा, परिणामवादे वा, परमार्थतः कार्यकारणभावनिरूपणासम्भवात्, वादान्तरस्यातितुच्छत्वात् । तथा च—स्वप्रकाशचिद्रूपे चिदात्मनि मायाविजृम्भितं इदं सर्वमेव जगदित्यभिप्रायः ॥ १२ ॥

चेतनधर्मस्यैव जगन्मूलत्वम्

चैतन्यं परमाणूनां प्रधानस्यपि नेष्यते ।
ज्ञानक्रिये जगत्क्लृप्तौ दृश्येते चेतनाश्रये ॥ १३ ॥

नन्वेवमपि परमाणवो वा प्रधानं वा सत् चेतनं भविष्यति 'स य एषोऽ-

---

[1] धारा—जलधारा. आदिपदात् पुष्पमाल्यादिपरिग्रहः.

णिमैतदात्म्यमिदं सर्वं[1] 'तम आसीत्तमसा गूढम्'[2] इति च श्रुत्योः परमाणु-प्रधानयोः सर्वकारणत्वावगमादिति चेत्तत्राह—चैतन्यमिति ॥ नेष्यते वैशेषिकैः, साङ्ख्यैश्चेति शेषः। न युज्यते च; यतो जगत्कारणे ईक्षण-पूर्विका सृष्टिः श्रुतौ श्रूयते—'तदैक्षत'[3] इति। न च तत्तटस्थेश्वरस्य कर्तुः निमित्तभूतस्येति युक्तम्, 'बहुस्यां प्रजायेय'[3] इत्यात्मन एव बहुभवनाशंसन श्रवणात्।[4] एतेन च प्रधानपरमाण्वोरनात्मत्वाङ्गीकारादेवानुपपन्नमिति उदाहृते श्रुती न तद्विषये इति। ननु तवेश्वरः कूटस्थोऽभिमतः, तस्य कथं ज्ञातृत्वकर्तृत्वे स्यातामित्याशङ्क्य, ते अपि तस्यैव मायाशक्तियोगात् स्यातां नान्यस्येत्यभिप्रेत्याह—ज्ञानक्रिये इति ॥ अचेतने क्वाप्यनयोरदर्शनात्, चेतने कुलालादौ दर्शनात् जगत्स्रष्टावपि ते चेतनाश्रये एवाङ्गीकार्ये इत्यर्थः। तथाच जगत्कारणस्येश्वरस्य कार्यकारणोपाध्यावेशात् कुलालजीवस्येव[5] कार्य-कारणतत्संस्कारात्मकमायोपाध्यावेशात् ज्ञानक्रिये शक्ती भविष्यतः इत्युक्तम्। तथाच वैय्यासिकन्यायसूत्रं—'तथा च तक्षोभयथा'[6] इति ॥ १३ ॥

ज्ञानशक्तेरेव चेतनधर्मत्वम्

कालरूपक्रियाशक्त्या क्षीरात् परिणमेद्दधि।
ज्ञातृज्ञानज्ञेयरूपं ज्ञानशक्त्या भवेज्जगत् ॥ १४ ॥

---

[1] सः यः सदाख्य एष उक्तः अणुभावः जगतो मूलं एतेन सदाख्येन आत्मना आत्मवत्सर्वमिदं जगत्. छां. उ. 6. 8. 7.

[2] तै. ब्रा. 2. 8. 9. प्रकेतं—प्रकर्षेण ज्ञातुमशक्यम्. तथाच मनुः—'आसीदिदं तमोभूतं अप्रज्ञातमलक्षणम्, अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः' ॥ इति ॥

[3] छां. उ. 6. 2. [4] भवनश्रवणात्. क. [5] जीवस्यैव. घ. [6] ब्र. सू. 2. 3. 40. यथा च तक्षा वास्यादिकरणयुक्तः दुःखी भवति, स एव स्वगृहं प्राप्तः विश्रान्तः सन् स्वस्थो निर्वृतो भवति एवमेव आत्माऽपि तत्तदवस्थाभेदेन दुःखी सुखी च भवतीत्यर्थः.

ननु चेतननिरपेक्षमपि कार्यं जायमानं दृश्यते, यथा दुग्धं स्वयमेव दध्यात्मना परिणमते इति साङ्ख्यशङ्कामपाकरोति—कालरूपेति ॥ 'यः सर्वेषु भूतेषु तिष्ठन्'[1] इति श्रुतेः, सर्वगतस्यान्तर्यामिणः ईश्वरस्य या कालाख्या क्रियाशक्तिः तदधिष्ठितात् क्षीरात् दध्यात्मना परिणामः; न क्षीरस्वभावात्। तथासति सदा परिणामप्रसङ्गः इत्यर्थः। एतेन कालोऽपीश्वरस्यैव शक्त्याकारभेदः इति सूचितम्। तथाच श्रूयते—'पराऽस्य शक्तिर्विविधैव श्रूयते'[2] इति। इदानीं ज्ञानरूपां शक्तिं विविच्य तस्याः जगद्धेतुत्वमाह—ज्ञातृज्ञानेति। ज्ञानं नाम जगत्कर्तुरीक्षण[3]व्यवहारप्रवृत्तिक्षमा या[4] वृत्तिः साभासेत्युच्यते[5]। सा च स्वाश्रयस्य मायाशबळितस्य ज्ञातृत्वं सम्पादयति। स्वरूपतो ज्ञानात्मना वर्तते। ज्ञेयं च सृज्यं जगदवभासयन्ती तदाकाराकारिततया ज्ञेयरूपा च भवति। तथा च एवंविधया ज्ञानशक्त्या जगद्भवेदित्यर्थः ॥ १४ ॥

ज्ञानविभागः

ज्ञानं द्विधा वस्तुमात्रद्योतकं निर्विकल्पकम्।
सविकल्पं तु संज्ञादिद्योतकत्वादनेकधा ॥ १५ ॥
सङ्कल्पसंशयभ्रान्तिस्मृतिसादृश्यनिश्चयाः।
ऊहोऽनध्यवसायश्च तथाऽन्येऽनुभवा अपि ॥ १६ ॥

उक्तां ज्ञानशक्तिं सामान्यविशेषात्मना विभजते—ज्ञानं द्विधेति ॥ वस्तुमात्रद्योतकं 'बहु स्याम्'[6] इति सामान्याकारेण सृज्यसमस्तवस्तूल्ले-

---

1 बृ. उ. 3. 7. 15. 2 श्वेता. उ. 6. 5. 3 रीक्षणं. क. 4 प्रवृत्तिका माया. ख.
5 साभासोच्यते. क.

6 'सोऽकामयत, बहु स्यां प्रजायेयेति, स तपोऽतप्यत, स तपस्तप्त्वा, स इदं सर्वमसृजत, यदिदं किञ्च' इति पूर्णं वाक्यम्. नात्र पुत्रोत्पत्तेरिव अर्थान्तरविषयं बहुभवनम्, किन्तु—आत्मस्थानभिव्यक्तनामरूपाभिव्यक्तिरेव. अस्य च ज्ञानमयं तपः. तै. उ. 2. 6.

खीत्यर्थः। पुनः आकाशादिभूतभौतिकप्रकारेणानेकधा सृज्यार्थविशेषद्योतकत्वात्तदेव सविकल्पकत्वं संयातीति योजना॥ ज्ञानस्य स्वरूपतो भेदाभावेऽपि ज्ञेयाकारावभासनिबन्धनो भेदो भवतीत्यभिप्रेत्य द्योतकत्वादनेकधेत्युक्तम्। तत् लोकानुभवेन प्रपञ्चयत–सङ्कल्पेति॥ इदमिदानीं करिष्ये इत्येवमाकारा मनोवृत्तिः सङ्कल्पः। अनिर्धारितानेककोटिकं ज्ञानं संशयः। इदमनेन सदृशं इत्येवमाकारा वृत्तिः सादृश्यम्। ऊहः दृष्टसाधर्म्येण वैधर्म्येण वा अन्यस्योत्प्रेक्षा। अनध्यवसायाः दृश्यमानेऽपि वस्तुनि अनिश्चयमात्ररूपा वृत्तिः, यथा—किंनामायं वृक्षः इत्येवमाकारा। अन्ये प्रसिद्धार्थाः[1]। यथाऽयं विशेषः लोकदृष्टः, तथा अनुभवाः[2] अप्यन्ये यथार्थविषयाः प्रमारूपाः प्रत्यक्षादिभेदेनानेकविधा भवन्तीत्यर्थः॥ १६॥

प्रमाणसंख्याविकल्पाः

प्रत्यक्षमेकं चार्वाकाः कणादसुगतौ पुनः।
अनुमानं च तच्चापि साङ्ख्याश्शब्दंच ते अपि॥ १७॥
न्यायैकदेशिनोऽप्येवमुपमानं च केचन।
अर्थापत्त्या सहैतानि चत्वार्याह प्रभाकरः॥ १८॥
अभावषष्ठान्येतानि भाट्टाः वेदान्तिनस्तथा।
सम्भवैतिह्ययुक्तानि तानि पौराणिका जगुः॥ १९॥

तदेव वादिविप्रतिपत्त्युपन्यासेन विवृणोति—प्रत्यक्षमित्यादिना॥ चार्वाकाः[3]—दृष्टमात्रतत्त्वबुद्धयः[4], ते प्रत्यक्षमेवैकं इन्द्रियार्थसन्निकर्षोत्पन्नं

---

[1] अतस्मिन् तदिति प्रत्ययः भ्रान्तिः. अनुभूतविषयासंप्रमोषः स्मृतिः. बुद्धेः असाधारणवृत्तिविशेषः अध्यवसायो वा निश्चयः.

[2] विषयानुरूपा बुद्धिवृत्तिः अनुभव इत्युच्यते. अनुरूपभवनात्.

[3] चार्वी—आपातरमणीया वाक् येषां ते चार्वाकाः इति केचित्.

[4] स्थूलेन्द्रियमात्रदृष्टेति यावत्. आर्षज्ञानस्यापि सूक्ष्मेन्द्रियजन्यत्वात्.

यथार्थज्ञानं प्रत्यक्षमिति वदन्ति । कणादः—षट्पदार्थतत्त्ववादी, सुगतो बुद्धः क्षणिकज्ञानात्मवादी, तावेतौ अनुमानं-व्याप्तिपक्षधर्मताविशिष्टलिङ्गज्ञान-लक्षणम्, तच्चापि प्रत्यक्षमपीति द्वे प्रमाणे इच्छतः । साङ्ख्याः—पञ्चविंशतितत्त्ववादिनः, शब्दं-आप्तवाक्यलक्षणं प्रमाणं, ते अपि प्रत्यक्षानुमाने अपीति त्रीणि प्रमाणानीच्छन्ति ।[1] न्यायैकदेशिनोऽप्येवं त्रीण्येवेच्छन्ति । केचन नैयायिकाः—गौतमीयाः उपमानं च पूर्वोक्तत्रयापेक्षया चतुर्थं अतिदेशवाक्यार्थज्ञानसहकृतसादृश्यविशिष्टपिण्डज्ञानलक्षणं प्रमाणमिच्छन्ति । प्राभाकरः[2]—मीमांसकैकदेशी अनुपपद्यमानार्थदर्शनेन तदुपपादकमर्थान्तरकल्पनमर्थापत्तिरिति उक्तलक्षणार्थापत्त्या सह एतानि प्रत्यक्षादीनि चत्वारीति पञ्च प्रमाणान्याह । एतान्युक्तप्रमाणानि अभावाख्यं प्रमाणमनुपलब्धिलक्षणं षष्ठं येषां तानि एवं षट्प्रमाणानीति भाट्टमतानुसारिणो मीमांसकाः । तथा वेदान्तिनोऽपि व्यवहारकाले आहुरिति योज्यम् । तान्युक्तानि षट्प्रमाणानि सम्भवैतिह्याभ्यां युक्तानि अष्टौ प्रमाणानि इति पौराणिकाः जगुः । सम्भवो नाम—खार्यां द्रोणाढकसम्भावनोपनायकं मानम्, ऐतिह्यं तु—अस्मिन् वटे यक्षोऽस्तीत्युपदेशपरम्परामात्रजन्यं ज्ञानमिति भेदः[3] ॥ १९ ॥

वैशेषिकमताङ्गीकृताः पदार्थाः

द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।
समवायं च काणादाः पदार्थान् षट् प्रचक्षते ॥ २० ॥

---

[1] लौकिकालौकिकभेदेन प्रमाणं द्विधा विभज्य, प्रत्यक्षादीनि त्रीणि लौकिकानीति, आर्षविज्ञानं अलौकिकमिति च सांख्याः प्राहुः. धर्मशास्त्रेष्वपि मानुषदैवभेदेन प्रमाणद्वैविध्यं अङ्गीकृतम्.

[2] प्रभाकरः. क. [3] चेष्टाऽप्यतिरिक्तं प्रमाणमिति तान्त्रिकाः इत्यपि योज्यम्. अत्रेदं बोध्यम्—येन साधनेन प्रमाता अर्थं प्रमिणोति तत् प्रमाणम्. मतभेदास्तु—प्रमायाः करणम्, अविसंवादिविज्ञानम्, अज्ञातचरतत्त्वार्थनिश्चायकम्, प्रमेयव्याप्तम्, प्रमानियतसामग्री इत्यादयः.

प्रमाणेषु वादिनां तत्त्वभेदे विप्रतिपत्तिमुक्त्वा, तत्प्रसङ्गेन तेषां प्रमेयतत्त्वविप्रतिपत्तीः दर्शयन्[1] आदौ वैशेषिकमतमुपन्यस्यति—द्रव्यमित्यादिना ॥ गुणवच्च द्रव्यम् । जातिमात्राश्रयत्वे सत्यस्पन्दात्मा गुणः । चलनात्मकं कर्म । नित्यमनेकानुवृत्ति सामान्यम् । नित्यद्रव्यमात्राश्रिताः विशेषाः नित्यसम्बन्धः समवायः । एवंलक्षणभेदभिन्नान् षट्पदार्थान् काणादाः प्रचक्षते इत्यर्थः ॥ २० ।

तत्र द्रव्यविभागः

नव द्रव्याणि भूतानि दिक्कालात्ममनांसि च ।

तत्र द्रव्याणि भिनत्ति—नवेति ॥ भूतानि पृथिव्यादीनि पञ्च, दिक्कालात्ममनांसि चत्वारि, एवमेतानि नव द्रव्याणीत्यर्थः ।

गुणविभागः

चतुर्विंशतिरेव स्युः गुणाः शब्दादिपञ्चकम् ॥ २१ ॥
परिमाणं च सङ्ख्या च द्वौ संयोगविभागकौ ।
स्वभावतः पृथक्त्वं च गुरुत्वं द्रवता पुनः ॥ २२ ॥
परत्वं चापरत्वं च स्नेहः संस्कार इत्यपि ।
धीर्द्वेषसुखदुःखेच्छाधर्माधर्मप्रयत्नकाः ॥ २३ ॥

गुणान् भिनत्ति— चतुर्विंशतिरेव स्युर्गुणा इति । तानेव विभजते—शब्दादीति । आदिपदेन स्पर्शरूपरसगन्धाः गृह्यन्ते । परिमाणं-अणुः ह्रस्वं महत् दीर्घमिति चतुर्विधम् । सङ्ख्या—एकत्वादिलक्षणा । संयोगो विभागश्चेति द्वौ । पृथक्त्वं—पृथग्व्यवहारासाधारणकारणं द्रव्यगतम् । सोऽप्येको गुणः । तस्य 'स्वभावतः' इति अधिका वाक्[2], आकाशादेः उपाधिप्रयुक्तभेदवतोऽपि न स्वप्रतियोगिकभेदान्तरमस्तीति दर्शयितुम् । गुरुत्व-

---

[1] विप्रतिपत्तिं दर्शयन्. क.   [2] अधिकालापः. क.

द्रवत्वे प्रसिद्धे। परत्वमपरत्वं चेति द्वौ गुणौ। स्नेहः अपामसाधारणो गुणः। संस्काराख्यो गुणः अपरः। धीः—बुद्धिः। द्वेषः—असहिष्णुता-लक्षणः आत्मगुणविशेषः। सुखदुःखेच्छाः प्रसिद्धाः। धर्मः—विहितक्रिया-जन्यः अतीन्द्रियो गुणः। अधर्मः—प्रतिषिद्धक्रियाजन्यः तादृशः। प्रयत्नः—उत्साहः। इति चतुर्विंशतिः गुणाः॥ २३॥

तेषु गुणेषु संस्कारनिरूपणम्

संस्कारस्त्रिविधः, वेग इष्वादेर्गतिकारणम्।
दृष्टश्रुतानुभूतार्थस्मृतिहेतुश्च भावना॥ २४॥
स्थितस्थापकता नाम पूर्ववत् स्थितिकारणम्।
आकृष्टशाखाभूर्जादौ स्पष्टमेवोपलक्ष्यते॥ २५॥

एतेषु संस्काराख्यं गुणं विभज्य उदाहरणेन प्रत्याययति—संस्कारस्त्रिविधः इति॥ धनुर्मुक्तेष्वादेः[1] गतिकारणं गुणः वेगाख्यः संस्कार इत्यर्थः। दृष्टमित्यनुमानादेरुपलक्षणम्। दृष्टश्रुताभ्यामनुभूतार्थविषयस्मृतिहेतुर्गुणो भावनेत्यर्थः। स्थितस्थापकतेति स्पष्टार्थः॥ २५॥

कर्मविभागः

उत्क्षेपणमवक्षेपः गमनं च प्रसारणम्।
आकुञ्चनमिति प्राहुः कर्म पञ्चविधं बुधाः[2]॥ २६॥

कर्मविभागग्रन्थोऽपि स्पष्टार्थः॥ २६॥

सामान्यविभागः

सामान्यं द्विविधं प्रोक्तं परं चापरमेव च।
परं सत्तैव सर्वत्र तदनुस्यूतवर्तनम्॥ २७॥
द्रव्यत्वगुणतेत्यादि सामान्यमपरं तथा।

---

[1] धनुर्मुक्तस्य इष्वादेरित्यर्थः. [2] भ्रमणादीनां सर्वेषामपि कर्मणां गमने एवान्तर्भावः इत्येषां मतम्.

सामान्यं विभज्य व्याचष्टे—सामान्यमित्यादिना। सत्तायाः परत्वं नाम व्यापकत्वमित्यभिप्रेत्याह तदनुस्यूतवर्तनमिति॥

विशेषनिरूपणम्

विशेषाः स्युरनन्तास्ते व्यावृत्तिज्ञानहेतवः[1] ॥ २८ ॥

विशेषाः स्युः इति च स्पष्टम् ॥ २८ ॥

समवायस्वरूपम्

रूपस्येव घटे नित्यः सम्बन्धः समवायकः[2] ।

नित्यः सम्बन्धः समवायकः इति स्वार्थे तद्धितः। तस्योदाहरणं—रूपस्येव घटे इति॥

द्रव्येषु नित्यानां परिगणनम्

कालाकाशदिगात्मानो नित्याश्च विभवश्च ते[3] ॥ २९ ॥
चतुर्विधाः परिच्छिन्नाः नित्याश्च परमाणवः ।

उक्तानां नवानां द्रव्याणां नित्यानित्यविभागमाह—कालेति॥

वैशेषिकमतनिगमनम्

इति वैशेषिकमते पदार्थाः षट् प्रकीर्तिताः ॥ ३० ॥

वैशेषिककल्पनां संक्षेपत उपन्यस्य उपसंहरति—इति वैशेषिकेति ॥ ३० ॥

---

[1] घटादीनां सावयवपदार्थानां पटादिभ्यो भेदकं कपालसमवेतत्वादिकमेव, परमाणूनां तु निरवयवत्वात् भेदकः विशेषः अङ्गीकार्य एव, अन्यथा समानजातिगुणकर्मवतां परमाणूनां भेदकाभावे मिथोऽव्यावृत्तिबुद्धेः अजननात् ज्ञानसंकरः स्याद्योगिनामपि इति तेषां भावः.

[2] जात्यादिगोचरो विशिष्टव्यवहारः संबन्धनियतः भावमात्रविषयाबाधितविशिष्टव्यवहारत्वात्, सघटं भूतलं इति व्यवहारवत् इत्यनुमानेन समवायसिद्धिः.

[3] प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं नित्यत्वम्. सर्वगतत्वं, परममहत्परिमाणवत्त्वं, मूर्तेतरद्रव्यत्वं, सर्वमूर्तद्रव्यसंयोगित्वं वा विभुत्वम्.

सेश्वरसांख्यमतनिरूपणम्, तत्र प्रकृतिपर्यायाः

माया प्रधानमव्यक्तमविद्याऽज्ञानमक्षरम् ।
अव्याकृतं च प्रकृतिः तम इत्यभिधीयते[1] ॥ ३१ ॥

इदानीं साङ्ख्यप्रक्रियां सेश्वरामुपन्यस्यति—मायाप्रधानमित्यादिना ॥ मायादिशब्दैः मूलप्रकृतिरभिधीयते श्रुतिस्मृतिपुराणेष्वित्यर्थः ॥

महत्कालपुरुषाहङ्कारतत्त्वानि

मायायां ब्रह्मचैतन्यप्रतिबिम्बानुषङ्गतः ।
महत्कालपुमांसः स्युः महत्तत्त्वादहङ्कृतिः ॥ ३२ ॥

मायायां ब्रह्मचैतन्यस्य मायाधिष्ठातुरीश्वरचैतन्यस्य यः प्रतिबिम्बः सङ्क्रमः तदनुषङ्गतः तत्संसर्गमहिम्ना महत्तत्त्वं कालः पुमानिति त्रयः पदार्थाः स्युः—जायन्ते इत्यर्थः । कालः—गुणक्षोभकः । पुमान्—कार्योपाधिः जीवः । तत्र कालः ब्रह्मचैतन्यस्यावस्थाविशेषः प्रकृतिसमावेशकृतः । जीवः संसारी पुमान् स्वतन्त्रोऽनादिरपि महत्तत्त्वं प्रकृतेः प्रथमविकारमुपष्टभ्य[2] भोक्तृत्वेनोत्थितः इत्यर्थः । महत्तत्त्वात् अहङ्कृतिः—अहङ्कारो जायते इति शेषः ।

तामसाहंकाराकार्याणि

तामसात् स्युरहङ्कारात् खानिलाग्निजलभूमयः ।

सोहङ्कारस्त्रिविधः—तामसः सात्त्विको राजसश्च ।[3] तत्र तामसादहङ्कारात् खादयः सूक्ष्मभूतविकल्पाः[4] स्युरित्यर्थः ॥

शब्दः स्पर्शश्च रूपं च रसो गन्धोऽप्यनुक्रमात् ॥ ३३ ॥
इन्द्रियाणां च विषयाः भूतानामपि ते गुणाः ।

---

[1] देवीभागवते नवमस्कन्धे प्रथमाध्याये एषां पर्यायाणां विवरणं द्रष्टव्यम् .

[2] मवष्टभ्य. क. [3] राजसश्चेति. ख. [4] विकल्पपदं जातिगुणक्रियायोगिद्रव्य-परं बोध्यम् .

खादीनां साहङ्कारिकाणां स्वरूपं क्रमेणाह—शब्दः स्पर्शश्चेति ॥ ते शब्दादयः इन्द्रियाणां विषयाः भूतानामपि महतां गुणा भवन्तीत्यर्थः ॥

देवाः सदाशिवश्चेशः रुद्रो विष्णुश्चतुर्मुखः ॥ ३४ ॥

उक्तानां भूतसूक्ष्माणामधिष्ठातृदेवानाह—देवाः इति ॥ यथाक्रममेते योज्याः ॥ ३४ ॥

सात्त्विकाहङ्कारकार्याणि

सात्त्विकात् स्यादहङ्कारात् अन्तःकरणधीन्द्रियम् ।
मनो बुद्धिरहङ्कारश्चित्तं करणमान्तरम् ॥ ३५ ॥

सात्त्विकाहङ्कारकार्यमाह—सात्त्विकादिति ॥ धीन्द्रियं—बुद्धीन्द्रियम् । अन्तःकरणानि धीन्द्रियाणि चेत्यन्तःकरणधीन्द्रियमिति योजना । अन्तःकरणानि विभजते—मनोबुद्धिरिति ॥ ३५ ॥

संशयो निश्चयो गर्वः स्मरणं विषयाः अमी ।
चन्द्रः प्रजापती रुद्रः क्षेत्रज्ञ इति देवताः ॥ ३६ ॥

तेषां विषयान् क्रमेण निर्दिशन् तत्तद्विषयसाधनत्वं तेषां लक्षणं सूचयति—संशयः इति ॥ चतुर्णामन्तःकरणानां देवताः क्रमेणाह—चन्द्रः इत्यादिना ॥ ३६ ॥

श्रोत्रं त्वक् चक्षुषी जिह्वा घ्राणं ज्ञानेन्द्रियं त्रिदुः ।
दिग्वातसूर्यवरुणाः नासत्यौ देवताः स्मृताः[1] ॥ ३७ ॥

बुद्धीन्द्रियाणि विभजते—श्रोत्रमिति ॥ एषामपि क्रमेण देवताः आह—दिगिति ॥ ३७ ॥

---

[1] वरुणनासत्या इति देवताः. क.

राजसाहङ्कारकार्याणि

राजसात् स्युरहङ्कारात् कर्मेन्द्रियसमीरणाः ।
कर्मेन्द्रियाणि वाक् पाणिः पादः पायुरुपस्थकम् ॥ ३८ ॥
वचनादानगमनविसर्गानन्दसंज्ञकाः ।
विषया देवतास्तेषां वह्नीन्द्रोपेन्द्रमृत्युकाः ॥ ३९ ॥

राजसाहङ्कारकार्यमाह—राजसादिति ॥ कर्मेन्द्रियाणि च समीरणश्चेति विग्रहः । कर्मेन्द्रियाणि सविषयाणि विभजते—कर्मेन्द्रियणीति । तेषां देवताः आह—देवता इति । विषयाः इत्येतावानंशः पूर्वेण सम्बध्यते, शेषः उत्तरेण ॥ ३९ ॥

पञ्च वायवः

प्राणोऽपानस्समानश्चोदानव्यानौ च वायवः ।

इदानीं समीरणान् विभजते—प्राणोऽपान इति ॥

सांख्यमतनिगमनम्

भूतैस्तु पञ्चभिः प्राणैः चतुर्दशभिरिन्द्रियैः ॥ ४० ॥
चतुर्विंशतितत्त्वानि साङ्ख्य[1]शास्त्रविदो विदुः ।

एषां प्रचयशिष्टसङ्ख्यामनुक्रामन्[2] उक्तमुपसंहरति—भूतैस्त्विति ॥ अस्य मते मायाब्रह्मादीनां तन्मात्रान्तानां कारणत्वेनानुगमात् न पृथक्तया गणनेति द्रष्टव्यम् । अनेनानीश्वरसाङ्ख्यमतमप्यर्थादुक्तं वेदितव्यम् । तत्रेयान् विशेषः—मूलप्रकृतिः स्वतन्त्रा । विकृतयश्च महदाद्याः सप्त प्रकृतिविकृत्यात्मकाः । तत्र सात्विकाहङ्कारादन्तःकरणं सर्वाणि ज्ञानेद्रियाणि च जायन्ते, राजसात् कर्मेद्रियाणि, तामसात् पञ्च तन्मात्राणि, तेभ्यः पञ्च महाभूतानि । प्राणास्तु

[1] शुद्धात्मतत्त्वविज्ञानं सांख्यमित्यभिधीयते इति तु सांख्यपदपरमार्थः.

[2] प्रचयः—समूहः.

न तत्त्वान्तरं, किन्त्विन्द्रियाणां साधारणवृत्तयः । पुरुषाः अनन्ताः न प्रकृतयो न विकृतयः । कस्यचित् कालश्च भूतं भवद्भविष्यदिति व्यवह्रियमाणपदार्थव्यतिरेकेण न स्वतन्त्रोऽस्तीति । तथा च मूलप्रकृतिरेका, प्रकृतिविकृत्यात्मकाः सप्त महदादयः, एकादशेन्द्रियाणि पञ्च महाभूतानि चेति षोडश विकाराः इति चतुर्विंशतितत्त्वानि पुरुषः पञ्चविंशकः इति तेषां मतम् ॥

पौराणिकमतनिरूपणम्

महान् कालः प्रधानं च मायाऽविद्ये च पूरुषः ॥ ४१ ॥
इति पौराणिकाः प्राहुः त्रिंशत्तत्त्वानि तैस्सह ।

इदानीं पौराणिकमतमाह—महान् काल इति । महान् प्रकृतेराद्यो विकारः । प्रधानं मूलप्रकृतिः । स्वाश्रयमव्यामोहयन्ती कर्तुरिच्छामनुसरन्ती माया, तद्विपरीता त्वविद्येति भेदः । कालपूरुषौ व्याख्यातौ । यद्वा—काल ईश्वरस्य चेष्टा । तथा चोक्तं—

'योऽयं कालस्तस्य तेऽव्यक्तबन्धो !
चेष्टामाहुश्चेष्टते येन विश्वम्'[1] इति ।

अव्यक्तं—प्रधानं, तस्य बन्धुः—प्रवर्तकः अव्यक्तबन्धुः, तस्य सम्बोधनं अव्यक्तबन्धो! इति । पुरुषः परमात्मनोंऽशः । तदप्युक्तं—

'एकस्यैव ममांशस्य जीवस्यैव महामते' इति,
'ममैवांशो जीवलोके जीवभूतस्सनातनः ।'[2] इति च

एतैः षड्भिः पूर्वोक्तैश्चतुर्विंशतितत्त्वैश्च सह त्रिंशत्तत्त्वानि पौराणिकाः प्राहुरित्यर्थः ॥

---

[1] विष्णुपुराणे. 4. 2. [2] भगवद्गीता. 15. 7.

शैवमतनिरूपणम्

बिन्दुनादौ शक्तिशिवौ शान्तातीतौ ततः परम् ॥ ४२ ॥
षट्त्रिंशत्तत्त्वमित्युक्तं शैवागमविशारदैः ।

शैवमतमाह—बिन्दुनादाविति ॥ बिन्दुः—सर्वाधिष्ठानं सदाशिवाख्यं निर्गुणं तत्त्वम् । नादः—तस्यैव प्रणवात्मना सर्वार्थस्फोरकत्वेनाभिव्यक्तं स्वरूपान्तरम् । शक्तिः—मायाऽविद्याभ्यामन्या सर्वाधिष्ठानसामर्थ्यम् । शिवः—शक्तिमानीश्वरो लीलाविग्रहधारी । शान्तातीतौ तस्यैवावस्थाविशेषौ । तथा च श्रुतिः—'तस्यैते तनुवौ घोराऽन्या शिवाऽन्या'[1] इति । ततः पूर्वोक्तत्रिंशत्तत्त्वात् परं एतैः षट्त्रिंशत्तत्त्वमिति शैवागमविशारदैरुक्तमिति योजना । शैवागमविशारदग्रहणेनास्याः कल्पनायाः मूलमिदं सूच्यते ॥

सर्वेषामपि विकल्पानां मायाविलासरूपत्वम्

सर्वे विकल्पाः प्रागासन् बीजेऽङ्कुर इवात्मनि ॥ ४३ ॥
इच्छाज्ञानक्रियारूपमायया ते विजृम्भिताः ।

किं बहुना—यैः तैर्थिकैः ये विकल्पाः कृताः ते सर्वे एकस्यैव परब्रह्मणो मायाविलासाः, न परमार्थाः, इति 'बीजस्यान्तरिवाङ्कुरः' इत्यनेनोच्यते इति श्रौतं मतमनुसरति—सर्वे विकल्पाः इति ॥ क्रिया—प्रयत्नः । इच्छादिभिर्निरूप्यत इति तथा । यथा कश्चित् कविः काव्यमिच्छया प्रमेयं कल्पयित्वा विचारयति, तथा ईश्वरोऽपि तत्तदृष्यादिरूपमास्थाय तत्तदागमनिर्माणं करोति । किंचित् ज्ञानात् यथादृष्टं लोके वेदे चानुसन्धाय—करोति, यथा—वेदव्यासादिरूपेण महाभारतादीन् ग्रन्थान् । किंचित् प्रयत्नेनापि—यथा महाराजादिरूपेण महानगरदुर्गादि कल्पयति, स एवेश्वरः । तथा मायया सहजशक्तिरूपया अनिर्वचनीयया ते पूर्वोक्ताः कल्पनाप्रकाराः

---

[1] तैत्तिरीयसंहिता. 5. 7. 3.

तेनेश्वरेण विजृम्भिताः प्रकटिताः, न परमार्थाः इत्यर्थः । यैर्यथा वर्णितं जगत्तत्त्वं तथैव चेत् परमार्थं, तर्हि वादिनां विवादो न स्यात्; दृश्यते च सः, इत्यतो न परमार्थकल्पनेति भावः । विमतं प्रागुत्पत्तेः नेश्वरात् परमार्थतः पृथक् सत्, ततोऽत्यन्ताविविक्तलक्षणत्वात्; यदेवं तदेवं यथा बीजावस्थोऽङ्कुरः इति ॥

जगद्ब्रह्मणोरैक्यम् सार्वकालिकम्

इच्छाज्ञानक्रियापूर्वाः यस्मात् सर्वाः प्रवृत्तयः ॥ ४४ ॥
सर्वेऽपि जन्तवः तस्मात् ईश्वरा इति निश्चिताः ।

ईश्वराज्जगतः पृथक्त्वाभावं उत्पत्तेः प्रागवस्थायामुपपाद्य, स्थित्यवस्थायामपि तदुपपादयति—इच्छाज्ञानेति । यस्मात् सर्वेषां सर्वाः प्रवृत्तयः इच्छाज्ञानक्रियापूर्वाः तस्मात् सर्वेऽपि जन्तवः ईश्वरा एव निश्चिताः, इच्छाज्ञानप्रयत्नानां मायाशबलितादीश्वराख्यादन्यत्राचेतनेष्वनुपपत्तेः, परोपाधिभेद[1]परामर्शमन्तरेण स्वतश्चेतनभेदे प्रमाणाभावात् सर्वजन्तूनां सिद्धमीश्वरादभिन्नत्वम् । तथा च तद्गतेच्छादेर्मायामयत्वात् तन्निमित्तस्य सर्वस्यापि प्रपञ्चस्य युक्तं मायामयत्वमिति भावः ॥

इच्छामात्रं प्रभोः सृष्टिसंहारौ

बीजाद्वृक्षः तरोर्बीजं पारम्पर्येण जायते ॥ ४५ ॥
इतिशङ्कानिवृत्त्यर्थं योगिदृष्टान्तकीर्तनम् ।
विश्वामित्रादयः पूर्वे परिपक्वसमाधयः ॥ ४६ ॥
उपादानोपकरणप्रयोजनविवर्जिताः ।
स्वेच्छया ससृजुः स्वर्गं सर्वभोगोपबृंहितम् ॥ ४७ ॥

---

[1] 'भेद' इति नास्ति. ख.

ईश्वरोऽनन्तशक्तित्वात् स्वतन्त्रोऽन्यानपेक्षतः ।
स्वेच्छामात्रेण सकलं सृजत्यवति हन्ति च ॥ ४८ ॥

ननु बीजाङ्कुरयोरिव जगदीश्वरयोः यदि कार्यकारणता तदा वृक्षबीजव्यक्त्यानन्त्यवत् ईश्वरजगद्व्यक्त्यानन्त्यं भवेत्; तच्चानिष्टं 'न जायते म्रियते वा विपश्चित्'[1] 'अविकार्योऽयमुच्यते'[2] । इति श्रुतिस्मृतिविरोधात्; तस्मादयं दृष्टान्तोऽनुपपन्नः इत्याशङ्कामुद्भाव्य योगिदृष्टान्तेन प्रत्याचष्टे—बीजादिति ॥ योगिदृष्टान्ततात्पर्यमुदाहरणेन स्पष्टयति—विश्वामित्रादयः इति ॥ दृष्टान्तदार्ष्टान्तिकश्लोकार्थः स्पष्टः ॥ ४८ ॥

ईश्वरनिष्ठकर्तृत्वज्ञातृत्ववैशिष्ट्यम्

न कारकाणां व्यापारात् कर्ता स्यान्नित्य ईश्वरः ।
नापि प्रमाणव्यापाराद् ज्ञाताऽसौ स्वप्रकाशकः ॥ ४९ ॥

निर्व्यापारः कथमीश्वरः सृष्टिस्थितिसंहारान् कुर्यात्? इत्याशङ्क्याह—न कारकाणामिति ॥ कारकव्यापारयितृत्वं हि विकारः[3] । सः ईश्वरे नास्ति, विकारिणोऽनित्यत्वात्, ईश्वरस्य च नित्यत्वात् । किन्तु, सन्निधिसत्तामात्रेण राजादिवदयस्कान्तादिवद्वा निर्व्यापार एव कारकप्रयोक्ता कर्ता चेत्यर्थः । तथेश्वरस्य ज्ञातृत्वमपि लोकविलक्षणं व्यापारानपेक्षमित्याह—नापीति । स्वप्रकाशकः इति हेतुगर्भं विशेषणम् ॥ ४९ ॥

ज्ञातृत्वमपि कर्तृत्वं स्वातन्त्र्यं तस्य केवलम् ।
या चेच्छाशक्तिवैचित्री साऽस्य स्वच्छन्दकारिता ॥ ५० ॥

---

[1] 'नायं कुतश्चिन्न बभूव कश्चित्, अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे' इति शेषभागः ॥ अविपरिप्लुतचैतन्यस्वभावो मेधावी विपश्चित् इत्युच्यते. कठोपनिषत् . 2. 18. [2] अव्यक्तोऽयमचिन्त्योऽयं इत्यादिः. गीता. 2. 25. [3] अयमेव—जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यतीति यास्कोक्त षड्भावविकारपदेनाप्युच्यते.

उपसंहरति—ज्ञातृत्वमिति ।। स्वातन्त्र्यं—परानपेक्षमित्यर्थः । केवलं—स्वगतविकारानपेक्षमित्यर्थः । इच्छाशक्तिरपीश्वरस्य परानपेक्षा अप्रतिहता चेति कथयति—या चेति ।। ५० ।।

यया कर्तुं न वा कर्तुं[1] अन्यथा कर्तुमर्हति ।
स्वतन्त्रामीश्वरेच्छां के परिच्छेत्तुमिहेशते[2] ।। ५१ ।।

स्वच्छन्दकारित्वमेव विशदयति—ययेति ।। ५१ ।।

श्रुतिश्च[3] सोऽकामयतेतीच्छया सृष्टिमीशितुः ।
तस्मादात्मन आकाशस्सम्भूत[4] इति चाब्रवीत् ।। ५२ ।।

ईश्वरस्येच्छापूर्वक एव जगत्सृष्ट्यादिव्यापारः इत्यत्र प्रमाणमाह—श्रुतिश्चेति ।। ५२ ।।

ईश्वरस्य निमित्तकारणत्वनिराकरणम्

निमित्तं चेद्भवेदस्य जगतः परमेश्वरः ।
विकारित्वं विनाशित्वं भवेदस्य कुलालवत् ।। ५३ ।।

तदेवं स्वात्मनि स्थिते तत्त्वान्यत्वाभ्यामनिर्वचनीये नामरूपे स्वमायावेशवशात् व्याकुर्वन् ईश्वरो जगतः उपादानं निमित्तं वा अविकारितया मायावीव महायोगीवेति च दृष्टान्ताभ्यां स्वमतमुपपादितम् । तच्च सर्वशास्त्रोपनिषदेकवाक्यतोपनिबद्धत्वात् अर्वाचीनलौकिकप्रमाणाबाध्यमेवेति सिद्धमेव तस्य प्राबल्यम् । इदानीं तटस्थत्वमीश्वरस्य कुलालस्येव निमित्तत्वमिति मते दूषणमाह—निमित्तं चेदिति ।। अस्य जगतः परमाणूपादानकस्य निमित्तं कर्ता चेदीश्वरः कुलालवात् भवेत् परमार्थतः, तदा विकारित्वं क्रियावत्त्वम् तस्य प्रसज्येत । न हि स्वयं क्रियाहीनः अन्यं विकारयितुमीष्टे । क्रियावत्त्वे च शरीरित्वाद्विनाशित्वमवश्यं भवेत् । न हि विक्रियमाणं च नित्यं

---

[1] कर्तुमथाकर्तुं· क. [2] कःपरिच्छेत्तुमीहते· क. [3] तै. उ. 2.6. [4] तै. उ. 2.1.1.

चेत्यत्रोदाहरणमस्ति ।[1] तस्मात् परमार्थतः कर्तृत्वे विकारित्वादिदोषप्रसङ्गो दुर्वारः इत्यभिप्रायः ।। ५३ ।।

ईश्वरस्य नित्यज्ञानेच्छादिनिराकरणम्

बुद्ध्यादयो नव गुणाः नित्या एवेश्वरस्य चेत् ।
नित्येच्छावान् जगत्सृष्टौ प्रवर्तेतैव सर्वदा ।। ५४ ।।
प्रवृत्त्युपरमाभावात् संसारो नैव नश्यति ।
मोक्षोपदेशो व्यर्थः स्यात् आगमोऽपि निरर्थकः ।। ५५ ।।

भगवतः ईश्वरस्य नित्यज्ञानेच्छादिमत्त्वस्य धर्मिग्राहकप्रमाणसिद्धत्वात् तेन च शरीरवैलक्षण्यसिद्धेः नोक्तदोषावकाशः इति चेत् तत्राह—बुद्ध्यादयः इति ।। नव गुणाः इति जीवात्माभिप्रायम् । तेषामपीश्वरेण जगत्सर्गादौ उपादीयमानत्वात् ईश्वरस्येत्युक्तम् । यद्वा—तत्तद्द्रव्योपाधौ यावन्तो गुणाः यस्य द्रव्यस्य निर्दिष्टाः ते तद्द्रव्यव्यक्तिषु सर्वासु समा एव, यथा पृथिव्याः—चतुर्दश गुणाः सर्वपृथिवीव्यक्तिषु तावन्तो न न्यूनाः नाप्यधिकाः, तथा आत्मत्वावच्छिन्नात्मद्रव्यस्यापि आत्मत्वोपाधौ सर्वत्र चतुर्दशगुणविशेषवत्तया भवितव्यम् । तथा च ईश्वरस्याप्यात्मद्रव्यान्तःपातित्वात्, बुद्ध्यादयो नव विशेषगुणाः स्युरित्यापाद्यवचनमेतद्द्रष्टव्यम् । ते चेदीश्वरस्य नित्याः निरपेक्षाश्च, तदा दोषं प्रसञ्जयति—नित्येच्छावानिति ।। ५४ ।।

अस्तु तर्हि सर्वदा प्रवृत्तिः, ततः किं स्यादित्यत आह—प्रवृत्तीति ।। माऽस्तु संसारनाशः, तत्राह—मोक्षोपदेशः इति । न केवलं मोक्षोपदेशवैयर्थ्यमात्रं, शास्त्रप्रणयनं च निरर्थकं स्यादित्याह—आगमोऽपि निरर्थकः इति ।। ५५ ।।

---

[1] चेति मां प्रत्युदाहरणमस्ति. क.

निगमनम्

तस्मान्मायाविलासोऽयं जगत्कर्तृत्वमीशितुः ।
बन्धमोक्षोपदेशादिव्यवहारोऽपि मायया ।। ५६ ।।

परमते दुष्टत्वे ज्ञापिते, स्वमतं तेन न बाध्यं सिद्धमित्युपसंहरति—तस्मादिति ।। अस्मन्मते बन्धादेरपि मायिकत्वात् मोक्षोपदेशोऽपि मायिक एवाभ्युपगम्यते । तस्य स्वरूपतो मायिकत्वेऽपि तस्यार्थविषयत्वात् अस्मन्मोक्षशास्त्रस्य प्रामाण्यमारोपितं वर्णदैर्घ्यादिवत् न विरुध्यते इति सर्वमवदातम् ।। ५६ ।।

द्वितीयश्लोकार्थोपसंहारः

इति श्रीदक्षिणामूर्तिस्तोत्रार्थप्रतिपादके ।
प्रबन्धे मानसोल्लासे द्वितीयोल्लाससङ्ग्रहः ।। ५७ ।।

द्वितीयश्लोकव्याख्यामुपसंहरति— इतीति ।। ५७ ।।

इति श्रीमानसोल्लासे वृत्तान्ते च द्वितीयोल्लासः.

—o—

अथ तृतीयः उल्लासः

मूलाज्ञाननिवृत्तेरेव सकलविध-
संसृतिभयनाशकत्वम्

यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थकं भासते

दृश्यधर्माणां द्रष्टृधर्मत्वानुपपत्तिप्रश्नः

सत्तास्फुरत्ते भावेषु कुत आगत्य सङ्गते ।
बिम्बादिदर्पणन्यायादित्थं पृच्छन् प्रबोध्यते ॥ १ ॥

सर्वार्थद्रष्टृत्वेनोपलक्षितः चिदात्मा त्वंपदार्थः इति प्रथमश्लोकार्थः, सर्वं जगत् स्वात्मन्यापीय स्वयमेव विश्वं स्वमायया विजृम्भयन् सर्वानुस्यूतसदात्मत्वेनोपलक्षितः चिदात्मा तत्पदार्थः इति द्वितीयश्लोकार्थः—इति तात्पर्यमुपवर्ण्य, इदानीं पदार्थद्वयैक्यवाक्यार्थप्रकाशनपरं तृतीयश्लोकं व्याख्यातुं प्रश्नानुत्थापयति—सत्तास्फुरत्ते इति ॥ यदुक्तं सत्तास्फुरत्ते न दृश्यधर्मः किन्तु द्रष्टृधर्माविति, तत्रेदं पृच्छामि—यदि दृश्येषु ते न स्तः, कथं तर्हि तेषूपलभ्येते? इति द्रष्टृनिष्ठे एव सति भासेते इति चेत् तर्हि किं दर्पणादाविव मुखादिदृश्येषु प्रतिबिम्बभावमाचरतः? इति । एतच्च नोपपद्यते, अमूर्तयोः तयोः प्रतिबिम्बभावानुपपत्तेः । अत एव च अयःपिण्डादावग्नेरिव सङ्क्रमोऽप्यनुपपन्नः । अतः कथं सर्वसत्तास्फुरणरूपं ब्रह्मात्मेति पृच्छन् शिष्यो निषिध्यते उत्तरश्लोकेनेत्यर्थः ॥ १ ॥

यस्यैव—चिदात्मनः एव स्फुरणं—स्वरूपप्रकाशः सदात्मकं—सन्मात्रं सदा सर्वानुस्यूतं भासते स्वयमेव स्फुरति सच्चिदात्मा दक्षिणामूर्तिः तस्मै नमः इत्यन्वयः । स्फुरणविशेषणं असत्कल्पार्थकमिति, असत्तुल्यो नात्यन्तमसन्नेवार्थो विषयो यस्य तत्तथा, अनिर्वचनीयविषयाकारमित्यर्थः । न तु विषयो

भासमानस्सन्, आगमापायित्वात् शुक्तिरजतवत्; अपरोक्षप्रतिभासात् अर्थ-क्रियाकारित्वाच्च मायाविनिर्मितनद्यादिवदित्यर्थः। तथा च विषयाणां चिदात्मव्यतिरेकेण स्वरूपानिरूपणाच्चिदात्मनि मायाकल्पितान् विषयाकारान् दृग्दृश्यादिविवेकज्ञानेनाभिभूय स्वयमद्वयं प्रत्यस्तमितसमस्तविशेषाकारमात्मान-मनुभवन् तत्त्वमसीति वेदवचसा यः आश्रितान् उपासकान् आत्मजिज्ञासून् साक्षात् बोधयति तस्मै श्रीगुरुमूर्तये नमः इत्यन्वयः। ज्ञाननिवर्त्यत्वादपि प्रपञ्चरूपो बन्धः अज्ञानकल्पितः न परमार्थः इत्यभिप्रेत्याह—यत्साक्षात्करणा-दिति। भवाम्भोनिधौ अम्भोनिधिवदपारे अगाधे दुस्तरे भवे संसारे[1] न पुनरावृत्तिः—पुनः संसाराभाव इत्यर्थः॥ ३॥

अत्रेयं तत्त्वसुधा—

नन्वसदेव जगतः कारणं, पिण्डादिनाशादेव घटाद्युत्पत्तिदर्शनात्, जागराद्य-कालीनकार्यस्य च असत्पूर्वकत्वदर्शनात्, तद्दृष्टान्तेन जगतोऽपि तथात्वानुमानात्, 'असद्वा इदमग्र आसीत्'[2] इति श्रुतेश्च इत्यसद्वादमाशङ्क्याह— यस्यैवेति॥

यस्य प्रत्यगभिन्नस्य परमेश्वरस्य स्वरूपभूतं सदात्मकं—सद्रूप स्फुरणमेव—चैतन्यमेव असत्कल्पार्थगं—असत्कल्पाः असत्तुल्याः स्वतस्सत्तारहिताः अनिर्वचनीयाः ये अर्थाः वियदाद्याः तान् गच्छतीत्यसत्कल्पार्थगम्, अनिर्वचनीयवियदादिपदार्थनिष्ठ-मिति यावत्, भासते—प्रकाशते। अयं भावः—जगतः असत्कारणत्वे घटोऽसन् इति असत एव सर्वत्रानुवृत्तिः स्यात्, न तु सतः। किञ्च—तस्यासतः अस्वप्रकाश-त्वेन तत्र वर्तमानजगतः आन्ध्यमपि स्यात्। जगच्च सदनुविद्धं[3] प्रकाशते। तथा च स्वतः सत्त्वप्रकाशरहितं जगत् तदधिष्ठानभूतात्मसत्ताप्रकाशाभ्यामेव सत्ताप्रकाश-वद्भवतीति तत्राध्यस्तत्वेन तत्कारणकमेव जगत्। नापि पिण्डादिनाशस्य घटादिकार-

---

[1] मुकुन्दमालायां संसारस्य सागरत्वं एवं चित्रितम् 'तृष्णातोये मदनपवनोद्धूतमोहोर्मिमाले दारावर्ते तनयसहजग्राहसङ्घाकुले च. संसाराख्ये महति जलधौ' इति.

[2] तैत्तिरीये. 2. 7. असच्छब्ददर्शनात् श्रुतेरुपष्टम्भकतया ग्रहणम्। श्रुत्यर्थस्तु उत्तरत्र स्पष्टीभविष्यति. [3] अनुवेधः—संसर्गः.

साक्षात् तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।

इदमत्राकूतम्—

श्लोकद्व्या ख्यामारभते—इदमत्राकूतमिति ।। अभिप्रेतमित्यर्थः ।।

सत्तास्फुरणयोः आत्मभावात् विषयेषु सङ्क्रमणम्

असत्कल्पेषु भावेषु जडेषु क्षणनाशिषु ।
अस्तित्वं च प्रकाशत्वं नित्यात् सङ्क्रामतीश्वरात् ।। २ ।।

यदुक्तं—भावेष्वात्मसत्तास्फुरणे कुत आगत्य सङ्गते, प्रतिबिम्बभावेन वा सङ्क्रमणेन वा सङ्गते? इति । तत्र किं भावेषु पृथक् दर्पणात् अयःपिण्डादिवद्विद्यमानेषु कथं सङ्गते इति पृच्छसि? किं वा भावानामेव स्वतः सत्तास्फुरणसम्भवे किमात्मसत्तास्फुरणसङ्गमेनेति? तत्राद्यं प्रत्याह—असत्कल्पे–

णत्वम्, अनुगतमृदादेरेव कारणत्वात्[1] । जागराद्यकालीनस्य कार्यस्य चासत्पूर्वकत्वं नास्मत्सम्मतम्, सुषुप्तिकालीनसद्रूपात्मनः कारणत्वाङ्गीकारात्, सुषुप्तावात्मसत्त्वस्य च साधयिष्यमाणत्वात् । 'असद्वा इदमग्र आसीत्,'[2] इति श्रुतिश्च अनभिव्यक्तसत्कारणपरा, 'कथमसतस्सज्जायेत'[3] इति श्रुत्यैव असद्वादस्य प्रतिषेधादिति । अथवा—ननु घटस्सन् पटस्सन् इत्त्वेन प्रतीयमानस्य जगतः कथमसत्कल्पत्वमध्यस्तत्वेनोच्यते? इत्याशङ्क्याह—यस्यैवेत्यादिना । सत्प्रकाशरूपाधिष्ठानात्मसत्तैव आरोपितजगन्निष्ठ-

---

[1] आकृतिविशेषाधीनत्वाद्व्यवहारस्य न पिण्डत्वव्यवहारः इति भावः·

[2] असदिति व्याकृतनामरूपविशेषविपरीतरूपं अविकृतं ब्रह्मोच्यते, न पुनः अत्यन्तमेवासन्, न ह्यसतः सज्जन्मास्तीति. उत्तरत्र तदात्मानं स्वयमकुरुतेति वचनाच्च. तै. उ. 2. 7.

[3] मृद्घटादिदृष्टान्तानां सद्वादिपक्षं प्रत्येवानुकूलत्वात् असतः सदुत्पत्तौ दृष्टान्तप्रकारस्यैवाभावात् केन प्रकारेण असतः सज्जायेतेति महावैनाशिकं प्रतिप्रश्नोऽयम्, छा. उ. 6. 2. 2.

यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवाम्भोनिधौ

ष्विति ॥ असत्कल्पत्वे हेतुः जडेष्विति । विमतमनिर्वचनीयं सद्विलक्षण-मिति वा, जडत्वात्, शुक्तिरजवतदित्यर्थः । जडत्वे हेतुः—क्षणनाशि-ष्विति । विप्रतिपन्नं जडं, दृष्टनष्टस्वरूपत्वात्, शुक्तिरजवतवदित्यर्थः । एवंविधेषु भावेषु नित्यात् ईश्वरात् अस्तित्वं च प्रकाशत्वं च सङ्क्रामत् विषयस्थमिव विषयाकारमवभासेते, रजतात्मनेव शुक्तिसत्तास्फुरणे इत्यर्थः । अत्र सङ्क्रमणशब्दो विशेषाकारावभासाभिप्रायः, न प्रवेशाभिप्रायः; न हि रजते समारोपिते शुक्तिसत्ता सङ्‌क्रामति, समारोपितस्य अधिष्ठानव्यतिरेकेण स्वरूपाभावात्; तद्वदिदमपीति भावः ॥ २ ॥

तथा प्रतीयते, न तु तस्य स्वतस्सत्त्वम्; 'अथात आदेशो नेति नेति'[1] 'नेह नानास्ति किंचन'[2] इत्यादिश्रुत्या प्रपञ्चस्य प्रतिषेधात्, भ्रान्त्याऽपि तत्प्रतीत्युपपत्तेश्च । तस्य असद्विलक्षणत्वाङ्गीकारात् न शशविषाणसमत्वम् । ततश्च अपरोक्षप्रतीतिरप्युपपद्यते इति तात्पर्यार्थः । अक्षरार्थस्तु पूर्ववत् । येयं असत्ये प्रपञ्चे सत्यत्वबुद्धिः अनात्मनि देहादौ चात्मत्वबुद्धिः इयमेव सकलसंसारनिदानम् । अस्याश्च निवृत्तिः गुरूपदिष्टतत्त्व-मस्यादिवाक्यजन्यापरोक्षज्ञानेन मूलाज्ञाननिवृत्त्यैवेत्यभिप्रायेणाह—साक्षादित्यादिना । यः—गुरुरूपः परमेश्वरः आश्रितान्—विधवदुपसन्नान् तत्त्वमसीति वेदवचसा—यज्जगत्कारणं सदद्वितीयं ब्रह्मतत् त्वमसि, न ततो भिन्नोऽसीति वेदवचसा वेदवाक्येन साक्षात्—अपरोक्षत्वेन तत्त्वं बोधयति—ज्ञापयतीत्यर्थः । ननु कथं किञ्चिज्ज्ञत्व-सर्वज्ञत्वादिविरुद्धधर्मकयोः जीवेश्वरयोः अभेदमयोग्यं वेदो बोधयति? इति चेदुच्यते

---

[1] 'तस्य हैतस्य पुरुषस्य रूपं' इत्यारभ्य निरवशेषसत्यस्य स्वरूपमभिधाय तस्य सत्यं स्वरूपं निर्दिशन् एवमाह—अथात इति. आदेशः-ब्रह्मणो निर्देशः प्राप्तसर्वनिर्देश प्रतिषेधद्वारेण नेतिनेति इत्येव कर्तव्यः इत्यर्थः. बृ. उ. 2. 3. 6.

[2] मनसैवानुद्रष्टव्यं नेहनानाऽस्ति किं चन. मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति इति पूर्णा श्रुतिः. आचार्योपदेशपूर्वकं परमार्थज्ञानसंस्कृतेन मनसा अविद्याध्यारोपणव्यतिरेकेण द्रष्टव्यमित्यर्थः. बृ. उ. 4. 4. 20.

तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ३ ॥

पृथक् भावानां मिथ्यात्वस्फुटीकरणम्

आत्मसत्त्वैव सत्त्वैषां भावानां न ततोऽधिका ।
तथैव स्फुरणं चैषां नात्मस्फुरणतोऽधिकम् ॥ ३ ॥

भावानां मिथ्यात्वमुक्तं स्पष्टयति—आत्मसत्त्वैवेति ॥ यदि दर्पणादिवत् पृथक्सत्सु भावेषु प्रतिबिम्बः सङ्क्रामो वा आत्मसत्तास्फुरणयोः स्यात् तदा मुखवियुक्तदर्पणवत् शीतळायःपिण्डवद्वा भावाः पृथगवभासेरन्, नावभासन्ते ।

—सोऽयं देवदत्तः इत्यादिवाक्यं तदेतद्देशादिविरुद्धांशं त्यक्त्वा अविरुद्धांशं पिण्डमात्रमादाय भागत्यागलक्षणया यथा भेदं बोधयति, तथा तत्त्वमस्यादिवाक्यमपि जीवेश्वरयोः मायान्तःकरणोपाधिं तान्निमित्तकिञ्चिज्ज्ञत्वसर्वज्ञत्वादिविरुद्धांशं त्यक्त्वा, उभयत्रानुगताविरुद्धचिन्मात्रादानेनाभेदं बोधयति । अत्र महावाक्यार्थविषये याया: अनुपपत्तयः परैरुद्भाविताः तास्सर्वाः सर्वैराचार्यैः सर्वत्र पराक्रम्य निरस्ताः इति नास्माभिस्तत्र यत्यते, संग्रहव्याख्याने प्रवृत्तत्वात् । नन्वेवं वाक्यजन्यज्ञानान्निवृत्तोऽपि संसारः सुषुप्तिप्रळययोरिव पुनरपि कदाचिदुद्भवेत् इत्याशङ्क्याह—यत्साक्षात् इत्यादिना । यत्साक्षात्करणात्—यस्य स्वप्रकाशनिष्प्रपञ्चसच्चिदानन्दस्वरूपस्य ब्रह्मणः साक्षात्करणात् अपरोक्षतया सोऽहमस्मीतिज्ञानात् भवाम्भोनिधौ—संसारसमुद्रे पुनः—भूयः आवृत्तिः—आवर्तनं आगमनं न भवेत्—न स्यात्, 'तरति शोकमात्मवित्'[1] 'ब्रह्म वेद ब्रह्मैव भवति'[2] 'न स पुनरावर्तते'[3] इत्यादिश्रुतिशतेभ्यः । सुषुप्तिप्रळययोः मूलाज्ञानस्य विद्यमानत्वात् पुनरुत्थानम्, तस्य वाक्यजन्यज्ञानेनात्र नष्टत्वात् न मुक्तस्य पुनरुत्थानमिति भावः । तस्मै नमः इति ॥ ३ ॥

---

[1] आत्मप्रकृतिस्वरूपज्ञानवान् मनस्तापरूपं अकृतार्थबुद्धितारूपं च शोकं अतिक्रामतीत्यर्थः. छां. उ. 7. 1. 3.

[2] 'स यो ह वै तत् परमं' इत्यादिः. नास्याब्रह्मवित् कुले भवति, तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तः अमृतो भवति इति मन्त्रशेषः. मुण्डके. 3. 2. 9.

[3] निरालं. उ. 33. ना. प. उ. 9. 22. कालाग्नि. 5.

अतः आत्मसत्तास्फुरणाधिकसत्तास्फुरणाभावात् पार्थगर्थ्याभावे[1] सति न प्रतिबिम्बः सङ्क्रमो वा कस्यचित् क्वापीत्यभिप्रायः ।। ३ ।।

विषयेषु स्वतः सत्तास्फुरणयोरसंभवोक्तिः

ज्ञानानि बहुरूपाणि तेषां च विषया अपि ।
अहङ्कारेऽनुषज्यन्ते सूत्रे मणिगणा इव[2] ।। ४ ।।

द्वितीयं निराकरोति—ज्ञानानीति ।। यानि बहुरूपाणि—बहुप्रकाराणि ज्ञानानि । तेषां ये विषयास्ते सर्वे अहङ्कारे साभासान्तःकरणवृत्तिविशेषे-अनुषज्यन्ते—ग्रथ्यन्ते, सूत्रे मणिगणा इवेति योजना । तथा च सच्चिदात्मनि तादात्म्याध्यासपरिनिष्पन्नान्तःकरणव्याप्त्यैव विषयसत्तास्फुरणे, न स्वतः इत्यभिप्रायः । पूर्वत्र परमार्थदृष्टिमाश्रित्य, 'विषयाः एव न सन्ति यत्रात्मसत्तास्फुरणेसङ्गमः' इत्युक्तम् । अनेन व्यवहारदृष्टिमाश्रित्य 'साभासान्तःकरणप्रणाळिकया आत्मसत्ताद्यनुगममन्तरेण न बाह्यविषयेषु सत्तादिरस्ती'त्युक्त इति विशेषो द्रष्टव्यः ।। ४ ।।

अधिष्ठानमात्रस्यैव सत्यत्वम्

प्रकाशाभिन्नमेवैतद्विश्वं सर्वस्य भासते ।
लहरीबुद्बुदादीनां सलिलात् न पृथक्स्थितिः ।। ५ ।।

तस्मात् यत् यदधीनसत्तास्फूर्तिमत् तत् तस्मिन् परिकल्पितं, यथा जलाधीनसत्तास्फूर्तिमत् बुद्बुदादि जले कल्पितम्, तथैवेमे भावाः सच्चिदात्माधीनसत्तास्फूर्तिकाः तस्मिन् परिकल्पिताः इति सिद्धं सच्चिदात्मनोः तत्त्वंपदार्थयोरद्वितीयत्वं परमार्थ इत्युपसंहरति—प्रकाशाभिन्नमिति ।। सर्वस्य व्यवहर्तुः प्राणिमात्रस्येत्यर्थः ।। ५ ।।

---

[1] अर्थस्य पृथक्त्वाभावे इति यावत् ·

[2] इदमेव भङ्ग्यन्तरेण 'मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव' इति गीतायां उक्तम् ·

विषयस्फुरणस्य आत्ममात्रधर्मत्वम्

जानामीत्येव यज्ज्ञानं भावान् आविश्य वर्तते ।
ज्ञातं मयेति तत् पश्चात् विश्राम्यत्यन्तरात्मनि ॥ ६ ॥

विषयस्फूर्तिः आत्मधर्म एव, न विषयधर्मः इत्येतदुपपादयति—जानामीति ॥ यत् ज्ञानं—जानामीत्यत्र सर्वकर्मत्वेनोल्लिख्यमानं भावान्—विषयान् आविश्य[1] वर्तते, तत् ज्ञानं पश्चादन्तरात्मनि मया ज्ञातमिति विश्राम्यति—पर्यवस्यतीत्यर्थः ॥ ६ ॥

घटादिकानि कार्याणि विश्राम्यन्ति मृदादिषु ।
विश्वं प्रकाशाभिन्नत्वात् विश्राम्येत् परमेश्वरे ॥ ७ ॥

तत्र दृष्टान्तमाह—घटादिकानीति ॥ दार्ष्टान्तिकमाह—विश्वमिति । अयं भावः—यद्यपि 'इदमहं जानामि, विज्ञातमिमया' इति च सविषयं ज्ञानं विभाव्यत इति समानमेव; तथापि प्रथमप्रयोगे कर्तुः क्रियया कर्मव्याप्तिमात्रं विवक्षितमिति भावानाविश्येत्युक्तम् ; द्वितीये तु सकर्मकायाः क्रियायाः स्वसमवेतत्वेनानुसन्धानस्य विवक्षितत्वात् परमात्मनि विश्राम्येत् इत्युक्तमिति । यस्य यत्कार्यं तदन्योपरक्ततया भासमानमपि स्वकारणे एव विश्राम्यति, कार्यं च कारणात् नात्यन्तभिन्नमिति दृष्टान्तदार्ष्टान्तिकयोरभिप्रायः ॥

यद्वा[2]—विषयगतप्रकाशस्य आत्ममात्रात्मकतां उक्त्वा, प्रकाशस्य विषयस्यापि ज्ञानप्रकाशानुविद्धतयैव नियमेनोपलम्भात् तदेकात्मत्वमिति प्रकाशात्मन्यध्यस्तत्वादेव प्रकाशवैशिष्ट्येन भानं विषयाणामित्यभिप्रेत्य दृष्टान्तं सदार्ष्टान्तिकमाह—घटादिकानीति ॥ यथातथाशब्दौ पूर्वोत्तरार्धयोरध्याहर्तव्यौ ॥ ७ ॥

---

[1] विषयीकृत्येति यावत्. [2] विवक्षाधीनव्याख्यायां अस्वारस्येन वस्तुतत्त्वानुगुणतया व्याख्याति—यद्वेति.

तत्त्वप्रतिपत्तौ अज्ञानस्य प्रतिबन्धकता

स्वगतेनैव कालिम्ना दर्पणं मलिनं यथा ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥ ८ ॥

यद्येवं अद्वितीयमेव तत्त्वं, तर्हि कथं सर्वो लोको न प्रत्येतीत्याशङ्क्य, सहजदोषवशात् इत्यभिप्रेत्य दृष्टान्तेनोपपादयति—स्वगतेनैवेति ॥ यथा दर्पणगतेन कालिम्ना दर्पणस्वभावः आच्छाद्यते, तथा स्वगतेनानाद्यनिर्वचनीयेनाज्ञानेन आत्मयाथाथ्यं आच्छाद्यते । तेन जन्तवः[1] मुह्यन्ति—मोहं मिथ्याज्ञानं द्रष्टृदृश्यकार्यकरणादिविभागं परमार्थविषयकं प्राप्नुवन्तीत्यर्थः[2] ॥ ८ ॥

जीवेश्वराभेदप्रतिपत्तौ देहस्य प्रतिबन्धकत्वम्

घटाकाशो महाकाशो घटोपाधिकृतो यथा ।
देहोपाधिकृतो भेदः जीवात्मपरमात्मनोः ॥ ९ ॥

एवं सर्वस्य भेदव्यवहारस्य मूलं अज्ञानं इत्युक्त्वा, जीवेश्वरभेदभाने तु अधिकं निमित्तं दृष्टान्तेनाह—घटाकाशः इति ॥ यथा स्वभावतोऽनवच्छिन्ने[3] आकाशे घटमुपाधिं निमित्तीकृत्य घटेन क्रोडीकृतत्वेन अंशं कल्पयित्वा, घटाकाशः इत्येको भागो व्यपदिश्यते, घटाद्बहिष्ठापेक्षया महाकाशः इति, न परमार्थतः आकाशस्यामूर्तस्य केनचित् परिच्छेदः सम्भवति; तथा जीवात्मपरमात्मनोः देहोपाधिकृतो भेदः द्रष्टव्यः, निरंशे परमात्मनि अवच्छेदस्य परमार्थतोऽनुपपत्तेः । तथा च 'देहेनाहं मनुष्यः' इत्यादिप्रकारेण विशेष्यमाणः स एव चिदात्मा जीवात्मेत्युच्यते, स एव तेन अविशेष्यमाणः ईश्वरः इति । देहादेश्च उपाधेः चिदात्मन्यध्यासमन्तरेण सम्बन्धानिरूपणात्

---

[1] तेन आच्छादनेन जन्तवः. क.

[2] द्वितीयाद्वै भयं भवतीति सद्वितीयताया एव भयकारणत्वात् द्रष्ट्रादिविभागज्ञानस्य मोहहेतुत्वमिति भावः. [3] असीमिते इति यावत् .

न जीवेश्वरयोः वास्तवो भेदः सम्भवतीत्यभिप्रायः । जीवस्य परमात्मांशत्व-तद्विकारत्वस्वतन्त्रत्वपक्षाः अग्रे निरसिष्यन्ते ॥ ९ ॥

जीवेश्वरयोरैक्यज्ञापनविधानम्

तत्त्वमस्यादिवाक्यैस्तु तयोरैक्यं प्रदर्श्यते ।

सोऽयं पुरुष इत्युक्ते पुमानेको हि दृश्यते[1] ॥ १० ॥

यस्मात् आरोपितदेहाद्युपाधिनिबन्धनो भेदप्रतिभासः, तस्मादेव तादात्म्योपदेशः जीवपरयोर्भेदांशबाधे[2] श्रुत्या उपदिश्यते इत्याह—तत्त्वमस्यादिवाक्यैरिति ॥ प्रदर्श्यते—ज्ञाप्यते, न तु विधीयते, अन्यस्यान्यात्मत्वविधानायोगात् । सिद्धमेवैक्यं विरुद्धांशापोहेन प्रकटीक्रियते इत्यर्थः । तत्र लोके प्रसिद्धं दृष्टान्तमाह—सोऽयमिति ॥ १० ॥

तत्पदार्थः त्वंपदार्थश्च

यज्जगत्कारणं तत्त्वं तत्पदार्थः स उच्यते ।

देहादिभिः परिच्छिन्नो जीवस्तु त्वंपदाभिधः ॥ ११ ॥

वाक्यार्थप्रत्ययोत्पत्तिप्रकारं वक्तुं प्रथमं वाक्यनिविष्टयोः पदयोः वाच्यार्थलक्ष्यार्थभेदं कथयति—यज्जगदिति ॥ अधिदैवावस्थविक्षेप[3]प्रधानमायादिशब्दवाच्याज्ञानतत्कार्यभूतभौतिकप्रपञ्चोपहिततया परोक्षत्वादिधर्मविशिष्टः चिदात्मा तत्पदवाच्यार्थः इत्यर्थः । त्वंपदवाच्यमाह—देहादिभिरिति । अध्यात्मावस्थावरणशक्तिप्रधानाविद्यादिशब्दवाच्याज्ञानतत्कार्यदेहद्वयप्रपञ्चोपहिततया अपरोक्षत्वादिधर्मविशिष्टः चिदात्मा त्वंपदवाच्यार्थः इत्यर्थः ॥ ११ ॥

---

[1] हि बुध्यते. क. [2] बाधनेन. क. [3] विक्षेपशक्ति. ख.

लौकिकौ तदिदंपदमुख्यार्थौ

तद्देशकालावस्थादौ दृष्टः स इति कथ्यते ।
तथैतद्देशकालादौ दृष्टोऽयमिति कीर्त्यते ॥ १२ ॥

परोपाधिविशिष्टस्य वाच्यार्थत्वे दृष्टान्तमाह—तद्देशकालेति ॥ स्पष्टार्थः ॥ १२ ॥

लौकिकतल्लक्ष्यार्थदृष्टान्तेन प्रकृताखण्डार्थोपपादनम्

मुख्यं तदेतद्वैशिष्ट्यं विसृज्य पदयोर्द्वयोः ।
पुंमात्रं लक्षयत्येकं यथा सोऽयंपुमान्वचः ॥ १३ ॥

वाच्यांशे विरुद्धांशपरित्यागेन उभयानुगताविरुद्धांशः उभयत्र लक्ष्यार्थः इति मत्वा, लक्षणयाऽखण्डवाक्यार्थबोधनं 'सोऽयं देवदत्तः' इति वाक्यदृष्टान्तेनोपपादयति—मुख्यमिति ॥ तद्वैशिष्ट्यं—सः इतिपदनिर्दिष्टं परोक्षदेशकालादिवैशिष्ट्यम् । एतद्वैशिष्ट्यं—अयमितिपदनिर्दिष्टं अपरोक्षदेशकालादिवैशिष्ट्यम् । मुख्यं वाच्यं विसृज्य अनुगतं उभयत्र पुंमात्रम् ॥

प्रत्यक्त्वं च परात्त्वं च त्यक्त्वा तत्त्वमसीति वाक् ।
तथैव लक्षयत्यैक्यं जीवात्मपरमात्मनोः ॥ १४ ॥

यथा 'सोऽयं देवदत्तः' इति वाक्यं लक्षयत्यखण्डं, इवं तत्त्वमसिवाक्यमपि स्वपदार्थगतविरुद्धांशप्रहाणेन अनुगतचिन्मात्रांशमादाय अखण्डं तत्त्वं लक्षयेत् इत्याह—प्रत्यक्त्वं चेति ॥ १४ ॥

वाक्यार्थबोधकसंबन्धत्रयनिर्देशः

सामानाधिकरण्याख्यः सम्बन्धः पदयोरिह ।
विशेषणविशेष्यत्वं सम्बन्धः स्यात् पदार्थयोः ॥ १५ ॥
लक्ष्यलक्षणसंयोगात् वाक्यमैक्यं च बोधयेत् ।

एतच्च सम्बन्धत्रयोपेतं सत् वाक्यार्थं बोधयतीति सम्बन्धत्रयं व्युत्पादयति

—सामानाधिकरण्याख्यः इति ।। पदयोः सामानाधिकरण्याख्यः सम्बन्धः । सामानाधिकरण्यलक्षणं वक्ष्यति ।। पदार्थयोः वाच्ययोः विशेषणविशेष्यत्वं सम्बन्धः । यथा 'सोऽयं, अयं सः' इति परस्परभेदभ्रमव्युदासाय विशेषण-विशेष्यभावः, तथा तत्त्वंपदार्थयोरपीत्यर्थः । वाच्यांशयोः विरोधे सति पदयोः सामानाधिकरण्यं श्रूयमाणं यदा नोपपद्यते तदा लक्षणया वाच्यार्थैकदेशमादाय सामानाधिकरण्ये सति अखण्डार्थसिद्धिः इत्यभिप्रेत्याह—लक्ष्यलक्षण-संयोगादिति ।। प्रत्यक्चैतन्यपदयोः लक्ष्यलक्षणभावः सम्बन्धः लक्ष्यलक्षण-संयोगशब्दार्थः ।।

त्रिविधलक्षणानिर्देशपूर्वकं प्रकृते तत्त्वमसीत्यादौ
जहदजहल्लक्षणया अखण्डार्थबोधनोक्तिः

गङ्गायां घोष इतिवत् न जहल्लक्षणा भवेत् ।। १६ ।।
नाजहल्लक्षणापि स्यात् श्वेतो धावतिवाक्यवत् ।
तत्त्वमस्यादिवाक्यानां लक्षणा भागलक्षणा ।। १७ ।।
सोऽयं पुरुषः इत्यादिवाक्यानामिव कीर्तिता ।

तत्र लक्षणा त्रिविधा, जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति प्रसिद्धा । तत्र का लक्षणा इह वाक्यार्थबोधे ग्राह्या? इत्याकाङ्क्षायां, तृतीयां परिशेषयितुं इतरे द्वे अपि निरस्यति—'गङ्गायां घोषः' इतिवदिति ।। वाच्यार्थं अशेषतः परित्यज्य तत्सम्बन्धिनि अर्थान्तरे वृत्तिः जहल्लक्षणोच्यते, यथा गङ्गापदं स्ववाच्यं प्रवाहमशेषं परित्यज्य तत्संबद्धं तीरं लक्षयति । तद्वदिह लक्षणा न सङ्गच्छते, जडाजडात्मसम्भेदात्मकस्याशेषवाच्यस्य परित्यागे तत्सम्बन्धिनः पदार्थस्यान्यस्य लक्षणीयस्याभावात् शून्यपर्यवसायि वाक्यं स्यात्; तच्च अनिष्टं; असिपदेन सन्मात्रवाचिना समभिव्याहारविरोधा-दित्यभिप्रायः । अजहल्लक्षणाऽप्यत्र न स्यात्; यथा 'श्वेतो धावति' इत्युक्ते गुणवाचिना श्वेतशब्देन तदाश्रयद्रव्यं वाच्यार्थगुणापरित्यागेन लक्ष्यते,

नैवमिह वाच्यार्थापरित्यागेन तत्सम्बन्धिनि वृत्तिः, इत्येवंलक्षणा अजहत्स्वार्थाऽपि सम्भवति, विरोधस्य तादवस्थ्यात्, ऐक्यवाक्यार्थासिद्धौ सामानाधिकरण्यबाधप्रसङ्गाच्च इत्यभिप्रेत्याह—नाजहल्लक्षणाऽपि स्यादिति। परिशेषात् जहदजहल्लक्षणैवात्रोचितेति सदृष्टान्तमाह—तत्त्वमसीति ॥ उभयोः जडांशपरित्यागेन[1] सर्वानुगतचिन्मात्रं लक्षणया समादायाखण्डवाक्यार्थं बोधयति 'तत्त्वमसि'वाक्यं, यथा 'सोऽयं पुरुषः' इति वाक्यं तदेतद्देशकालशाबल्यांशं परित्यज्य उभयावस्थानुस्यूतं पुरुषस्वरूपमात्रमादाय अखण्डमर्थं बोधयति, तद्वदित्यर्थः ॥

सामानाधिकरण्यपदार्थः

भिन्नवृत्तिनिमित्तानां शब्दानामेकवस्तुनि ॥ १८ ॥
प्रवृत्तिस्तु समानाधिकरणत्वमिहोच्यते ।[2]

सामानाधिकरण्यं—पदयोः सम्बन्धः इत्युक्तं, तस्य लक्षणमाह—भिन्नवृत्तीति ॥ पर्यायशब्दव्यावृत्त्यर्थं भिन्नवृत्तिनिमित्तानामित्युक्तम् । वृत्तिः—प्रवृत्तिः । घटः पटः स्तम्भः इत्याद्यनेकार्थनिष्ठशब्दव्यावृत्तये एकवस्तुनीत्युक्तम् ॥

जीवः परमात्मनोंऽशः विकारो वा न भवति

परस्यांशो विकारो वा जीवो वाक्येन नोच्यते ॥ १९ ॥
जीवात्मना प्रविष्टत्वात् स्वमायासृष्टमूर्तिषु ।
निरंशो निर्विकारोऽसौ श्रुत्या युक्त्या च गम्यते ॥ २० ॥
घटाकाशो विकारो वा नांशो वा वियतो यथा ।

नन्वेतत्पदयोः सामानाधिकरण्यं संसृष्टार्थपरत्वेऽपि सङ्गच्छते, अतः किमित्यप्रसिद्धं अखण्डार्थपरत्वमास्थीयते इति चेत्, तत्र वक्तव्यं—किं तत्त्वं-

---

[1] जडद्वयशाबल्यांशपरित्यागेन. ग.

[2] पदनिष्ठं सम्बन्धरूपं सामानाधिकरण्यमिदम्.

पदार्थयोः कराङ्गुल्यादिवत् अंशांशिभावः संसर्गः? किं वा भूम्यूषरवत् विकारविकारित्वं? किं वा अत्यन्तभेदेऽपि स्तोतृस्तुत्यभावः? अथ वा सादृश्ययोगः? कार्यकारणभावो वा? जातिव्यक्तिभावो वा? गुणगुणित्वलक्षणो वा? उपासकगतोपासनाकर्मत्वं वा? अन्यतरस्यान्यतरभावकल्पनाविषयत्वं वा? इति[1]। तत्र नाद्यावित्याह—परस्यांशः इति ॥ कथं जीवः परमात्मनोंऽशो विकारो वा न भवति?

'ममैवांशो जीवलोके जीवभूतस्सनातनः'[2]

इति स्मृतौ जीवस्य परमात्मांशत्वावगमात्, 'सर्व एत आत्मानो व्युच्चरन्ति'[3] इति श्रुतौ विकारत्वावगमाच्च इति चेत्—मैवं, प्रवेशश्रुतिविरोधादित्याह—जीवात्मनेति। 'तत्सृष्ट्वा। तदेवानुप्राविशत्'[4] 'अनेन जीवेनात्मनाऽनुप्रविश्य'[5] 'स एष इह प्रविष्ट आनखाग्रेभ्यः'[6] 'स एतमेव सीमानं विदार्य एतया द्वारा प्रापद्यत'[7] 'अन्तः प्रविष्टः शास्ता जनानाम्' 'अन्तः प्रविष्टं

---

[1] तथाच नवधा सामानाधिकरण्यनिर्वाहः प्रदर्शितः. एतत्सर्वमपि क्रमशः खण्डयते.

[2] जीवेनानुभूयमाने जीवलोके क्षेत्रेऽस्मिन् निर्विशेषस्य चिदेकरसस्य ब्रह्मणः अंशइवांशः अविद्यया कल्पितो भाग एव जीवभूतः क्षेत्रज्ञतां गतस्सन् प्रमाता भवतीत्यर्थः. गीता. 15. 7.

[3] माध्यन्दिनानामयं पाठः. उपाधिसंपर्कजनितप्रबुध्यमानविशेषात्मानः इत्यर्थः वाजसनेयिनां तु—'स यथोर्णनाभिः तन्तुनोच्चरेत् यथाग्नेः क्षुद्राः विस्फुलिङ्गा व्युच्चरन्त्येवमेवैतस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति' इति पाठः. व्युच्चरन्ति—विविधं नाना च उद्गच्छन्ति. बृ. उ. 2. 1. 20.

[4] तै. उ. 2. 6. [5] तेज आद्याः तिस्रो देवताः प्राणधारणकर्त्रा अनेनात्मना अनुप्रविश्य तेजोबन्नभूतमात्रासंसर्गेण लब्धविज्ञाना सती नामरूपे व्याकरवाणीत्यर्थः. छां. उ. 6. 3. 2.

[6] प्रविष्टः—सामान्यतो विशेषतश्च देहं व्याप्यावस्थितः. बृ. उ. 1. 4. 7.

[7] मूर्धसीमानं—केशविभागावसानं छिद्रं कृत्वा अनेन मार्गेण इमं कार्यकारणसंघातं प्रविवेशेत्यर्थः. ऐ. उ. 1. 3. 12.

कर्तारमेतम्'[1] इत्याद्यनेकश्रुतिषु स्रष्टुः ईश्वरस्य स्वसृष्टेषु संघातेषु अविकृतस्यैव प्रवेशः श्रूयते । अतः अनेन प्रवेशवाक्यसन्दोहेन अविरोधाय मायातत्कार्योपाधिकल्पितावच्छेदभेदमाश्रित्य अंशस्मरणं विकारापत्तिश्रवणं च औपचारिकं व्याख्येयमित्यभिप्रायः ॥

ननु प्रवेशश्रुतेरपि[2] घटे चूर्णवत् फले बीजवद्वा प्रवेशः ईश्वरस्य सृष्टेषु कार्येषु इत्यङ्गीकारे अंशादिप्रमाणाविरोधः इति चेत्, एतदप्यसत्, निरंशत्वनिर्विकारत्वश्रुतियुक्तिविरोधादित्याह—निरंशः इति ॥

'निष्कळं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्'[3]

'नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययम्'[4] इत्यादिश्रुतिभिः,

'अच्छेद्योऽयमदाह्योऽयमविकार्योऽयमुच्यते'[5]

इत्यादिस्मृतिभिश्च निरंशो निर्विकारोऽसौ ईश्वरात्मा गम्यते—ज्ञायते इत्येका योजना । युक्त्या च निरंशो निर्विकारश्चासौ गम्यते इत्यपरा । युक्तिश्च-जगत्कर्तुस्तावत् सावयवत्वे तस्यान्यपूर्वत्वनियमात सृज्यकोटिपतितत्वेन जगत्कर्तृत्वव्याहतेः सर्वज्ञत्वसर्वशक्तित्वायोगात् अनीश्वरत्वापत्तिः । जगत्कर्त्रनवस्था च कर्त्रन्तराभ्युपगमे स्यात् ।

'स कारणं करणाधिपाधिपो
न चास्य कश्चिज्जनिता न चाधिपः'[6]

---

[1] तै. आ. 3. 11. [2] 'तत् सृष्ट्वा तदेवानुप्राविशत्' इति श्रुतेरपीत्यर्थः.

[3] 'अमृतस्य परं सेतुं दग्धेन्धनमिवानलम्' इति मन्त्रशेषः. निरवयवं स्वे महिम्नि प्रतिष्ठितं उपसंहृतसर्वविकारं अगर्हणीयं निर्लेपं संसारमहोदधेः सेतुमिवोत्तारणोपायं तं परं पूरुषं मुमुक्षुर्वै शरणमहंप्रपद्ये इत्युनुषङ्गः. श्वे. उ. 6. 19.

[4] 'तदव्ययं तद्भूतयोनिं परिपश्यन्ति धीराः' इति शेषः. अविनाशि विविधब्रह्मादिस्थावरान्तप्राणिभेदैः भवनशीलं आकाशवत् व्यापकं सुसूक्ष्मं सर्वविधद्वन्द्वशून्यं सर्वभूतानां कारणं धीमन्तः विवेकिनः परिपश्यन्ति इत्यर्थः. मुं. उ. 1. 1. 6.

[5] निरवयवत्वात् पृथिव्यप्तेजोवायुभिरप्रधृष्यः इत्यर्थः. गीता. 2. 24.

[6] स परमेश्वरः सर्वस्यापि कारणं, अस्य न कश्चित् जनयिता, न चास्य कश्चिदधिपः. श्वे. उ. 6. 9.

इति ईश्वरविषयश्रुतिबाधप्रसङ्गाच्च । तथा विकारोऽपि ईश्वरे न युज्यते । विकारो नाम—परिणामः परिस्पन्दो वा परस्परसम्बन्धकृतातिशययोगो वा । सर्वथाऽपि नोपपद्यते, अमूर्ते निरवयवे सन्मात्रे सर्वप्रकारस्यापि विकारस्यानुपपत्तेः इति । विभुनः अंशविकारयोरभावे दृष्टान्तमाह—घटाकाशः इति । विमतो नांशविकारवान् , विभुत्वात् , आकाशवदित्यर्थः ॥ २० ॥

जीवस्य ईश्वरत्वारोपणेन न स्तुतिः

त्वमिन्द्रोऽसीतिवत् वाक्यं न खलु स्तुतितत्परम् ॥ २१ ॥

इदानीं तृतीयं विकल्पमपाकरोति—त्वमिन्द्रोऽसीति ॥ यथा अनिन्द्र एव सन् कश्चित् इन्द्रत्वारोपणेन स्तूयते 'त्वमिन्द्रोऽसी ति, तथा अनीश्वर एव सन् जीवः ईश्वरत्वारोपणेन स्तूयते 'तत्त्वमसी'ति, एवमेतद्वाक्यं स्तुतिपरमिति न खलु वाच्यमिति योजना । 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं'[1] 'ऐतदात्म्यमिदं सर्वम्'[2] इत्युपक्रमोपसंहारयोः[3] निरङ्कुशाद्वितीयत्वश्रवणविरोधात् जीवस्येश्वरात् भेदाभावे सति स्तुतिकल्पनायाः अनवकाशादित्यर्थः ॥ २१ ॥

तत्त्वंपदार्थयोः न सादृश्ययोगः

न सादृश्यपरं वाक्यं अग्निर्माणवकादिवत् ।

चतुर्थं पक्षं प्रतिक्षिपति—न सादृश्यपरमिति ॥ गुणावयवक्रियाणां अन्यतमभूयस्त्वसामान्यं सादृश्यं, तदीश्वरे निर्गुणे निरवयवे निष्क्रिये कुतस्त्यमिति । अतः 'अग्निर्माणवकः' इत्यादिवत् न सादृश्यपरमिदं वाक्यमित्यर्थः ॥

तत्त्वंपदार्थयोः न कार्यकारणभावः

न कार्यकारणत्वस्य साधनं मृद्घटादिवत् ॥ २२ ॥

---

[1] छांदोग्ये. 6. 2. 1. [2] एतत् सदात्मा यस्य सर्वस्य तत् एतदात्म, तस्य भावः ऐतदात्म्यम् . छांदोग्ये. 6. 8. 7.

[3] सद्विद्योपदेशप्रकरणदृष्ट्या एवं विभागः.

पञ्चमं पक्षमपक्षिपति—न कार्यकारणत्वस्येति ॥ अयमर्थः—निरवयवत्वात् एकद्रव्यत्वाच्च आरम्भकत्वानुपपत्तेः, कार्त्स्न्यैकदेशविकल्पासहत्वाच परिणामानुपपत्तेः, संघातादिवादस्य दूरापास्तत्वात् न मृद्घटवत् कार्यकारणभावो जीवेश्वरयोरिति न तत्परत्वं सामानाधिकरण्यस्येहेति ॥ २२ ॥

तयोः न जातिव्यक्तिभावः

न जातिव्यक्तिगमकं गौः खण्ड इतिवद्वचः ।

षष्ठं दूषयति—न जातीति ॥ जीवरूपव्यक्तिषु ईश्वरो जातिरिति कल्पनायां ईश्वरस्य गोत्वादिवदचेतनत्वे सति अनीश्वरत्वापतेः । ईश्वरो हि सकलविषयज्ञानेच्छाप्रयत्नवानिति धर्मिग्राहकप्रमाणतः सिद्धम् । अतो नेदं वाक्यं जातिव्यक्तिपरमित्यर्थः ॥

तयोः न गुणगुणिभावः

गुणगुण्यात्मकं वाक्यं नैतन्नीलोत्पलादिवत् ॥ २३ ॥

नापि सप्तमः इत्याह—गुणगुण्यात्मकमिति । ईश्वरस्य जीवगुणकत्वे, तेन विशेष्यमाणस्य तद्वत् संसारित्वापत्तेः सर्वज्ञत्वादिसाधकप्रमाणव्याकोपः । जीवस्य वेश्वरगुणकत्वे, संसारित्वबाधात् नित्यमुक्तत्वापत्तौ तस्य श्रेयस्साधनविधायि शास्त्रं अनर्थकमापद्येतेत्यर्थः ॥ २३ ॥

तत्त्वमसीतिवाक्यस्य नोपासनापरत्वम्

नोपासनापरं वाक्यं प्रतिमास्वीशबुद्धिवत् ।

नाप्यष्टमः इत्याह—नोपासनापरमिति ॥ वेद उपासीत इत्येतदादिक्रियाऽन्वयाभावात्, उपासनाप्रकरणपाठाभावात्, असीतिपदसमभिव्याहारेण स्वरूपमात्रपर्यवसाननिश्चयात्, क्रियान्तराध्याहारानुपपत्तेश्च नोपासनापरमपीदं वाक्यमित्यर्थः ॥

तत्त्वमसीति नोपचारोक्तिः

न चौपचारिकं[1] वाक्यं राजवद्राजपूरुषे ॥ २४ ॥

नवममुपचारपक्षं प्रतिक्षिपति—न चौपचारिकमिति ॥ पुनः पुनः परिचोदनापूर्वकं नवकृत्वः अभ्यासस्य उपचारपक्षे असङ्गतेः, न ह्युपचारप्रयोगेऽप्याक्षेपाद्यवकाशः इत्यतः नोपचारपरमपीदमित्यर्थः ॥ २४ ॥

जीवात्मना प्रविष्टोऽसौ ईश्वरः श्रूयते यतः ।

तृतीयादिषु समस्तपक्षेषु साधारणं दूषणमाह—जीवात्मनेति ॥ प्रवेशश्रुतिशतेन ईश्वरस्यैव सङ्घातप्रवेशवशात् जीवत्वव्यपदेशभाक्त्वं, न ततोऽर्थान्तरं जीवः इति निश्चये सति, स्तोतृस्तोतव्यत्वादिभेदकल्पनाऽनवकाशात्, प्रकारान्तरासम्भवे सति जीवत्वाभिमतस्यात्मनः उपाधिकृतजीवत्वापोहेन तस्य स्वाभाविकब्रह्मत्वबोधकमेवेदं वाक्यमित्यर्थः ॥

आत्मपदार्थशोधनम्

देहेन्द्रियमनोबुद्धिप्राणाहङ्कारसंहतौ ॥ २५ ॥
आत्मसङ्कलनात् अज्ञैरात्मत्वं प्रतिपाद्यते ।
वह्निधीः काष्ठलोहादौ वह्निसङ्कलनादिव ॥ २६ ॥

ननु ब्रह्म चेत् सर्वस्यात्मा, तर्हि कथं अहं ब्रह्मेति नित्यमात्मा न प्रतिभासते, मनुष्योऽहमित्याद्यात्मनैव कस्मात् प्रतिभासते इत्याद्याशङ्क्य[2], उपाध्यविवेकनिबन्धनभ्रमवशात् इत्यभिप्रेत्य, उपाध्यपोहेन त्वंपदार्थशोधनप्रकारमारभते—देहेन्द्रियेत्यादिना ॥ अज्ञैः—अज्ञानावृतनिजतत्त्वैः जीवैः देहादीनां संहतौ—सङ्घाते आत्मसङ्कलनात्—आत्मचैतन्यव्यापनात्, आविर्भावादिति यावत्, आत्मत्वं प्रतिपाद्यते—सङ्घात आत्मेति ज्ञायते, न ब्रह्मेत्यर्थः । उक्तेऽर्थे बुद्धिसाम्यार्थं दृष्टान्तमाह—वह्निधीरिति ॥ २६ ॥

---

[1] बहुभिर्निमित्तैः अतद्भावे तद्वदभिधानं उपचारः. [2] इत्याशङ्क्य. ग.

पञ्चकोशादात्मनः उद्धरणप्रकारः

देहमन्नमयं कोशमाविश्यात्मा प्रकाशते ।
स्थूलो बालः कृशः कृष्णो वर्णाश्रमविकल्पवान् ॥ २७ ॥
प्राणकोशेऽपि जीवामि क्षुधितोऽस्मि पिपासितः ।
संशितो निश्चितो मन्ये इति कोशे मनोमये ॥ २८ ॥
विज्ञानमयकोशस्थो विजानामीति तिष्ठति ।
आनन्दमयकोशाख्ये त्वहङ्कारे पुरा कृतैः ॥ २९ ॥
पुण्यैरुपासनाभिश्च सुखितोऽस्मीति मोदते ।

इदानीं स्थूलारुन्धतीदर्शनन्यायेन[1] मुञ्जादिषीकाग्रहणन्यायेन[2] वा अन्तरात्मनः सूक्ष्मस्योद्धरणप्रकारमाह—देहमन्नमयं कोशमिति[3] ॥ अयमर्थः—अहमवभासो हि प्रत्यगात्मानवगाहत इत्यविवादम् । स च स्थूलत्वादिभिर्दृश्यधर्मैः विशिष्टविषये वर्तमानः न शुद्धं आत्मानमवगाहते । अतः परिच्छिन्नो जीवात्मा कथं व्यापकः परमात्मा भवितुमर्हतीत्यसम्भावना जायते । ततश्च अहङ्कारगृहीतस्य इदमंशविशिष्टस्य अहङ्कारसाक्षित्वेन इदमंशप्रहाणेन

---

[1] यत्र अतिसूक्ष्मदुर्विज्ञेयवस्तुविज्ञानाय क्रमेण तत्समीपसमीपतरसमीपतमं वस्तुतत्त्वेन प्रदर्श्यते तत्रायं न्यायः· वधूवरयोः शास्त्रतः अरुन्धतीदर्शने प्राप्ते स्थूलं चन्द्रं तत्त्वेन निर्दिश्य तदनु क्रमेण सप्तर्षिमण्डलं तत्र चारुन्धतीमिति क्रमेण प्रदर्शयन्ति गुरवः तथेत्यर्थः·

[2] मुञ्जः—तृणविशेषः, ईषीका—तद्गर्भस्थकोमलतृणम्· मुञ्जाख्यानां बहिरावृतानस्थूलतृणानां विभजनेन यथा तदन्तस्स्था इषीका समुध्द्रियते एवं इत्यर्थः·

[3] कोशा इव आत्माच्छादनेन तत्संरक्षणहेतुत्वात् एते कोशा इत्युच्यन्ते· तत्र अन्नविकारत्वात् स्थूलशरीरं अन्नमयकोशः इति, पञ्चकर्मेन्द्रियसहितप्राणपञ्चकं प्राणमयकोशः इति, पञ्चज्ञानेन्द्रियसहितं मन एव मनोमयकोशः इति, पञ्चज्ञानेन्द्रियसहिता बुद्धिरेव विज्ञानमयकोशः इति· अहङ्कारात्मकः अविद्यात्मको वा आनन्दमयकोशः इति चोच्यते इति शिवगीतायाम्·

उद्धरणे सति अहङ्कारनिरपेक्षः स्वयंप्रकाशमानः आत्मा शुद्धः परिपूर्णः परमात्मैवेति ज्ञातुं शक्यते इति। उद्धरणप्रकारमिदम् — तत्र अन्नमयः प्राणमयो मनोमयो विज्ञानमय आनन्दमय इति पञ्चकोशाः अहमवभासविषयतया प्रसिद्धाः। तेभ्योऽन्यः तत्साक्षी प्रत्यगात्मेति शुद्ध आत्मा निर्विशेषः सिध्यति। कथं? स्थूलोऽहं ब्राह्मणोऽहं ब्रह्मचार्यहमिति विशिष्टविषयः अहङ्कारः अतिबहिष्ठः। क्षुधितोऽस्मि पिपासितः इति प्राणधर्मविशेषविषयः ततोऽभ्यन्तरः। उपलक्षणमेतत्—पश्यामि शृणोमीत्यादीन्द्रियधर्मवैशिष्ट्यविषयत्वस्य। संशितः संशयवान् निश्चयवानस्मीति मनोधर्मविशिष्टात्मविषयः प्राणमयादप्यान्तरः मनोमयकोशावगाही। अहमिदं जानामि करोमिचेत्येवमादिप्रकारेण मनसोऽप्यभ्यन्तरं विज्ञानमयकोशमवगाहते। येनाहङ्कारेणात्मचैतन्यखचितेन इतरकोशाः अवभस्यन्ते सोऽहङ्कारः आनन्दमयकोशः तस्मिन् आनन्दमयकोशाख्ये। तस्य विज्ञानमयकोशान्तर्गतस्यानन्दमयत्वे सुखविशेषावयवत्वं निमित्तमाह—पुराकृतैः पुण्यैः उपासनाभिश्चेति ॥

आत्मनः परिच्छेदभानोपाधिः

एवं कञ्चुकितः कोशैः कञ्चुकैरिव पञ्चभिः ॥ ३० ॥
परिच्छिन्न इवाभाति व्याप्तोऽपि परमेश्वरः।

एवं कोशपञ्चकमनूद्य तत्कृतपरिच्छेदव्युदासेन तदनुस्यूतसाक्षिरूपात्मा स्वयं परिपूर्णत्वात् ईश्वर एवेति आत्मतत्त्वमावेदयति—एवं कञ्चुकितः इति ॥

आत्मनः भेदभानोपाधिः

यथा सलिलमाविश्य बहुधा भाति भास्करः ॥ ३१ ॥
तथा शरीराण्याविश्य बहुधा स्फुरतीश्वरः।

तदेवमात्मनः परिच्छेदावभासस्योपाधिनिबन्धनत्वात् स्वतोऽपरिच्छिन्नः परमात्मैवेति प्रतिपाद्य, तस्य प्रतिशरीरं भेदप्रतिभासोऽपि उपाधिनिबन्धनः न

स्वतः इत्येतत् दृष्टान्तेनोपपादयति—यथा सलिलमिति ॥ यथा बहुषु जलभाजनेषु प्रतीयमानस्य भानुबिम्बस्य जलोपाधिपरामर्शमन्तरेण स्वतो भेदो न निरूपणपथं अवतरति, तथा अनेकेषु देहेषु स्फुरतः आत्मबिम्बस्यापि देहोपाधिपरामर्शमन्तरेण स्वतो भेदो न निरूपणपथमर्हति । अतः सर्वशरीरेषु परमार्थतः एक एवात्मा परिपूर्णश्चेति सिद्धम् । एतेन इदमपि निरस्तं, यदाहुः—एकात्मत्वपक्षे एकस्मिन् सुखिनि सर्वे सुखिनः स्युः इत्यादि । जलगतप्रतिबिम्बानामन्यतमे कम्पनादिमत्तया विभाव्यमानेऽपि अन्येषां तद्वत्तायाः अभावनिश्चयात्, यथा धर्मव्यवस्था, एवं जीवेष्वपि व्यवस्थोपपत्तेः । जीवेश्वरयोरेकत्वेऽपि धर्मभेदव्यवस्थायाः अयमेव दृष्टान्तः, यथा प्रतिबिम्बे चलनादिमति न भानुश्चलनादिमान् भवति, एवं जीवे कर्तृत्वादिसंसारधर्मवत्तया भासमानेऽपि, न परमात्मा तद्धर्मवान् भवतीति ॥

आत्मनः तटस्थलक्षणम्

कारणत्वं च कार्यत्वं तटस्थं लक्षणं तयोः[1] ॥ ३२ ॥
शाखायां चन्द्र इतिवत् नैव मुख्यमिदं मतम् ।

तदेवमात्मनः परिच्छिन्नत्वं अनेकत्वं ईश्वरादन्यत्वं च उपाधिवशात् प्रतिभासते न वस्तुतस्तत्रैते धर्माः सन्ति इति प्रतिपाद्य इदानीं जीवेश्वरयोः तटस्थस्वरूपलक्षणप्रदर्शनद्वारा तयोरैक्यस्य वाक्यार्थत्वयोग्यतां सम्भावयति—कारणत्वमित्यादिना ॥ तयोः—तत्त्वमर्थयोः । कारणत्वं तत्पदार्थस्य तटस्थलक्षणं, कार्यत्वं त्वम्पदार्थस्येति योज्यम् । तथा च श्रुतिः—'कार्योपा-

[1] 'स्वरूपं तटस्थं द्विधा लक्षणं स्यात् स्वरूपस्य बोधो यतो लक्षणाभ्याम् । स्वरूपे प्रविष्टात् स्वरूपेऽप्रविष्टात् तथा काकवन्तो गृहाः खं बिलं च ॥' इति वेदान्तकारिका- यावल्लक्ष्यकालमनवस्थायित्वे सति इतरव्यावर्तकं तटस्थलक्षणम् · स्वरूपमेव लक्षणं स्वरूपलक्षणम् ·

धिरयं जीवः कारणोपाधिरीश्वरः[1] इति । भूतभौतिकप्रपञ्चकारणत्वं तत्पदार्थोपलक्षणं, देहेन्द्रियादिसङ्घातरूपकार्याध्यक्षत्वं त्वम्पदार्थोपलक्षणमित्यर्थः । उक्तलक्षणमिदमुभयोस्सद्भावसम्भावनामात्रहेतुः, न स्वरूपपर्यवसायीत्येतद्दृष्टान्तेन स्पष्टयति—शाखायामिति ॥

आत्मनः स्वरूपलक्षणम्

महाप्रकाशमित्युक्तं स्वरूपं चन्द्रलक्षणम् ॥ ३३ ॥
सच्चिदानन्दरूपत्वं स्वरूपं लक्षणं तयोः ।[2]

स्वरूपपर्यवसायि लक्षणं सदृष्टान्तमाह—महाप्रकाशमिति ॥ यथा प्रकृष्टप्रकाशश्चन्द्रः इति चन्द्रस्वरूपलक्षणं, नैतद्विशिष्टार्थपरं, चन्द्रप्रातिपदिकार्थमात्रबुभुत्सया कृतप्रश्नस्योत्तरत्वेनास्य प्रवृत्तेः; वैशिष्ट्यपरत्वे अबुभुत्सितार्थविषयपरत्वेन अनवधेयवचनतापत्तेः । यः प्रकृष्टः प्रकाशः स चन्द्रः इति निर्देशे यत्तच्छब्दयोः सामानाधिकरण्येनैकार्थत्वनियमात् प्रकृष्टप्रकाशचन्द्रपदयोः स्वरूपमात्रपर्यवसानस्य अवश्यम्भावात् चन्द्रस्वरूपलक्षणं अखण्डचन्द्रप्रातिपदिकार्थमात्रं बोधयतीति युक्तम् । तथा च तयोः तत्त्वम्पदार्थयोः सच्चिदानन्दरूपत्वं स्वरूपलक्षणं, अनृतजडदुःखपरिच्छेद्यविरोधिसच्चिदानन्दानन्तरूपता तत्त्वम्पदार्थस्वरूपमित्यर्थः ॥

अखण्डार्थोपपादनोपसंहारः

एकलक्षणयोरैक्यं वाक्येन प्रतिपाद्यते ॥ ३४ ॥
तस्मादेकप्रकाशत्वं सर्वात्मत्वमिति स्थितम् ।

---

[1] त्रिपुरामहोपनिषत्. 4 8. शुकरहस्योपनिषत्. 3. 12.

[2] ननु स्वस्य स्ववृत्तित्वाभावेन कथं लक्षणत्वमिति चेन्न. स्वस्यैव स्वापेक्षया धर्मधर्मिभावकल्पनया लक्षणत्वसम्भवात्. अत्र 'आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते' इति विवरणोक्तं स्मर्तव्यम् .

तथा च कार्यकारणलक्षणोपाधिद्वयप्रहाण्या विरोधाभासे बाधिते सति, सच्चिदानन्दानन्तस्वभावमात्रे भेदलेशस्याप्यभावात् एकलक्षणयोगित्वेनैकवाक्यार्थप्रतिपत्तियोग्यता अनयोर्युक्तेति वाक्यार्थमाह—एकलक्षणयोरिति ॥ एतावता 'साक्षात्तत्त्वमसीति वेदवचसा' इति द्वितीयः पादो व्याख्यातः । इदानीं उक्तवाक्यार्थतत्त्वमनूद्य तृतीयं पादं व्याचष्टे—तस्मादित्यादिना ॥ एकप्रकाशत्वम्—एकत्वं प्रकाशत्वं च, एकरूपप्रकाशत्वमिति वा ॥ इदमेव सर्वात्मत्वं 'तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्'[1] इति श्रुतौ उक्तं, नानेकरूपापत्तिः, इति स्थितं—निश्चितमित्यर्थः ॥

जीवस्य सर्वात्मत्वज्ञापनम्

देवतिर्यङ्मनुष्याणां प्रकाशात् न पृथक् स्थितिः ॥ ३५ ॥
जीवः प्रकाशाभिन्नत्वात् सर्वात्मेत्यभिधीयते ।

कथमेतन्निश्चीयते देवमनुष्यादिभेदस्य विद्यमानत्वात् इत्याशङ्क्य, प्राक् प्रतिपादितमर्थं ज्ञापयति—देवेति ॥ जीवोऽपि परमेश्वरप्रकाशात्मपृथक्स्वरूपाभावात् सर्वात्मेत्याह—जीव इति ॥

वाक्यार्थतत्त्वज्ञानफलम्

एवं प्रकाशरूपत्वपरिज्ञाने दृढीकृते ॥ ३६ ॥
पुनरावृत्तिरहितं कैवल्यं पदमश्नुते ।
सकृत्प्रसक्तमात्रोऽपि सर्वात्मत्वे यदृच्छया ॥ ३७ ॥
सर्वपापविनिर्मुक्तः[2] शिवलोके महीयते ।

---

[1] 'ब्रह्म वा इदमग्र आसीत्' इत्यादिः. इदं शरीरस्थं यत् गृह्यते अग्रे प्राक् प्रतिबोधादपि ब्रह्मैवासीत् सर्वं चेदं. किन्तु अप्रतिबोधादज्ञातम् । तत् कथंचिदाचार्येण दयालुना प्रतिबोधितं 'नासि संसारी'ति आत्मानमेवावैत् स्वाभाविकं 'अहं ब्रह्मास्मीति.' इत्यर्थः. बृ॰ उ॰ 1. 4. 10.

[2] सर्वभावविनिर्मुक्तः. ग.

एवं वाक्यार्थतत्त्वमनूद्य तद्विज्ञानफलमाह—एवं प्रकाशेति ॥

एवं जीवब्रह्मणोः एकत्वज्ञानमाहात्म्यं कैमुतिकन्यायेनाह—सकृदिति । यदृच्छया—प्राचीनपुण्ययोगेन आकस्मिकतद्विषयमतिप्राबल्येन सर्वात्मत्वे सकृत्प्रसक्तमात्रोऽपि पुमान् सर्वपापविनिर्मुक्तः शिवलोके महीयते—पूज्यते, शिववत्पूज्यो भवतीत्यर्थः । सर्वभावविनिर्मुक्तः इति पाठे तु सर्वविषय-भावनाविनिर्मुक्तः इत्यर्थः ॥

दृढतरसार्वात्म्यभावनया आत्माभेदसिद्धिः

सर्वात्मभावना यस्य परिपक्वा महात्मनः ॥ ३८ ॥
संसारतारकः साक्षात् स एव परमेश्वरः ।

सकृत्सर्वात्मेश्वरभावावगमस्य च ईदृशं फलं, तदभ्यासस्य दृढतायां सकारणसंसारनाशः इति किमु वक्तव्यमित्याह—सर्वात्मभावना यस्येति ॥

उल्लासोपसंहारः

इति श्रीदक्षिणामूर्तिस्तोत्रार्थप्रतिपादके ॥ ३९ ॥
प्रबन्धे मानसोल्लासे तृतीयोल्लाससङ्ग्रहः ॥

तृतीयश्लोकव्याख्यामुपसंहरति ॥ इतीति ॥

इति मानसोल्लासे वृत्तान्ते च तृतीयोल्लासः समाप्तः ॥

—o—

चतुर्थः उल्लासः

आत्मसत्ताप्रकाशाभ्यामेव जगतः
सत्ताप्रकाशौ

नानाछिद्रघटोदरस्थितमहादीपप्रभाभास्वरं

चतुर्थश्लोकस्य—भावसामान्ये स्वतस्सत्ता-
स्फुरणनिषेधखण्डनपरत्वम्

स्वतः सन्तः प्रकाशन्ते भावाः घटपटादयः ।
नेश्वरस्य समावेशात् इत्यस्योत्तरमुच्यते ॥ १ ॥

तदेवं त्रिभिः श्लोकैः तत्त्वंपदार्थौ संशोध्य, तदैक्यं वाक्यार्थः प्रतिपादितः । एषः सर्ववेदान्तानां समन्वयः प्रथमः शास्त्रार्थः दर्शितः । इदानीं उक्ते समन्वयार्थे ब्रह्मात्माद्वैते तत्त्वे विरोधाशङ्कां प्रत्यक्षादिप्रमाणा-

---

अत्रेयं तत्त्वसुधा—

नच जगतः कथं आत्मसत्ताभानाभ्यां तद्वत्त्वम् ? आत्मवत् स्वत एव सत्ताप्रकाशौ जगतो भवेतां इत्याशङ्क्यम् , आत्मवत् जगतः स्वतस्सत्वे तद्वदेवोत्पत्तिविनाशानुपपत्तेः, तद्वदेव करणाद्यनपेक्षया सर्वदा भानप्रसङ्गाच्च न स्वतस्सत्ताप्रकाशौ भवतो जगतः ; किन्तु आत्मसत्ताप्रकाशाभ्यामेव जगतोऽपि सत्ताप्रकाशौ । नन्वेवं तर्हि सर्वस्य जगतः आत्मन्यध्यस्तत्वे भवन्मते कथं करणाद्यपेक्षा ? प्रकाशरूपात्मसम्बन्धादेव सर्वं सर्वदा किमिति न भायात् ? सर्वगतचैतन्यस्याविरोधेन अज्ञानावृतत्वे वा कथं कादाचित्कं जगतो भानम् ? अज्ञानस्य चैतन्यातिरिक्तनिवर्तकाभावात्, तस्य च अविरोधित्वात् इत्याशङ्क्याह—नानाच्छिद्रेति ॥

नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं—नानाच्छिद्रस्य अनेकरन्ध्रयुक्तस्य घटस्य कुम्भस्य उदरे अन्तः स्थितो वर्तमानो यो महादीपः तस्य प्रभेव भास्वरं भासनशीलं, दीपवत् तमोविरोधिलक्षणप्रकाशस्वभावं, यस्य—परमेश्वरस्य घटवदनेकच्छिद्रयुक्ते देहे अन्तःकरणे प्रतिबिम्बितस्य साक्षित्वेनावस्थितस्य स्वरूपभूतं

ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते ।

भासनिबन्धनां वादिमतिविलासनिबन्धनां च प्रतिक्षिप्य, तमेवोक्तं समन्वयार्थं दृढीकर्तुं उत्तरश्लोकत्रयं प्रववृते तत्र—

'आत्मसत्तैव सत्तैषां भावानां न ततोऽधिका ।

तथैव स्फुरणं चैषां नात्मस्फुरणतोऽधिकम्' ॥[1]

इति यदुक्तं पूर्वं सर्वभावानां स्वतस्सत्तास्फुरणराहित्यं, तदनुभवविरुद्धं, घटोऽस्ति घटः स्फुरतीति चानुभवात्, बाधादर्शनाच्च इति प्रथममाशङ्कते—स्वतः सन्तः इति ॥ स्वत एव सन्तः स्वत एव च प्रकाशन्ते, नेश्वरस्य समावेशात्, तस्य अदर्शनात्, तत्कल्पनायां प्रमाणाभावाच्चेति । अस्याक्षेपस्य उत्तरत्वेन उत्तरश्लोकमवतारयति—अस्योत्तरमुच्यत इति ॥ १ ॥

नाना—अनेकानि छिद्राणि यस्मिन् सः नानाछिद्रः, स चासौ घटश्चेति तथा, तस्योदरे—मध्ये स्थितो यो महादीपः—अक्षुद्रदीपः, तस्य प्रभावत् भास्वरं—अनन्याधीनालुप्तप्रकाशस्वरूपम् । यस्य—चिदात्मनः अनेकच्छिद्रवति देहे स्थितस्य ज्ञानं—स्वरूपभूतं चक्षुरादिकरणद्वारा—तत्तदिन्द्रियच्छिद्रमार्गेण बहिः—विषयेषु रूपादिषु स्पन्दते—गच्छति । यथा घटच्छिद्रेभ्यो विप्रसृताः दीपप्रभाः तत्सन्निहितान् विषयान् प्राप्य तदाकाराः

ज्ञानं—चैतन्यं चक्षुरादिकरणद्वारा—चक्षुश्श्रोत्रादीनि यानि करणानि विषयोपलब्धिसाधनानि तद्द्वारा तच्छिद्रेण, बहिः—विषयदेशे स्पन्दते—गच्छति । इन्द्रियाणां विषयसम्प्रयोगे तद्द्वारा चैतन्योपाध्यन्तःकरणे गच्छति सति तत्प्रतिबिम्बितं चैतन्यमपि गच्छति, गत्वा तं विषयं भासयतीत्यर्थः ।

अयमभिप्रायः—चैतन्यं तु स्वतोऽज्ञानाविरोध्यप्यन्तःकरणे प्रतिबिम्बितं सत् तद्विरोधि । अत एव अन्तःकरणधर्माः रागादयः स्वसत्तायां सर्वदा भासन्ते ।

---

[1] मानसोल्लासे. 3. 3.

जानामीति तमेव भान्तमनुभात्येतत् समस्तं जगत्

सत्यः तद्गतं तमः अभिभवन्ति, तथा देहच्छिद्रगतेन्द्रियद्वारा प्रसरन्मनोवृत्त्यवभासकतया तदात्मकतामापन्नानि चिदात्मस्वरूपाणि ज्ञानानि स्फुरणस्वभावानि तत्तदर्थं प्राप्य तदाकाराकारितानि विषयगतामज्ञाततां अभिभवन्ति, विषयप्रकाशशब्दवाच्यानि भवन्तीत्यर्थः। यस्य ज्ञानं एवंप्रकारेण बहिः स्पन्दते तस्मै नमः इति सम्बन्धः। उक्तमर्थं श्रुत्या द्रढयति—जानामीति। अहमिदं जानामीति स्वगतेन निरपेक्षप्रकाशरूपेण विषयमवभासयन् यः स्वयमेव भासते, तमेव भान्तं—प्रकाशमानं अनु—अनुसृत्य एतत् समस्तं जगत् भाति, न स्वतः इत्यक्षरयोजना। तथा च श्रुतिः—

'न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः'[1]।

घटपटादिविषयश्च बिम्बचैतन्ये ब्रह्मण्येवाध्यस्तः तिष्ठति। अन्तःकरणेन चक्षुरादिद्वारा विषयदेशं गच्छता घटाद्यधिष्ठानबिम्बचैतन्यमुपाधीयते। तथा च एकोपाधिसम्बन्धादन्तःकरणे प्रतिबिम्ब्य अवस्थितेन साक्षिचैतन्येन घटाद्यधिष्ठानचैतन्यमेकीभवति। ततस्साक्षिचैतन्येन तदज्ञाने निवृत्ते घटादिविषयो भासते न सर्वदा। अतोऽज्ञानावरणभङ्गार्थं चक्षुराद्यपेक्षेति न कोपि दोषः।

केचित्तु—अचिद्रूपात्मनिष्ठज्ञानेन घटदिविषयो भासते इति वदन्ति। तन्न। आत्मनिष्ठज्ञानस्य जडस्य स्वप्रकाशस्य वा घटादिविषयेण संयोगादिसम्बन्धाभावात्, स्वरूपसम्बन्धस्य च अतिप्रसक्तत्वात्।

केचित्तु विषयनिष्ठस्फुरणेन घटादिभानमिति कथयन्ति। तदपि न। विषयनिष्ठस्य आत्मना सह सम्बन्धाभावेन अहं जानामीति सम्बन्धप्रत्ययानुपपत्तेः।

---

[1] सर्वावभासकः सूर्योऽपि न तत्र परे ब्रह्मणि विषये अवभासकः भवति, नापि चन्द्रताराविद्युदग्नयः, तेषां अनात्मजातमात्रप्रकाशकत्वादित्यर्थः. मुं. उ. 2. 2. 10.

तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ४ ॥

इति सर्वप्रकारप्रकाशविषयत्वोक्त्या स्वप्रकाशत्वं प्रत्यग्ब्रह्मणः उपपाद्य

'तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति'[1] ॥

इति भासमानात्मप्रकाशानुविद्धं तत् सर्वं जगदवभासते इति निर्धारयति। तथा च एतत् समस्तं जगत् अग्निं दहन्तं अयोऽनु दहतीतिवत् यं[2] भान्तमनु सर्वं भातीत्युच्यते तदेवैकं सर्वविषयभानम्। न पुनर्विषयेषु भानान्तरं स्वतः परतो वा उपपद्यते इति तात्पर्यार्थः ॥ ४ ॥

अस्यायं भावः—

श्लोकव्याख्यां प्रतिजानीते—अस्यायं भाव इति।

तस्मादस्मदुक्तप्रकारेण स्वप्रकाशसाक्षिचैतन्यसम्बन्धादेव घटादिविषयभानमिति। तदेतदाह—जानामीत्यादिना। घटादिकमहं जानामीति घटादिविषयसम्बद्धतया भान्तं—प्रकाशमानं तमेव—साक्षित्वेनावस्थितं परमेश्वरमेव अनु पश्चात्, एतत्—विविधशब्दप्रत्ययगम्यं समस्तं—सर्वं जगत् भाति—प्रकाशते। अनुभानमपि न तस्य स्वतः, किन्तु अग्निं दहन्तमयोऽनुदहति[2] इतिवत् अध्यासादेवेत्यर्थः। तथा च श्रुतिः—'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति[1] इति। तस्[M] नमः ॥ ४ ॥

---

[1] यदिदं जगत् भाति तत् तमेव परमेश्वरं स्वतो भारूपत्वात् भान्तं दीप्यमानमनुदीप्यते, यथा जलोल्मुकाद्यग्निसंयोगात् अग्निं दहन्तमनुदहति, न स्वतः, एवं तस्यैव दीप्त्या सर्वमिदं सूर्यादि जगत विभातीत्यर्थः. मु. उ. 2. 2. 10.

[2] अग्निं दहन्तमयो दहति. क.

ईश्वरस्यैव स्वप्रकाशसद्रूपत्वम्
विषयाणां तदधीनसत्तास्फुरणवत्त्वं च

अहमित्यनुसन्धाता जानामीति न चेत् स्फुरेत् ।
कस्य को वा प्रकाशेत जगच्च स्यात् सुषुप्तवत् ॥ २ ॥

तत्र 'जानामीति तमेव भान्तम्' इति तृतीयपादभावार्थं वर्णयन्, ईशसंसर्गं विना विषयसत्तास्फुरणयोरङ्गीकारे बाधकं वक्तुं ईशस्य स्वप्रकाशसद्रूपतां साधयति—अहमित्यनुसन्धातेति ॥ जानामीत्यनुसन्धाता अहमिति न चेत् स्फुरेन् इति सम्बन्धः । यद्वा—जानामीत्यस्मिन्नवभासे अहमित्यनुसन्धाता चेन्न स्फुरेत् इति सम्बन्धः । तदा जगदान्ध्यं प्रसज्येतेत्युत्तरार्धार्थः । एतदुक्तं भवति—विषयाः यदि स्वत एव प्रकाशेरन् तदा अहं जानामीति ज्ञानाश्रयत्वेन विषयानुसन्धातुः स्फुरणं न स्यात् । तदभावे च शिलाघनपिहित गुहागतप्रदीपवत् मया विदितोऽयमिति कस्यापि नावभासेत । तथा च सुषुप्ताविव अप्रकाशमानस्य जगतः स्फुरणाभावात् न तद्व्यवहारप्रसङ्ग इत्यतः अन्याधीनस्फुरणं जगतः अभ्युपेयम् । यदधीनश्चास्य प्रकाशः सः नित्यप्रकाशरूपः एवास्थेयः, तस्यापि प्रकाश्यत्वे अनवस्थाप्रसङ्गादिति[1] ॥ २ ॥

प्रागूर्ध्वं चासतां सत्त्वं वर्तमानेऽपि न स्वतः ।
तस्मादीशे स्थितं सत्त्वं प्रागूर्ध्वत्वविवर्जिते ॥ ३ ॥

विषयाणां प्रकाशवत् सत्त्वमपि पराधीनमित्यत्र युक्तिमाह ॥ यद्वा—विषयाणामनन्याधीनप्रकाशत्वे विषयत्वानुपपत्तिप्रसङ्गमापाद्य अनन्याधीनसत्ता—

---

[1] इदं तु युक्तिनिरूपणधाटीमनुसृत्योक्तम्, विषयस्यैव तथात्वे बीजाङ्कुरन्यायेन अनवस्थायाः अदोषत्वात्. वस्तुतस्तु एवमुक्तिः स्वस्य यथार्थदर्शित्वमेव पर्यायतः प्रकटयतीति बोध्यम्.

यामपि तमापादयति—प्रागूर्ध्वं चेति । विमताः भावाः न स्वतस्सत्तावन्तः, कदाचिदेवोपलभ्यमानत्वात्, शुक्तिरजतादिवदित्यर्थः । तथा च प्रकाशवत् सत्ताऽप्यन्याधीना भावानामिति सिद्धमित्याह—तस्मादिति । अनन्याधीन-सत्तावत्त्वे अस्य आत्मवत् अनन्याधीनप्रकाशत्वापत्तौ विषयत्वानुपपत्तिरिति । ईश्वरस्य तु न प्रागूर्ध्वं च असत्त्वशङ्का अप्रकाशत्वशङ्का वा स्यात्, सर्व-भावानां आगमापायावधित्वेन तस्य सदा सत्त्वात्, सर्वावस्थसाक्षिप्रत्यगात्म-रूपेण सदा प्रकाशमानत्वाच्चेति भावः ॥ ३ ॥

विषयाणां स्वतः सत्तास्फुरणाङ्गीकारे दोषाः

स्वयमेव प्रकाशेरन् जडाः यदि विनेश्वरम् ।
सर्वं सर्वस्य भासेत न वा भासेत[1] किञ्चन ॥ ४ ॥

विषयत्वान्यथानुपपत्त्यैव ईश्वराधीना सत्ता स्फुरत्ता च विषयाणां आस्थे-येत्युक्तम् । इदानीं तदेव स्फुटयति—स्वयमेवेति ॥ विनेश्वरमिति । स्वतस्सिद्धप्रकाशस्वग्राहकमनपेक्ष्येत्यर्थः ॥ ४ ॥

तस्मात् सर्वज्ञमज्ञं वा जगत् स्यादेकरूपकम् ।
तुल्ये स्वयंप्रकाशत्वे जडचेतनयोर्मिथः ॥ ५ ॥
तुल्यमेव प्रसज्येरन् ग्राह्यग्राहकतादयः ।

सर्वं सर्वस्य भासतां, मा वा भासिष्ट, किं ततः? इति चेत् तत्राह—तस्मात् सर्वज्ञमिति ॥ यदि सर्वं सर्वस्य सदा भासेत, तदा सर्वः सर्वज्ञः स्यात्, यदि नैवं भासेत, तदा सर्वोऽपि अज्ञः स्यादिति योजना ॥

विषयाणामपि आत्मवत् स्वयंप्रकाशत्वे दूषणान्तरमाह—तुल्ये इति ।

---

1 नावभासेत. क.

इन्द्रियाणामनियमात् चाक्षुषाः स्युः रसादयः ॥ ६ ॥

ग्राह्यग्राहकव्यवस्थाऽनङ्गीकारे दोषमाह—इन्द्रियाणामिति ॥ सर्वस्य सर्वग्राह्यत्वे सर्वग्राहकत्वे चक्षुरपि रसादिग्राहकं स्यात्—रसादयोऽपि चक्षुर्ग्राहकाः स्युरित्यर्थः । तस्माद्विषयविषयिव्यवहारनियमस्य सर्वप्रकाशकत्ववादे विरोधप्रसङ्गात्, स्वतस्सत्तायां विषयाणां स्वरूपाव्यभिचारित्वप्रसङ्गात्, अन्याधीनसत्तास्फूर्तिकाः विषयाः, अन्यश्च स्वतस्सत्तास्फुरणवानीश्वर एव नान्यः इति सिद्धमिति पर्यवसितोऽर्थो बोद्धव्यः ॥ ६ ॥

ईश्वरे कर्तृत्वज्ञातृत्वव्यपदेशोपाधिः

मलिनामलिनादर्शपश्चात्प्राग्भागतुल्ययोः ।
क्रियाशक्तिज्ञानशक्त्योरन्तःकरणभागयोः ॥ ७ ॥
प्रतिबिम्बे स्फुरन्नीशः कर्ता ज्ञातेति कथ्यते ।

नन्वीश्वरो भावेषु सत्ताप्रकाशयोर्व्याप्रियते? न वा? न चेत्, न सत्ता भावानामीष्टे, सन्निदधतोऽपि आकाशवत् अकिंचित्करत्वात् । व्याप्रियते चेत्, विकारित्वापत्तौ अनित्यत्वात् अनीश्वरत्वप्रसङ्गः इति चेत्—नायं दोषः, स्वतो निर्व्यापारत्वात् उपाध्यायत्तव्यापारवत्त्वाच्चेति मत्वा कर्तृत्वज्ञातृत्वे ईश्वरस्योपपादयति—मलिनामलिनेति ॥ मलिनश्चामलिनश्च मलिनामलिनौ । आदर्शस्य पश्चात्प्राग्भागौ मलिनामलिनौ । मलिनामलिनौ च तावादर्शपश्चात्प्राग्भागौ चेति तथा तत्तुल्ययोरिति विग्रहः । एवंविधयोः क्रियाशक्तिज्ञानशक्त्योरन्तःकरणस्य भागयोः क्रियाशक्तिरूपो भागः प्राणः; स आदर्शस्य मलिनपश्चाद्भागतुल्यः; ज्ञानशक्तिर्मनोबुद्ध्यात्मको भागः; स आदर्शामलिनप्राग्भागतुल्यः इति विवेकः । भागयोरिति सप्तमीद्विवचनम् । तयोः प्रतिबिम्बः—प्रत्यगात्मनः प्रतिच्छाया । तस्मिन् प्रतिबिम्बे स्फुरन्—तद्गतप्रतिबिम्बाभेदेन स्फुरन् ईशः आत्मा कर्ता ज्ञानीति च कथ्यते ।

व्यापारवत्प्राणोपाधिः सत्तास्फूर्तिप्रदत्वेन अनुगमय्यमानः चिदात्मा करोतीति व्यपदिश्यते । परिणममानमनआद्युपाधिः[1] सत्तास्फूर्तिप्रदत्वेन अनुगम्यमानो जानातीति व्यपदेशभाक् भवतीत्यर्थः ॥

उपाधिरूपायाः बुद्धेः व्यापारः

बुद्धिः सत्त्वगुणोत्कर्षात् निर्मलो दर्पणो यथा ॥ ८ ॥
गृह्णाति विषयच्छायां आत्मच्छायाऽनुभावतः ।

बुद्धेः आवश्यकता

आत्मनो ज्ञातृतोपाधिज्ञानशक्तिरेव अन्तःकरणमित्युक्तं प्रपञ्चयति—बुद्धिरिति ॥ बुद्धिः स्वगतात्मच्छायानुभावतो विषयच्छायां गृण्हातीति सम्बन्धः । तत्र हेतुः—सत्त्वगुणोत्कर्षादिति । रजस्तमसोरुद्रेके लोभ-प्रमादादयो जायन्ते, तन्मा भूदिति सत्त्वोत्कर्षादित्युक्तम् । तथा च भगवानाह—

"सत्त्वात् संजायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च[2] ॥" इति ॥

अन्तःकरणसम्बन्धात् निखिलानीन्द्रियाण्यपि ॥ ९ ॥
रथाङ्गनेमिवलये कीलिता इव कीलकाः ।

इन्द्रियेषु विषयग्रहणोपाधिषु सत्सु किं बुद्ध्या? इत्याशङ्क्य तेषामपि तया विना नोपलब्धिसाधनत्वं इत्यभिप्रेत्याह—अन्तःकरणसम्बन्धादिति ॥ स्वभावतो बहिर्मुखप्रवृत्तानां इन्द्रियाणामपि प्रवर्तकाभावे[3] विषयनियमाभावात्

---

[1] वेदान्तिमते—सङ्कल्पविकल्पाद्यात्मकवृत्तिमदन्तःकरणं सुखाद्याधारं मनः. अत्र च 'कामः सङ्कल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिरधृतिः ह्रीः धीः भीः इत्येतत्सर्वं मन एव इति श्रुतिः प्रमाणम्. अन्तःकरणोपाधिरिति यावत्.

[2] ज्ञानं—कार्याकार्यविवेकज्ञानम्, अतितृष्णा-लोभः, अज्ञानं-प्रमादः, बुद्धिजाड्यं-मोहः, इतिकर्तव्यतानभिज्ञत्वं चात्र अज्ञानम्. गीता. 14. 17.

[3] प्रवृत्त्यङ्कुशाभावे. ग.

अन्तःकरणवृत्तेः तन्नियामकता वक्तव्या । तथा च रथाङ्गस्य—रथचक्रस्य नेमिसंज्ञे वलये कीलिताः—अर्पिताः कीलकाः अरा इव स्वस्वविषयेषु निखिलान्यपीन्द्रियाणि अन्तः करणेन नेमिस्थानीयेन नियामकेन सम्बन्धादर्पितानि भवन्तीत्यर्थः ॥

नाडीद्वारा इन्द्रियाणां सञ्चारक्रमः

नाड्योऽन्तःकरणे स्यूताः जालसंस्यूतसूत्रवत् ॥ १० ॥
ताभिस्तु गोळकान्ताभिः[1] प्रसर्पन्ति स्फुलिङ्गवत् ।
करणानि समस्तानि यथास्वं विषयं प्रति ॥ ११ ॥

इदानीं देहान्तरानुप्रविष्टतया जीवभावमापन्नस्येश्वरस्य उक्तोपाधिद्वारा अवस्थात्रययोगं वदिष्यन् तदनुभवसंचारस्थानं आदौ प्रपञ्चयति—नाड्य इत्यादिना ॥ नाड्यः—देहान्तराळगताः सिराः अन्तस्सुषिराः स्नाय्वाख्याः । ताः अन्तःकरणे ज्ञानक्रियाशक्तिसम्मूर्छिते लिङ्गे स्यूताः—ग्रथिताः । तत्र दृष्टान्तः—जालसंस्यूतसूत्रवदिति । यथा मत्स्यावरोधसाधनं जालं प्रसिद्धं, तत्र सम्यक्प्रोतानि सूत्राणि परस्पराविनाभूतानि, तथा सर्वविषयावरोधसाधने वृत्तिमदन्तःकरणे नाड्यः प्रोता वर्तन्ते इत्यर्थः । ताभिर्नाडीभिः द्वारभूताभिः पूर्वोक्तानि करणानि समस्तानीन्द्रियाणि मनोवृत्तिभिः सह यथास्वविषयं प्रति प्रसर्पन्ति— सञ्चरन्ति । कियत्पर्यन्ताभिरित्युच्यते—गोळकान्ताभिरिति । इन्द्रियायतनं इन्द्रियाभिव्यक्तिस्थानं देहदेशविशेषरूपं—गोळकं, तत्पर्यन्ताभिर्नाडीभिः प्रसर्पन्तीत्यर्थः । स्फुलिङ्गवदिति दृष्टान्तः स्पष्टः । गोळकान्तानीति पाठे करणविशेषणम् । सुषुप्तेर्जागरितं प्रत्यागमनं गोळकान्तपर्यन्तं भवतीत्यर्थः ॥ ११ ॥

---

[1] गोळकान्तानि· ख.

नाडीनां संख्यापरिमाणादयः, तत्र मूलाधारम्

देहस्य मध्यमं स्थानं मूलाधारमितीर्यते ।
गुदात्तु द्व्यङ्गुलादूर्ध्वं मेढ्रात्तु द्व्यङ्गुलादधः ॥ १२ ॥[1]
त्रिकोणोऽधोमुखाग्रश्च कन्यकायोनिसन्निभः ।

नाडीद्वारा इन्द्रियाणि सञ्चरन्तीत्युक्तं, तत्र काः नाड्यः? कियन्त्यः? किंपरिमाणाः? इति जिज्ञासायामाह—देहस्येति ॥ मध्यमं स्थानं मध्यमदेहदेशः । तदेव विशिष्य निर्दिशति—गुदादिति । गुदं—पायुः मेढ्रं—शिश्नः ॥ तस्य मूलाधारस्य लक्षणमाह—त्रिकोणे इति ॥ तदेव सादृश्योक्त्या बुद्धिमारोहयति—कन्यकेति ॥

मूलाधारदेवतायाः कुण्डलिन्याः परिचयः

यत्र कुण्डलिनी नाम परा शक्तिः प्रतिष्ठिता ॥ १३ ॥
प्राणाग्निबिन्दुनादानां सवित्री सा सरस्वती ।

तस्याधिष्ठात्रीं देवतां नामगुणाभ्यां निरूपयति—यत्रेति । परा शक्तिः—मूलप्रकृतिः, सा तत्र स्थिता सर्पकुण्डलाकारा कुण्डलिनीसंज्ञिता परात्मतेजसा दीप्ता सती प्राणादीनां सवित्री—प्रसवित्री । प्राणः—पञ्चवृत्तिको देहान्तस्संचारी वायुविशेषः । अग्निः—कोष्ठगतोष्मरूपः अन्नरसादीनां पाचकः । एतौ प्राणाग्नी अग्नीषोमौ चन्द्रसूर्याविति च योगशास्त्रे प्रसिद्धौ[2] ।

---

[1] मूलाधारस्य सुषुम्णापञ्चपर्वणां स्वाधिष्ठानमणिपूरानाहतविशुद्ध्याज्ञाचक्राणां सहस्रारस्य च तत्त्वानि तत्तत्तन्त्रग्रन्थेभ्यः ज्ञेयानि.

[2] 'अग्नीषोमात्मको देहः बिन्दुः यदुभयात्मकः, दक्षिणांशः स्मृतः सूर्यो वामभागो निशाकरः अग्नीषोमात्मकं विश्वं गीयते सचराचरम्' इति तु शारदातिलके. 1.39.

तत्र प्राणः चन्द्रमाः सोम इति चोच्यते, अग्निः सूर्य इति । एतौ च वक्ष्यमाणेडापिङ्गळयोर्देवते । बिन्दुः—अव्यक्तरूपः ध्वन्यवस्थाविशेषः । नादस्तु—सर्ववर्णसाधारणः ओङ्कारो घोषात्मा, यं कर्णौ अपिधाय शृण्वन्ति । एतेषां प्रसवः—सञ्चारः । तत्कर्त्री परा शक्तिः—देहमध्यस्थिता कुण्डलिनीत्यर्थः । सा प्राणघोषावस्थां प्राप्य वर्णात्मना अभिव्यज्यमाना सरस्वती इत्युच्यते ॥

मूलाधारस्यैव सुषुम्नामूलत्वम्

मूलाधाराग्रकोणस्था सुषुम्ना ब्रह्मरन्ध्रगा ॥ १४ ॥
मूलेऽर्धच्छिन्नवंशाभा षडाधारसमन्विता ।

एवं वक्ष्यमाणमहानाडीत्रयस्य मूलाधारं सोपस्करं ध्यानायोपदिश्य इदानीं ततो मध्यनाडीनिर्गममुपदिशति—मूलाधाराग्रकोणस्थेति ॥ मूलाधारस्य हि कोणत्रयं उक्तं । तत्र अग्रकोणस्था—अग्रकोणः अधःकोणः मुखं, तत्र स्थिता अभिव्यज्य आस्थिता, जातेति यावत् । सुषुम्नाख्या नाडी च सा ब्रह्मरन्ध्रं—शिरःकपालच्छिद्रं, तत्पर्यन्तं गता, एकरूपा अतिदीर्घा ऋज्वी चेत्यर्थः । तस्याः योगिगम्यं लक्षणमाह—मूले इति । अर्धच्छिन्नवंशवदवभासमाना मूले सूक्ष्मरन्ध्रेत्यर्थः । षड्भिराधारैः उत्तम्भकैः समन्विता, मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्ध्याज्ञाख्यैराधारैः क्रमेण चतुष्षड्दशद्वादशषोडशद्विदळकमलमयैः मूलाधारलिङ्गनाभिहृदयकण्ठभ्रूमध्यदेशगतैः समन्वितेत्यर्थः ॥

इडापिङ्गलयोः परिचयः

तत्पार्श्वकोणयोर्जाते द्वे इडापिङ्गले स्थिते[1] ॥ १५ ॥
नडीचक्रमिति प्राहुः तस्मात् नाड्यः समुद्गताः ।

सुषुम्नासन्निहितं नाडीद्वयमाह—तत्पार्श्वेति ॥ तस्याः सुषुम्नायाः पार्श्वयोः

---

[1] स्थिरे. क.

यौ द्वौ कोणौ मूलाधारस्य त्रिकोणस्य दक्षिणोत्तरौ उपरिभागौ तयोर्जाते निर्गते इडापिङ्गळे नाड्यौ स्थिते । वामपार्श्वे इडा, दक्षिणपार्श्वे पिङ्गळेत्यूह्यम् । एते च ललाटमूलमर्यन्तं प्रसृते इति ज्ञेयम् । उक्तं नाडीत्रयसन्निवेशलक्षणं—नाडीचक्रमिति । आहुः योगशास्त्रविदः इति शेषः । तस्मात् नाड्यो वक्ष्यमाणाः समुद्गताः विभक्ताः जायन्त इत्यर्थः ॥

स्वाधिष्ठानोद्गते गान्धारीहस्तिजिह्वे ऊर्ध्वमुखे

गान्धारी हस्तिजिह्वा च नयनान्तं प्रधावतः ॥ १६ ॥
नाडीचक्रेण संस्यूते नासिकान्तमुभे गते ।

एता एव नाडीः प्रधानतो नामभिर्निर्दिशति—गान्धारीत्यादिना ॥ आधारचक्रान्निर्गते नयनगोळकान्तं प्रसृते इत्यर्थः । एते गान्धारीहस्तिजिह्वाख्ये यदा नाडीचक्रेण पूर्वोक्तेन संस्यूते ग्रथिते भवेतां, तदा उभे एते नासिकान्तं गते भवतः । इडापिङ्गळयोर्वायुपूरणेनोर्ध्वोन्नमितावस्थायां ताभ्यामुन्नीयमाना नाड्यः अन्याः नासिकान्तमुन्नीयन्ते इत्यभिप्रायः । यद्वा—गान्धारी हस्तिजिह्वा च द्वे नाड्यौ स्वाधिष्ठानचक्रादुद्गते नाडीचक्रे संस्यूते स्वभावतो नासिकान्तं गते उन्नीयमानदशायां नयनान्तं प्रधावतः इति योजना ॥

मणिपूरोद्गताः ऊर्ध्वमुखाः इतरनाड्यः

नाभिमण्डलमाश्रित्य कुक्कुटाण्डमिव स्थितम् ॥ १७ ॥
पूषा चालम्बुषा नाडी कर्णद्वयमुपाश्रिते ।
नाडी शुक्लाह्वया तस्मात् भ्रूमध्यमुपसर्पति ॥ १८ ॥
सरस्वत्याह्वया नाडी जिह्वान्ता वाक्प्रसारिणी ।
नाडी विश्वोदरी नाम भुङ्क्तेऽन्नं सा चतुर्विधम् ॥ १९ ॥
पीत्वा पयस्विनी तोयं कण्ठस्था कुरुते क्षुतम् ।

इदानीं नाड्यन्तरोद्गमनस्थानमाह—नाभिमण्डलमिति ॥ मणिपूरचक्रस्थानमित्यर्थः । नाभिमण्डलस्योपमा—कुक्कुटाण्डमिवेति । तदाश्रित्य तत्पार्श्वयोः उभयतो निर्गते पूषा चालम्बुसा चेति प्रसिद्धे द्वे नाड्यौ कर्णद्वयमुपाश्रिते, तावत्पर्यन्तं प्रसृते इत्यर्थः । पूषालम्बुसयोरन्तराळे तस्मान्नाभिमण्डलादुद्गता शुक्लाह्वया नामतो वर्णतश्च शुक्ला नाडी भ्रूमध्यमुपसर्पति । तत्रैव स्थिता सरस्वत्याह्वया नाडी जिह्वान्तं जिह्वाग्रपर्यन्तं प्रसृता वाचः प्रसारणकर्त्री भवति । अन्या विश्वोदरी नाम नाडी या अस्ति सा चतुर्विधं लेह्यं चोष्यं भोज्यं भक्ष्यमित्येतत्प्रकारमन्नमदनीयं भुङ्क्ते जाठराग्निना पच्यमानरसं ग्रसति । पयस्विनी नामान्या नाडी पेयं तोयं पीत्वा कण्ठस्थाने स्थिता सती क्षुतं कुरुते । विश्वोदरी जठरस्था नाडी, पयस्विनी कण्ठस्था नाडीति ज्ञेया ॥

अधोमुखाः राकादिनाड्यः

नाडीचक्रात् समुद्भूताः नाड्यः तिस्रस्त्वधोमुखाः ॥ २० ॥
राका शुक्रं सिनीवाली मूत्रं मुञ्चेत् कुहूर्मलम् ।

एवमूर्ध्वगाः नाडीः सस्वकार्याः अनुक्रम्य अधोमुखाः तता सार्थाः उपक्रामति—नाडीचक्रादिति ॥ स्पष्टार्थः ॥

ऊर्ध्वमुखा शङ्खिनी

भुक्तान्नरसमादाय शङ्खिनी धमनी पुनः ॥ २१ ॥
कपालकुहरं गत्वा मूर्ध्नि सञ्चिनुते सुधाम् ।

अन्या पुनः शङ्खिनी नाम नाडी, नाडीचक्रादेव उद्गता धमनीधमनकर्त्री भुक्तान्नानां रसं सारमादाय मूर्ध्नि मस्तके सहस्रारपद्मस्थाने सुधाममृतं संचिनुते

सुधोपचयं[1] कुरुते । यां लम्बिकायोगलभ्यां मन्यन्ते योगिनस्तामित्यर्थः । किं कृत्वा ? कपालकुहरं शिरःकपालाकाशं गत्वा प्राप्येत्यर्थः ॥

ब्रह्मरंध्रं प्रतिगता सुषुम्ना

शतं चैका च नाड्यः स्युः तासामेका शिरोगता ॥ २२ ॥
तयोर्ध्वमायन् मुक्तः स्यादिति वेदान्तशासनम् ।

किं बहुना ? सन्त्यन्याः शतशो नाड्यः प्राणेन्द्रियमनःप्रचारमार्गभूताः इत्युपसंहरति—शतं चैका चेति । तासां एकोत्तरशतनाडीनां मध्ये एका सुषुम्नाख्या नाडी शिरो ब्रह्मरन्ध्रं प्रति गता । तस्याः कार्यमाह—तयेति । तया नाड्या ऊर्ध्वमर्चिरादिमार्गेण ब्रह्मलोकं प्रत्यायन् गच्छन् मुक्तः स्यात् विमुक्तसंसारबन्धनः स्यात् पुमान् । इति वेदानुशासनं, वेदान्तेषूक्तमित्यर्थः । तथा च वेदान्तवाक्यम्—

शतं चैका च हृदयस्य नाड्यः
तासां मूर्धानमभिनिस्सृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति
विष्वङ्ङन्या उत्क्रमणे भवन्ति[2] ॥ इति ॥

जीवस्य जाग्रदवस्था

यदा बुद्धिगतैः पुण्यैः प्रेरितेन्द्रियमार्गतः ॥ २३ ॥
शब्दादीन् विषयान् भुङ्क्ते तदा जागरितं भवेत् ।

इदानीं नाडीभेदतत्स्वभावकार्याद्यनुक्रमणप्रयोजनं चिदात्मनोऽवस्थात्रययोगोपपत्तिमनुक्रमते—यदा बुद्धिगतैरिति ॥ अयमर्थः—यद्यत्कर्मायमाचरति

---

[1] सदोपचयं. ग.

[2] कठोपनिषत्. 6. 16. हृदयस्य—हृदयाद्विनिःसृताः इत्यर्थः. एका-सुषुम्ण नाम. तया अन्तकाले हृदये आत्मानं वशीकृत्य योजयेत्. तया उपरि गच्छन् आभूतसंप्लवं स्थानं मुख्यं वा अमृतत्वं एति । नानाविधगतयः अन्याः नाड्यः उत्क्रमणे संसारप्रतिपत्त्यर्था एव भवन्तीत्यर्थः.

जीवस्तदा बुद्धिगतस्वचिदाभासद्वारा तदविविक्त[1] एव करोति न स्वत इति स्थितम्[2] । तथा च कृतसर्वकर्मकृतोतिशयः बुद्धिगत एवेति बुद्धिगतैः पुण्यैरित्युच्यते इति । एवं बुद्धिगतैः पुण्यैः प्रेरितानि यानीन्द्रियाणि । पुण्य-ग्रहणं श्रैष्ठ्याभिप्रायं, न तु पापव्यावृत्त्यर्थम्, अकल्याणदर्शनादेरपि दर्शनात्, 'तस्मात्तेनोभयं पश्यति[3] इत्यादिश्रुतेश्च । तथा च यथादेशकालनिमित्तोद्भव-पुण्यपापप्रेरितेन्द्रियमार्गैः पूर्वोक्तनाडीभिस्तत्तदिन्द्रियगोळकस्थानप्रसृताभिः, देहावकाशात् बहिः प्रसर्पद्भिरिन्द्रियैरिति यावत्, यदा अयं चिदात्मा शब्दा-दिविषयान् देहबाह्यान् आध्यात्मिकांश्च भुङ्क्ते—प्रत्यक्षादिभिः प्रमाणैरनु-भवति, तदाऽस्य जागरितं, जाग्रदवस्था भवेदित्यर्थः । तथा चोक्तम्, 'इन्द्रियैरर्थोपलब्धिर्जागरितम्' इति ॥

स्वप्नावस्था

संहृतेष्विन्द्रियेष्वेषु जाग्रत्संस्कारजान् पुमान् ॥ २४ ॥
मानसान् विषयान् भुङ्क्ते स्वप्नावस्था तदा भवेत् ।

स्वप्नावस्थाप्राप्तिमाह—संहृतेष्विति ॥ एष्विन्द्रियेषु देहगतनाडीछिद्रेषु उपसंहृतेषु सत्सु—नाडीजालसूत्रेणान्तःकरणेन प्राणसहितेन तत्तद्गोळकस्थाने-भ्योऽन्तर्हितेषु सत्यर्थः । यदा पुमान् आत्मा मानसान् जाग्रत्संस्कारवासित-मनःपरिणामरूपान् विषयान् भुङ्क्ते तदा स्वप्नावस्था भवेत् । तदप्युक्तं 'करणेषूपसंहृतेषु जागरितसंस्कारजः प्रत्ययः सविषयः[4] स्वप्नः' इति ॥

---

[1] तदभिव्यक्त. ग. [2] इति स्थितिः. ग.

[3] अथ ह चक्षुरुद्गीथमुपासांचक्रिरे तद्धासुराः पाप्मना विविधुः तस्मात् तेनोभयं पश्यति दर्शनीयं चादर्शनीयं च पाप्मना ह्येतद्विद्धम् इति पूर्णं वाक्यम्. असुराः चक्षुर्दृष्ट्या तूद्गीथाख्यमक्षरमोङ्कारमुपासांचक्रिरे इत्यर्थः. स्वेन पाप्मना विविधुः—संसर्गं कृतवन्तः इत्यर्थः.

[4] संस्कारजन्यविषयः. ग.

सुषुप्त्यवस्था

मनसोऽप्युपसंहारः सुषुप्तिरिति कथ्यते ॥ २५ ॥

सुषुप्त्यवस्थामाह—मनस इति ॥ सवासनस्य मनसः कारणरूपेणावस्थानं—उपसंहारः । सः यदा भवेत् तदा अस्यात्मनः सुषुप्तिरिति कथ्यते इत्यर्थः । तदुक्तं 'सर्वप्रकारज्ञानोपसंहारो बुद्धेः कारणात्मना अवस्थानं सुषुप्तिः' इति ।

आत्मनः मायोपाधिकत्वनिगमनम्

तस्मान्मायासमाच्छन्नः सन्मात्रो वर्तते पुमान् ।
मूढो मत्तोऽज्ञ इत्येवं मायावेशात् प्रकाशते ॥ २६ ॥

यस्मादेवमुपाधिगतविशेषावस्थोपाधिकाः एव चिदात्मनो जाग्रदाद्यवस्थाः, उपाधीनां च मायां विना चिदात्मसम्बन्धाभावश्च यस्मात्, तस्मादयं पुमान् आत्मा मायासमाच्छन्नः समावृतब्रह्मभावः सन्मात्रोऽस्तीत्येव व्यवहारयोग्यमात्रो वर्तते । यद्वा—सन्मात्रो निर्विकल्पकसत्तामात्रोऽप्ययं पुमान्, मायासमाच्छन्नो वर्तते इति योजना । तल्लिङ्गमाह—मूढ इति । स्वभावतश्चिदानन्दरूपे सन्देहविपर्यासाज्ञानाद्यविषये कथमन्यथाभावरूपमूढत्वाद्यवतारः इति भावः ॥ २६ ॥

आत्मनः सार्वदिकसच्चिदानन्दस्वरूपत्वे लिङ्गम्

सुखमस्वाप्समित्येवं प्रबोधसमये पुमान् ।
सच्चिदानन्दरूपःसन्[1] सम्यगेव प्रकाशते ॥ २७ ॥

सर्वदा स्वप्रकाशचित्सदानन्द एवात्मा इत्यत्रापि लिङ्गमाह—सुखमस्वाप्समिति ॥ अयमर्थः—सुखमिति स्वरूपमनागन्तुकस्वप्रकाशसदानन्दरूपं परामृश्यते । अस्वाप्समित्युपाध्युपशमः । न च सुषुप्तावागन्तुकं सुखमस्ति,

---

[1] सच्चिदानन्दरूपं च. ग.

तत्साधनाभावात्। न च व्यापारोपशम एवोपाध्युपशमकृतः सुखसाधनम्, अन्यनिवृत्तिमात्रेणान्योत्पत्तेः अदृष्टचरत्वात्, अभावात् भावोत्पत्तेरनङ्गीकाराच्च। न च दुःखाभाव एव सुखशब्देनोच्यत इति वाच्यं, तस्य सुषुप्तावनुभवसाधनाभावात्, अननुभूतस्य परामर्शायोगात्। न चेदं सौषुप्तदुःखाभावानुमानं न स्मरणमिति वक्तुं युक्तं, अस्मर्यमाणत्वादेर्व्यभिचारात्, सामग्र्यभावादेश्चासिद्धेरिति विस्तृतमन्यत्रेत्यास्तां तावत्। तस्मात् यथावस्थितमेव स्वरूपं तदा सुखम्। यतः निष्क्रियस्य निरंशस्य चिदात्मनः शयनं गमनं वा स्वापः प्रबोधो वा स्वतो न सम्भवति, अत उपाधिकृतमेवैतत्सर्वमिति उपाध्युपशम एव अस्य स्वापः अस्वाप्समित्युल्लिख्यते इति। अतः सर्वास्वप्यवस्थासु सच्चिदानन्दरूप एव अयमात्मेत्यर्थः ॥ २७ ॥

जगतः परप्रकाश्यत्वनिगमनम्

इत्थं जगत् समाविश्य भासमाने महेश्वरे।
सूर्यादयोऽपि भासन्ते किमुतान्ये घटादयः ॥ २८ ॥

एवं वर्णितेऽर्थे मूलसङ्गतिं विशदयति—इत्थमिति ॥ जगत् कारणं कार्यं च अज्ञानतत्कार्यद्वयात्मकं अवस्थात्रयं मायया समाविश्य विश्वतैजसप्राज्ञरूपेण वैश्वानरहिरण्यगर्भाव्याकृतरूपेण च आध्यात्मिकमाधिदैविकं च भासमाने महेश्वरे सति, सूर्यादयोऽपि सर्वार्थप्रकाशकतया प्रकाशस्वभावाः अपि भासन्ते, न स्वमहिम्ना। तत्र अप्रकाशस्वभावतया प्रसिद्धानां घटादिविषयाणां कुतः स्वभावप्रकाशशङ्का इत्यर्थः ॥ २८ ॥

सत्तास्फुरणयोः ईश्वरमात्रनिष्ठत्वे
प्रमाणप्रदर्शनं च

तस्मात् सत्ता च भावानां ईश्वराश्रयणाश्रया।
सत्यं ज्ञानमनन्तं[1] च श्रुत्या ब्रह्मोपदिश्यते ॥ २९ ॥

---

[1] तै. उ. 2. 1.

तस्मादीश्वर एव सत्तास्फुरत्ते इति निश्चीयेते तत्सम्पर्कादेवान्यत्र, इत्येतत्सिद्धं इत्युपसंहरति—तस्मादिति ॥ चकारः स्फुरत्तां गमयति । ईश्वरमाश्रयन्ते इति ईश्वराश्रयणाः ईश्वरव्याप्ताः आश्रयो यस्याः सा ईश्वराश्रयणाश्रया, ईश्वराध्यस्तविषयाश्रया, न स्वरूपसद्विषयगतेत्यर्थः । ईश्वरस्य स्वत एव सत्ताज्ञानस्वरूपत्वे प्रमाणमाह—सत्यं ज्ञानमिति । श्रुत्या[1] सत्यज्ञानानन्तशब्दैः ब्रह्मणो लक्षणमुक्तं 'सत्यं ज्ञानमनन्तं ब्रह्म'[2] इति । लक्षणं च—सजातीयविजातीयव्यावर्तकं सत् स्वरूपमात्रपर्यवसितमुच्यते, यदाहुर्नैयायिकाः—'असाधारणो धर्मो लक्षणम्'[3] इति । तत्र 'यतो वा इमानि भूतानि जायन्ते'[4] इत्यादिवाक्येन ब्रह्मोपलक्षणदशायां जगत्कारणत्वोपलक्षितस्य वादिपरिकल्पितप्रधानपरमाण्वादेः प्रसङ्गे जगत्कारणत्वेन ब्रह्मसजातीयाः प्रधानादयः प्रत्युपस्थिताः, विजातीयाश्च भूतभौतिकरूपाः कार्यवर्गाः । तेभ्यः उभयविधरूपेभ्यः अनृतजडपरिच्छिन्नस्वभावेभ्यो व्यावृत्तब्रह्मस्वरूपबोधकं वाक्यमिति स्थिते, सत्यज्ञाने सत्तास्फुरणरूपे ब्रह्मण एवासाधारणौ धर्मौ, नान्यस्य कस्यचिदिति निश्चीयते इत्यभिप्रायः ॥ २९ ॥

जगतः असत्यत्वजडत्वे

जाग्रत्स्वप्नोद्भवं सर्वं असत्यं जडमन्धवत् ।
ईश्वरश्चाहमित्येवं भासते सर्वजन्तुषु ॥ ३० ॥

एतच्छ्रुतिबलादेतत्सिद्धमित्याह— जाग्रदिति ॥ अथ वा—श्रुत्या ब्रह्मणि सत्यताद्यवधारणात् अर्थसिद्धमर्थमाह—जाग्रदिति ॥ विमतं असत्यं, जडत्वात्, मृगतृष्णिकोदकवत् । विमतं जडं, पराधीनचेष्टत्वात्, अन्धवत्, अन्धपङ्गुवदित्यर्थः ॥

---

[1] 'श्रुत्या' इति नास्ति. ग. [2] तै. उ. 2. 1. [3] तर्कभाषायाम्. [4] तै. उ. 3.1.

एवं सर्वजगदधिष्ठानरूपतया सर्वानुस्यूतस्येश्वरस्य सर्वसत्तास्फुरणात्मत्वमुपपाद्य तस्यैव प्रत्यगात्मत्वं पूर्वश्लोकोक्तमुपपादयति — ईश्वरश्चाहमिति । योऽहमिति सर्वजन्तुषु भासते, स ईश्वर एवेति योजना ॥ ३० ॥

अहङ्कारत्रैविध्यम्

निर्विकल्पश्च शुद्धश्च मलिनश्चेत्यहं त्रिधा ।

प्रतिज्ञातमर्थमुपपादयितुं अहङ्कारं भिनत्ति— निर्विकल्पश्चेति ॥

निर्विकल्पोऽहङ्कारः

निर्विकल्पं परं ब्रह्म निर्धूताखिलकल्पनम् ॥ ३१ ॥
धूल्यन्धकारधूमाभ्रनिर्मुक्तगगनोपमम् ।

तत्र निर्विकल्पः अहमवभासः ईश्वरविषय एवेत्याह— निर्विकल्पं परं ब्रह्मेति ॥ ब्रह्मणो निर्विकल्पत्वं विशदयति— निर्धूताखिलकल्पनमिति । निरस्तसमस्तविशेषतया अहमित्यवभासमानः आत्मा ब्रह्मैवेत्यर्थः । तदेवं दृष्टान्तेन स्पष्टयति— धूल्यन्धकारेति ॥

शुद्धोऽहङ्कारः

विवेकसमये शुद्धं देहादीनां व्यपोहनात् ॥ ३२ ॥
यथाऽन्तरिक्षं संक्षिप्तनक्षत्रैः किञ्चिदीक्ष्यते ।

नैवात्मा कदापि भासते इत्याशङ्क्य, स्वभावतः सर्वेषां भानाभावेऽपि, विचारिततत्त्वम्पदार्थतत्त्वस्य कदाचिद्भानं भवत्येवेत्यभिप्रेत्य, तत्साधनं शुद्धमहङ्कारमुदाहरति— विवेकसमये इति । विवेकसमये देहादीनां अनात्मत्वेन अहमवभास्यत्वस्य व्यपोहनात्, परिच्छेदकाभावात् शुद्धमेवात्मतत्त्वं ब्रह्म भासत इत्यर्थः । विवेकसमये भासमानं आकारं दृष्टान्तेन स्पष्टयन्, अस्य साक्षाद्ब्रह्मभावाद्विशेषमाह— यथाऽन्तरिक्षमिति । संक्षिप्तनक्षत्रैः उपशान्तद्यु-

प्रकाशैः उपलक्षितं अन्तरिक्षं आकाशं यथा किञ्चिदीक्ष्यते इति, ईक्षणकालस्य किञ्चित्त्वाभिप्रायं, एवमित्यर्थः ॥

मलिनोऽहङ्कारः

देहेन्द्रियादिसंसर्गात् मलिनं कलुषीकृतम् ॥ ३३ ॥
यथाऽऽकाशं तमोरूढं स्फुरत्यनवकाशवत् ।

तृतीयमहङ्कारं सर्वप्राणिसाधारणमाह—देहेन्द्रियादीति ॥ संसर्गः—अध्यासः । अनवकाशवत्—परिच्छिन्नमिवेत्यर्थः ॥

उत्तमाहम्भावफलम्

अहमित्यैश्वरं भावं यदा जीवः प्रबुध्यते ॥ ३४ ॥
सर्वज्ञः सर्वकर्ता च तदा जीवो भविष्यति ।

त्रिविधाहङ्कारनिर्देशस्य प्रयोजनमाह—अहमित्यैश्वरं भावमिति ॥ यदेति प्रबोधोत्पत्तिदौर्लभ्यं सूचयति । अत्र जीवस्य सर्वज्ञत्वादिभवनं न विधीयते, किन्तु सर्वज्ञत्वाद्युपलक्षितेश्वरस्वरूपेणाभिव्यक्तो भविष्यतीत्यर्थः ॥

शुद्धात्मभाने प्रयत्नस्यावश्यकता

माययाऽधिकसम्मूढो विद्ययेशः प्रकाशते ॥ ३५ ॥
निर्विकल्पानुसन्धाने सम्यगात्मा प्रकाशते ।

कथमन्यस्य अन्यात्मना अभिव्यक्तिः तात्त्विकी ? इत्याशङ्का न कार्या, अन्यत्वस्य जीवेश्वरयोः मायानिबन्धनत्वात् इत्याभिप्रेत्याह—माययेति ॥ तस्मात् मायानिवृत्तये निर्विकल्पात्मावभासने यत्नः कार्यः इत्याह—निर्विकल्पानुसन्धाने इति ॥

निगमनम्

अविद्याख्यतिरोधानव्यपाये परमेश्वरः ॥ ३६ ॥
दक्षिणामूर्तिरूपोऽसौ स्वयमेव प्रकाशते ।

प्रकरणार्थमुपसंहरति—अविद्याख्येति ॥

उल्लासोपसंहारः

इति श्रीदक्षिणामूर्तिस्तोत्रार्थप्रदिपादके ॥ ३७ ॥
प्रबन्धे मानसोल्लासे चतुर्थोल्लाससङ्ग्रहः ॥

चतुर्थश्लोकव्याख्यामुपसंहरति—इति ति ॥

इति मानसोल्लासे वृत्तान्ते च चतुर्थोल्लासः समाप्तः.

—o—

अथ पञ्चमोल्लासः

चार्वाकसंमतो देहात्मवादः

प्रमाणमेकं प्रत्यक्षं तत्त्वं भूतचतुष्टयम् ।
मोक्षश्च मरणान्नान्यः कामार्थौ पुरुषार्थकौ ॥ १ ॥

पूर्वश्लोकव्याख्यानेन प्रत्यक्षादिप्रमाणाभासनिबन्धना ब्रह्मात्मैकत्ववाक्यार्थे विरोधाशङ्का परिहृता । इदानीं पञ्चमेन श्लोकेन वावदूकानां मतिविलसितकल्पनानिबन्धनां विरोधाशङ्कां परिहर्तुं, तेषां मतान्युपन्यस्यति—प्रमाणमेकमित्यादिना । परमनास्तिकः चार्वाको मन्यते—एकं प्रत्यक्षमेव प्रमाणं नानुमानादीनीति । अस्यायमभिप्रायः—प्रत्यक्षातिरिक्तेन प्रमाणेन यदस्तीति गृह्यते तत् यावत्प्रत्यक्षेण न संवाद्यते तावन्न विश्वासार्हं भवति, भूयस्तु स्थलेषु व्यभिचारोपलम्भात्, प्रत्यक्षदृष्टस्य चाव्यभिचारात्, अतः प्रत्क्षमेवैकं प्रमाणमिति । भूतचतुष्टयं—पृथिव्यप्तेजोवायवः, तत्त्वं—पदार्थतत्त्वम् । न त्वाकाशादयः पदार्थाः सन्ति, तेषामप्रत्यक्षत्वात् । वायुस्तु अस्माकं प्रत्यक्ष एवेत्यभिप्रायः । प्रमाणं प्रमेयं चोक्त्वा पुरुषार्थतत्त्वमाह—मोक्षश्चेति । मरणादन्यो नास्ति मोक्षो नाम पुरुषार्थः इत्यर्थः । चकारात् धर्मोऽपि न पुरुषार्थः इति समुच्चीयते । परिशेषात् कामार्थौ द्वौ प्रसिद्धौ पुरुषार्थौ—पुरुषेणाभिलषणीयौ सम्पाद्यौ च । तत्रापि अर्थः—कामसाधनत्वेनैवाभिलाषगोचरः, कामस्तु साक्षादिति विवेकः ॥ १ ॥

तर्कतः ईश्वरापलापः

न हि खल्वीश्वरः[1] कर्ता परलोककथा वृथा ।

ननु भूतचतुष्टयमेव प्रमेयमिति कुतः? तस्य परिणमयितुः ईश्वरस्य

---

[1] नकश्चिदीश्वरः. क.

तद्विलक्षणस्याङ्गीकरणीयत्वात्, तथा जन्मत एव प्राणिनां सुखदुःखवैचित्र्य-दर्शनात्, तद्धेतुभूतौ पूर्वकृतधर्माधर्मौ स्त एवेत्यप्यङ्गीकार्यत्वात्, कारणवैचित्र्यमन्तरेण कार्यवैचित्र्यायोगात् इत्याशङ्क्याह—न हि खल्विति[1] ॥ भावानां स्वभावत एव परिणामोपपत्तेः प्रतिव्यक्ति परिणमयितुः अन्यस्य उपलम्भाभावाच्च । न हि धनुर्मुक्तेषोः गमयिता कश्चिदुपलभ्यते, कृषीवलोप्तानां बीजानां वा परिणमयिता । यदि स्यात् तदा उपलभ्येत, तदभावाच्च तदभावः इति प्रत्यक्षः । कुत ईश्वरकल्पनावकाशः ? तथा सुखादिवैचित्र्यस्यापि तत्तत्सङ्घातस्वभावादेवोपपत्तौ नालौकिको हेतुः कल्प्यः इति । उक्तं च—

स्वर्गः कर्तृक्रियाद्रव्यनाशेऽपि यदि यज्वनाम् ।
भवेत् दावाग्निदग्धानां फलं स्याद्भूरि भूरुहाम्[2] ॥ इति ॥

तत्कृतः आत्मापलापः

देहं विनाऽस्ति चेदात्मा कुम्भवत् दृश्यतां पुरः ॥ २ ॥
ह्रस्वो दीर्घो युवा बालः इति देहो भिदृश्यते ।

तथा देहातिरिक्तात्मकल्पनाऽपि प्रत्यक्षविरुद्धेत्याह—देहं विनेति ॥ अमूर्तद्रव्यस्य सद्भावसाधकाभावादिति भावः । देहस्यात्मत्वे अस्ति प्रमाणं प्रत्यक्षानुभवः इत्याह—ह्रस्वो दीर्घ इति ॥

अस्ति जातः परिणतो वृद्धः क्षीणो जरन् मृतः ॥ ३ ॥
इत्येवमुक्ताः षड्भावविकाराः देहसंश्रयाः ।

षड्भावविकाराः देहसंश्रया एवोक्ताः, न तदतिरिक्तात्मसंश्रयाः । तस्मात् विकार्यप्यात्मा न देहादन्योऽस्तीत्यर्थः ॥

---

[1] नकश्चिदिति. क. [2] भूरुहां—वृक्षाणाम्.

वर्णाश्रमविभागश्च देहेष्वेव प्रतिष्ठितः ॥ ४ ॥
जातकर्मादिसंस्कारो देहस्यैव विधीयते ।
शतं जीवेति[1] देहस्य प्रयुञ्जन्त्याशिषं शुभाम् ॥ ५ ॥

किञ्च—आस्तिकानां शास्त्रीयोऽपि व्यवहारः देहाश्रयो दृश्यते इति तदतिरिक्तात्मकल्पनं तेषामप्रामाणिकमेवेत्याह—वर्णाश्रमविभागश्चेति ॥

इति प्रपञ्चं चार्वाको वाचयत्यल्पचेतनः ।

चार्वाककल्पनोपन्यासमुपसंहरति—इति प्रपञ्चमिति । वाचयति—शिष्यान् पाठयतीत्यर्थः । अल्पचेतनः—अतिस्थूलमतिरित्यर्थः ॥

प्राणात्मवादः

केचिच्छ्वसिमि जीवामि क्षुधितोऽस्मि पिपासितः ॥ ६ ॥
इत्यादिप्रत्ययबलात् प्राण आत्मेति मन्वते ।

अस्मादीषत्सूक्ष्ममतिकल्पनामाह—केचिदिति ॥ यदि भूतसङ्घातमात्रो देह एव श्वासादि कुर्वीत, तर्हि मृतदेहस्यापि तद्रूपत्वाविशेषात् श्वासादिव्यापारप्रसङ्गः । अतोऽपि देहातिरिक्तः प्राणः आत्मेति केचित् मन्यन्ते इत्यर्थः ॥

इन्द्रियात्मवादः

केचिच्छृणोमि पश्यामि जिघ्रामि स्पन्दयाम्यहम् ॥ ७ ॥
इतीन्द्रियाणामात्मत्वं प्रतियन्ति ततोऽधिकम् ।

एतन्मतैकदेशिमतमाह—केचिच्छृणोमीति ॥ अहमनुभवस्येन्द्रियव्यापारायत्तत्वात्, तदतिरिक्तस्य देहचालकस्य प्राणस्य सद्भावे प्रमाणाभात्,

---

[1] शतं शरद आयुषो जीव पुत्र. कौ. त. 2. 11. शतं जीव शरदो वर्धमानः. इति च ब्राह्मणम् .

इन्द्रियोपरमे स्वापे देहचलनादर्शनात्, तत्र दृश्यमानस्य श्वासादेः भ्रान्तिमात्रत्वात्, इन्द्रियाणां च युगपद्भोगादर्शनात्, नियतभोगविशेषवत्त्वाच्च, व्यस्तान्येवेन्द्रियाणि एकशरीरमारूढानि; अत एव अनेके आत्मानः इति इन्द्रियात्मवादिनो मतमित्यर्थः। अत्रेन्द्रियात्मवादोपन्यासानन्तरं प्राणात्मवादोपन्यासो द्रष्टव्यः। तत्र च इन्द्रियोपरमेऽपि प्राणव्यापारानुपरमादिति युक्तिरनुसन्धेया। पाठक्रमस्तु मूलश्लोकानुरोधादिति भाव्यम्॥

क्षणिकविज्ञानात्मवादः

जानामिप्रत्ययबलात् बुद्धिरित्यपरे जगुः॥ ८॥

इदानीं बौद्धमतमाह—जानामीति॥ बुद्धिः क्षणिकविज्ञानमात्मेति अपरे विज्ञानवादिप्रभृतयो बौद्धाः जगुरित्यर्थः। इन्द्रियाभावेपि स्वप्ने बुद्धेरविकलायाः सत्त्वात्, व्यासङ्गदशायामिन्द्रियसम्बन्धेऽप्यर्थे व्यवहारानुदयात् तदतिरिक्ता बुद्धिरात्मेत्यर्थः।

शून्यवादादयः

उपलक्षणमेतच्छून्यवादिमतस्यापि। स हि—सुषुप्तौ विज्ञानस्याप्यभावात्, अवस्थाऽन्तरे अहमित्यकस्मात् अहङ्कारोदयस्य संवृतिमात्रत्वात्, शून्यं आत्मेति वदति। अन्यान्यास्तिकमतान्यपि अद्वैतमतविरोधीनीत्यत्रोपन्यस्तानि द्रष्टव्यानीति॥

उत्तरश्लोकस्य एतत्सर्वमतखण्डनपरत्वम्

मायाव्यामूढचित्तानां तेषां दूषणमुच्यते।

उक्तमतकल्पनानां मायाभ्रान्तिमूलकत्वात् न तेषु विश्वासः कार्यः प्रामाणिकैरिति दूषणाय उत्तरश्लोकमुत्थापयति—मायाव्यामूढचित्तानामिति॥

श्रीगुरुप्रसादादेव सर्वविधव्यामोह
निवृत्तिकथनम्

देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्रीबालान्धजडोपमास्त्वहमिति भ्रान्ताः भृशं वादिनः ।

देहं प्राणमपीन्द्रियाणीति । चलां बुद्धिं—क्षणिकां बुद्धिं ये वादिनः अहमात्मेति देहं प्राणमित्यादि विदुः—जानन्ति, ते भृशं—अत्यन्तं भ्रान्ताः, यतो विवेकशून्याः इत्याह—स्त्रीबालेति ॥ जडाः—ग्रहग्रस्ताः । कुत

अत्रेयं तत्त्वसुधा—

अत्र केचित्—सर्वमेतदभित्तिचित्रं, देहव्यतिरिक्तस्य आत्मन एवाभावात् । देहस्यैव गच्छामि तिष्ठामि स्थूलोऽहं कृशोऽहं इत्यात्मत्वानुभवादिति वदन्ति ॥ अन्ये केचित्—तान् हस्तेन वारयन्तः आहुः—जीवात्मनिर्गमे शरीरमरणस्य दर्शनात्, वच्मि पश्यामि शृणोमि इत्यादिबुद्धिदर्शनात् इन्द्रियाण्येवात्मेति । ततोऽप्यन्ये केचित् ईषच्छुद्धबुद्धयः चक्षुरादीन्द्रियनाशेऽपि प्राणसत्त्वे जीवनदर्शनात्, अन्यथाऽदर्शनात्, बुभुक्षितोऽहं पिपासितोऽहं इत्यादिप्रतीतेश्च, प्राण एवात्मेति भणन्ति । इतरे तु—प्राणस्य बाह्यवायुवज्जडत्वेन भोक्तृत्वाद्यसम्भवात् मन एव चेतनं भोक्तृ च आत्मेति वदन्ति । योगाचारस्तु—मम मन इति भिन्नतया प्रतीयमानस्य आत्मत्वासम्भवात्, क्षणिकविज्ञानं अहमिति प्रतीयमानं बुद्धिशब्दापरपर्यायं संसारीति जल्पति । तद्धिक्कृत्य अन्यः कश्चित् विद्युदभ्रनिमेषादिवत् क्षणिकस्य तस्यात्मत्वानुपपत्तेः, सुषुप्तौ तस्याप्यभावादन्यस्याप्यनुपलब्धेः शून्यमेवात्मेत्युद्गिरति । एते च स्वस्वपक्षदार्ढ्याय इतस्ततश्च यां कांचित् श्रुतिमादायोदाहरन्ति । अन्ये चैतदन्यथा आत्मस्वरूपं फणन्ति । सर्वे ते दैवोपहतचित्ताः[1] भ्रान्ताः सकलश्रुतिस्मृतीतिहासपुराणन्यायविद्वत्प्रत्यक्षविरु-

---

[1] तेषां शास्त्रयुक्त्यनुभवप्रयोगादिसकलसामग्रीसंविधानपूर्वकं बोधने उपदेशे प्रदर्शने च बुद्धौ सत्यार्थानारोहात् असंक्रमाच्च दैवोपहतचित्तत्वोक्तिः, अन्यथा यं हि रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तम्' इत्युक्तप्रकारेण सद्बुद्ध्या योजनस्यैव दर्शनात् ·

मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे

एतदिति चेत्, सर्वासां कल्पनानां मिथोविरुद्धत्वेन विप्रतिपत्त्यास्पदत्वात्, तस्याश्च एकस्मिन् धर्मिणि विरुद्धकोट्यालिङ्गनरूपत्वात्। सर्वविकल्पास्पदतया विकल्पोत्पत्तेः प्राक् सिद्धं सर्वकल्पनामागमापायसाक्षिभूतं सत्यज्ञानानन्द-स्वभावं आत्मेश्वरतत्त्वं अवश्याश्रयणीयं, यत्स्वरूपानवगमात् विकल्पोदयः,

---

द्धार्थपरिग्राहकाः, नैतेषां मार्गः आत्मनः श्रेयोऽर्थिभिः स्वप्नेऽप्यनुसरणीयः[1] इत्यभिप्रेत्याह—देहं प्राणमपीति ॥

देहं—सशिरस्कं पिण्डं, प्राणं—पञ्चवृत्तिकं मुखनासिकसञ्चारिणं, इन्द्रियाणि—चक्षुरादीनि तत्तद्गोळकवृत्तीनि रूपादिग्राहकाणि, चलां—क्षणिकां सन्ततोदयां बुद्धिं—विज्ञानं, शून्यं—तुच्छम्, चकारात् तार्किकाद्यभिमतात्मानम्, वादिनः—चार्वाकादयः, स्त्रीबालान्धजडोपमाः—स्त्रीबालान्धजडवद्विवेकविज्ञानरहिताः, अत एव भ्रान्ताः—तत्त्वमन्यथा प्रतिपद्यमानाः, अहमिति विदुः—आत्मत्वेन जानन्ति, अन्यानुपदिशन्ति चेत्यर्थः।

नन्वेते वादिनः परीक्षका अपि किमित्येवं नास्तिकास्सन्तः अन्यथाऽन्यथा तत्त्वं प्रतिपद्यन्ते? इति चेन् ईश्वरानुग्रहाभावात्। ये त्वास्तिकाः श्रुतिस्मृत्युक्तमार्गेण कर्मानुष्ठानेन भगवन्तं परमेश्वरं सेवन्ते, तेषां परमेश्वरप्रसादात् नैतादृशो व्यामोहः इत्यभिप्रेत्याह— मायेत्यादिना। मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे—भगवतः परमेश्वरस्यानाद्यनिर्वचनीया या मायाशक्तिः—परव्यामोहिका तस्याः विलासेन एकदेशेन कल्पितो यो महाव्यामोहः महान् अनन्तोऽपरिमाणश्च व्यामोहः—देहाद्यात्मत्वभ्रमः, तं संहर्तुं—नाशयितुं शीलमस्येति स तथोक्तः। तस्मै नमः। तथा चोक्तं श्रीभागवते—

---

[1] 'हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्' इति ह्युक्तम्.

तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ५ ॥

यदवगमे च सति तद्बाधः इत्यभिप्रेत्याह—मायाशक्तीति । अक्षरार्थः सुगमः ॥ ५ ॥

इदमस्य तात्पर्यम्—

उक्तसर्वमतानां सामान्यतो दूषणम्

देहादीनां जडार्थानां पाषाणवदनात्मनाम् ॥ ९ ॥

कथं भवेदहम्भावः समावेशं[4] विनेशितुः ।

पञ्चमश्लोकव्याख्यां प्रतिजानीते—इदमस्येति ॥ अत्रेदं वादिनः प्रष्टव्याः—देहादयो बुद्ध्यन्ताः चेतनाः अचेतना वा? इति । तत्राद्यो न प्रामाणिकः इत्याह—देहादीनामिति ॥ जडाश्च ते अर्थाश्चेति जडार्थाः । तेषामिति विग्रहः । अर्थाः—विषयाः दृश्याः इत्यर्थः । विमताः अनात्मानः, जडत्वात्, पाषाणवत्; जडत्वं च दृश्यत्वात् तद्वदेवेत्यर्थः ।

येषां स एव[1] भगवान् दययेदनन्तः
सर्वात्मनाऽऽश्रितपदो यदि निर्व्यलीकम्
ते दुस्तरामतितरन्ति च[2] देवमायां
नैषां ममाहमिति धीः श्वसृगालभक्ष्ये ॥[3] इति ॥ ५ ॥

---

[1] स एषः. च. [2] तरन्त्यथ. च.

[3] भगवता ब्रह्मणा नारदाय कृष्णमहिमावर्णनप्रसङ्गे उक्तमिदम्—भगवतो गुणान् यदि केऽपि न विदन्त्येव तर्हि कथं वा मायायाः परं पारं तरन्ति, कथं वा विमुच्येरन्, इति शङ्कायां केवलं तत्कृपयैवेत्याह येषामिति । असत्यरहितं यथातथा सर्वप्रकारैरपि आश्रितपदो भगवान् येषु कृपां कुर्यात्, ते अनाश्रितैः तर्तुमशक्यामपि देवमायां वैष्णवीं मायां अतितरन्ति, नैव ते प्रकृतिवश्याः भवन्ति । एषां च श्वसृगालादिभिः भक्ष्यमाणे शरीरे आत्मबुद्धिर्वा आत्मीयताबुद्धिर्वा नैव संभवेच्च इत्यर्थः । अत्र च 'मामेव ये प्रपद्यन्ते मायामेतां तरन्तिते' इति च गीता अनुसन्धेया.

[4] समावेशः एकत्रसहावस्थानम्.

तस्मात् सालभञ्जिका[1]तुल्यानामेषां कथं स्वतश्चिदात्मकेश्वरसमावेशं विना अहम्भावः चेतनता भवेदिति योजना ॥

युक्त्या देहात्मवादनिरासः

देहस्तावदयं नात्मा दृश्यत्वात् जाड्यवत्त्वतः ॥ १० ॥
रूपादिमत्त्वात् सांशत्वात् भौतिकत्वाच्च कुम्भवत् ।

एवं साधारणदूषणमुक्त्वा प्रत्येकं दूषणमाह—देहस्तावदयमिति ॥ दृश्यत्वं—पराधीनप्रकाशत्वम् । न चास्मदभिमतात्मनि व्यभिचारः, तस्य स्वप्रकाशत्वाङ्गीकारात् । जाड्यवत्त्वं—स्फुरणभिन्नत्वम् । न हि देहः स्फुरणात्मा, स्वसत्तायां स्फुरणव्यभिचारात् स्तम्भवत् । रूपादिमत्त्वादयः प्रसिद्धा एव हेतवः न चात्र साध्याप्रसिद्धिः, देहातिरिक्तस्यात्मनः अप्रसिद्धत्वात्, तत्प्रतियोगिकान्यत्वस्य अनात्मत्वस्य च अप्रसिद्धेरिति वाच्यम्; अहमवभासगोचरमात्रे सर्वेषां वादिनां आत्मत्वप्रसिद्धेः, तदन्यत्वस्य च घटादौ प्रसिद्धत्वादिति ॥

एतदनङ्गीकारे बाधकप्रदर्शनम्

मूर्छा[2]सुषुप्तिमरणेष्वपि देहः प्रदृश्यते ॥ ११ ॥
देहादिव्यतिरिक्तत्वात् तदात्मा न प्रतीयते ।

उक्तानुमानेषु अप्रयोजकत्वशङ्कानिवृत्तये विपक्षबाधकं तर्कमाह—मूर्छेति ॥ यदि देह एवात्मा स्यात् तदा तस्मिन् अवभासमाने आत्मानवभासो न स्यात् । भवति च मूर्छाद्यवस्थास्वात्मानवगमः सम्प्रतिपन्नः । अतः

---

[1] सालभञ्जिका—पाञ्चालिका पुत्तलिकेति यावत् ·

[2] मूर्छा—मोहः. तदुक्तं भावप्रकाशने—क्षीणस्य बहुदोषस्य विरुद्धाहारसेविनः, वेगाघातादभीघातात् हीनसत्त्वस्य वा पुनः, करणायतनेषूग्रा बाह्येष्वभ्यन्तरेषु च, निविशन्ते यदा दोषाः तदा मूर्छन्ति मानवाः इति· अवस्थात्रयातिरिक्तः बाह्येन्द्रियव्यापारशून्यः अवस्थाविशेषः मूर्छा·

तास्ववस्थासु अहमित्यनवभासमानः अवस्थाऽन्तरे च अवभासमानः आत्मा देहादन्य एवेति सिद्धमित्यर्थः ॥ ११ ॥

उक्तार्थसाधकं युक्त्यन्तरम्

यथा जगत्प्रवृत्तीनां आदिकारणमंशुमान् ॥ १२ ॥
पुमांस्तथैव देहादिप्रवृत्तौ कारणं परम् ॥
मम देहोऽयमित्येवं स्त्री[1] बालोऽन्धश्च मन्यते ॥ १३ ॥
देहोऽहमिति नावैति कदाचिदपि कश्चन ।

देहातिरिक्तात्मसद्भावे अनुमानान्तरमाह—यथेति ॥ गाढान्धकारव्याप्तगुहान्तस्स्थदेहव्यापारः देहातिरिक्तप्रकाशसंसर्गनिमित्तः, देहव्यापारत्वात्, दिवा बहिर्दिवाकरप्रकाशसान्निध्यनिमित्तदेहव्यापारवदित्यर्थः । अपि च—देहो नात्मा, ममप्रत्ययविषयत्वात् वस्त्रादिवत् । न चायमप्रसिद्धो हेतुः, अस्यानुभवस्य सार्वजनीनत्वादित्यर्थः । यद्ययं देह आत्मा भवेत् तदा अहं मनुष्यः इतिवत् अहं देहः इत्यपि स्फुरेत् । न चैवमस्ति, अतो न देहः आत्मेत्यर्थः । न च मनुष्योऽहं इत्यनुभव एव देहात्मानुभवः, तस्य अहमनुभवव्यभिचारात् । तथाहि—जाग्रदवस्थायां मनुष्योऽहं इत्यभिमन्यमानः, स्वप्ने कदाचित् व्याघ्रोऽहं इत्यभिमन्यते; तत्र अहमनुभवाव्यावृत्तावपि मनुष्यत्वाद्यनुभवस्य व्यावृत्तेः मनुष्यत्वादिधर्मकदेहादन्य एव अहमवभासविषयः आत्मेति सिद्धं देहातिरिक्तात्मास्तित्वमिति ॥

अनुमानप्रमाणस्य अवश्याङ्गीकार्यता

ननु प्रत्यक्षैकप्रमाणवादिनं चार्वाकं प्रति अनुमानैर्देहातिरिक्तात्मास्तित्वसाधनमसङ्गतमिति चेत्, अत्र ब्रूमः—अनुमानाद्यनभ्युपगमे प्रतिवाद्यभिप्रायस्य प्रत्यक्षाविषयत्वात् तदुक्तिमार्गादिसमाश्रयणमन्तरेण तं प्रत्याक्षेपसमाधानादिप्रवृत्त्यनुपपत्तेः, यत्किञ्चित्कल्पयित्वा वदतः अनवधेयवचनत्वात् वादित्वं प्रति-

[1] केवलप्रकृत्यायत्तजीवितार्थकोऽयं स्त्रीशब्दः भाव्यः

वादित्वं वा न भवेदिति विद्वद्भिरस्योपेक्षणीयतापत्तिः । पूर्वदृष्टसजातीयत्वादिना लिङ्गेन दृश्यमानेष्वर्थेष्विष्टानिष्टसाधनत्वानुमानाप्रवृत्तौ प्रवृत्तिनिवृत्तिव्यवहारानुदयात् जीवनमप्यस्य दुर्लभमिति अनुमानादेः अनेन अवश्याश्रयणीयत्वात् युक्तमेव अनुमानात् देहातिरिक्तात्मसाधनमिति सर्वमवदातम् । तथा च—परलोकादिनास्तिक्यवादः अस्य प्रलापमात्रमित्युपेक्षणीयमेतदिति ॥ १३ ॥

इन्द्रियात्मवादनिरासः

इन्द्रियाण्यपि नात्मानः करणत्वात् प्रदीपवत् ॥ १४ ॥

इन्द्रियाण्यपि नात्मानः इतीन्द्रियात्मवादिमतनिराकरणग्रन्थः प्रायः स्पष्टार्थः ॥ १४ ॥

इन्द्रियाणां करणत्वसाधनम्

वीणावादनवत्[1] श्रोत्रं शब्दग्रहणसाधनम् ।
चक्षुस्तेजस्त्रितयवद्रूपग्रहणसाधनम् ॥ १५ ॥
गन्धस्य ग्राहकं घ्राणं पुष्पसंपुटकादिवत् ।
रसस्य ग्राहिका जिह्वा दधिक्षौद्रघृतादिवत् ॥ १६ ॥

करणत्वेन हेतुना इन्द्रियाणामनात्मत्वं साधितम्, तत्र हेत्वसिद्धिशङ्कां परिहरन् प्रत्येकमिन्द्रियाणां करणत्वं साधयति—वीणावादनवदित्यादिना ॥ यथा वीणादिवादनं शब्दं ग्राहयत् शब्दग्रहणसाधनं, तथा श्रोत्रमपि तत्साधनं करणमित्यर्थः । एवमुत्तरत्रापि योजना । चक्षुः तेजस्तया रूपग्रहणसाधनम् । तेजस्त्रितयवदिति—सूर्यसोमाग्निवदित्यर्थः । क्षौद्रं—मधु[2] ॥ १६ ॥

इन्द्रियाणां आत्मीयत्वसाधनम्

इन्द्रियाणि न मे सन्ति मूकोऽस्मि बधिरोऽस्म्यहम् ।
इत्याहुरिन्द्रियैर्हीना जनाः किं ते निरात्मकाः ॥ १७ ॥

---

[1] वीणादिवाद्यवत्. क.   [2] 'माक्षिकाः कपिलाः सूक्ष्माः क्षुद्राख्याः तत्कृतं मधु। मुनिभिः क्षौद्रमित्युक्तं तद्वर्णात् कपिलं भवेत्.' इति भावप्रकाशे.

इन्द्रियाणां ममताऽऽस्पदत्वात् तत्सम्बन्ध्यहमास्पदोऽन्यः तेभ्यः आत्मा स्यादिति युक्त्या साधयति—इन्द्रियाणि न मे सन्तीति ॥ उक्तानुमाने विपक्षे बाधकतर्कोऽयमुक्तः वेदितव्यः ॥ १७ ॥

प्राणात्मवादनिरासः

प्राणोऽप्यात्मा न भवति ज्ञानाभावात् सुषुप्तिषु ।
जाग्रत्स्वप्नोपभोगोत्थश्रमविच्छित्तिहेतवे ॥ १८ ॥
सुषुप्तिं पुरुषे प्राप्ते शरीरमभिरक्षितुम् ।
शेषकर्मोपभोगार्थं प्राणश्चरति केवलम् ॥ १९ ॥

इदानीं मुख्यप्राणात्मवादे दोषमाह—प्राणोऽप्यात्मेति ॥ प्राणः आत्मा न भवति, स्वसत्तायां चैतन्यव्यभिचारात्, देहवदित्यर्थः । सुषुप्तिष्विति—सुषुप्तिमूर्छामरणेष्वित्यर्थः । सुषुप्तौ चैतन्याभावं प्राणस्य साधयति—जाग्रदिति । शेषकर्मोपभोगार्थं शरीरमभिरक्षितुं प्राणश्चरति केवलमिति सम्बन्धः ॥ १९ ॥

प्राणानामेवात्मत्वे प्रबलं बाधकम्

प्राणस्य तत्र चैतन्यं करणोपरमे यदि ।
प्राणे व्याप्रियमाणे तु करणोपरमः कथम् ॥ २० ॥
सम्राजि हि रणोद्युक्ते विरमन्ति न सैनिकाः ।
तस्मान्न करणस्वामी प्राणो भवितुमर्हति ॥ २१ ॥

प्राण एव स्वश्रमापोहाय सुषुप्तः, नान्यः पुरुषः, यस्य शेषकर्मभोगाय प्राणः शरीरे अभिरक्षन् चरतीति कथ्यते इति चेत् तत्राह—प्राणस्य तत्रेति ॥ तत्र सुषुप्तौ करणोपरमे यदि प्राणस्य चैतन्यं आत्मत्वं स्यात् तदा प्राणः तस्यामवस्थायां निर्व्यापारः स्यादिति शेषः । व्यापारवत्त्वे सुषुप्तित्वव्याघातादित्यर्थः । किञ्च—प्राणश्चेदात्मा स्यात् तदा तस्मिन् स्वव्यापारनिरते तदायत्तव्यापाराणां करणानां उपरमो न स्यात्, उपरमन्ते च सुषुप्तौ

करणानि, तस्मात् न करणाधिपतिः प्राणः, किन्तु अन्य एव, इत्येतमर्थं सदृष्टान्तमाह—प्राणे व्याप्रियमाणे इति ।। २१ ।।

आत्मनः सर्वविधबहिरन्तःकरणाधीशत्वम्

मनसः प्रेरके पुंसि विरते विरमन्त्यतः ।
करणानि समस्तानि तेषां स्वामी ततः पुमान् ।।

परिशेषात् प्राणान्यस्यात्मत्वं सेत्स्यतीत्याह—मनस इति ।। 'यो मनोऽन्तरो यमयति'[1] इति श्रुतेर्मनःप्रेरकः अन्तर्यामी आत्मा पुरुषः । मनोद्वाराणि च इन्द्रियाणि । सर्वाध्यक्षे पुरुषे उपरते समनस्कानीन्द्रियाण्युपरमन्ते इति च युज्यते । तस्मात् समनसां सर्वकरणानां स्वामी पुमान् प्राणादन्य एवेत्यर्थः ।। २२ ।।

क्षणिकविज्ञानात्मवादनिराकरणम्

बुद्धिस्तु क्षणिका वेद्या गमागमसमन्विता ।
आत्मनः प्रतिबिम्बे तु[2] भासिता भासयेत् जगत् ।।

इदानीं क्षणिकविज्ञानात्ममतमपाकरोति—बुद्धिस्त्विति ।। गमागमौ—उत्पत्तिविनाशौ । एतावता तस्यानात्मत्वे किमायातमित्यत आह—आत्मनः इति । साऽप्यन्याधीनप्रकाशत्वादेव नात्मेत्यर्थः ।। २३ ।।

विज्ञानरूपायाः बुद्धेः पराधीनवृत्तिकत्वम्

आत्मन्युत्पद्यते बुद्धिः आत्मन्येव प्रलीयते ।
प्रागूर्ध्वं चासती बुद्धिः स्वयमेव न सिद्ध्यति ।। २४ ।।

अन्याधीनप्रकाशत्वमस्याः साधयति—आत्मनीति ।। स्वोत्पत्तिविनाशयोः स्वग्राह्यत्वाभावात्, अग्राह्यत्वे च तदसिद्धेः, उत्पत्तिविनाशवतश्च अन्यग्राह्य-

---

[1] यो मनसि तिष्ठन् मनसोऽन्तरः यं मनो न वेद यस्य मनः शरीरं यो मनोऽन्तरो यमयति एष त आत्मा अन्तर्याम्यमृतः इति पूर्णं वाक्यम् . बृ. उ. 7. 20.

[2] प्रतिबिम्बेन. ग.

त्वनियमात्, सिद्धं क्षणिकविज्ञानस्य अन्यग्राह्यत्वेन अनात्मत्वमित्यर्थः ॥ २४ ॥

आत्मनः विज्ञानसन्तानरूपत्वानुपपत्तिः

ज्ञानाच्चेत् पूर्वपूर्वस्मात् उत्तरोत्तरसम्भवः ।
युगपद्बहुबुद्धित्वं प्रसज्येत क्षणे क्षणे ॥ २५ ॥
बुद्ध्यन्तरं न जनयेत् नाशोत्तरमसत्त्वतः ।

मास्तु विज्ञानस्वरूपः आत्मा, तत्सन्तान एवात्मा भविष्यतीत्याशङ्क्य, स एव दुर्निरूपः इत्याह—ज्ञानाच्चेदिति ॥ अयमर्थः—ज्ञानात् ज्ञानान्तरमुत्पद्यत इति वदन् वादी प्रष्टव्यः—पूर्वेणान्वितमुत्तरं जायते? अनन्वितं वा? इति । तत्राद्ये दोषमाह—युगपदिति । पूर्वपूर्वबुद्ध्यन्वितानां उत्तरोत्तरबुद्धिजनकत्वे तत्तद्बुद्ध्युत्पत्तिक्षणेषु अनन्तबुद्ध्यनुवृत्तिप्रसङ्गात् विज्ञानक्षणिकत्ववादहानं प्रसज्येतेति । द्वितीयं प्रत्याह—बुद्ध्यन्तरमिति । पूर्वबुद्धेः निरन्वयविनाशे तस्यासतः अन्यसाधकत्वानुपपत्तेः ततो बुद्ध्यन्तरानुत्पादः इत्यर्थः । असतो जनकत्वे अतिप्रसङ्गादिति भावः ॥

सङ्घातात्मवादनिराकरणम्

एषां सङ्घात आत्मा चेत् एकदेशे पृथक्कृते ॥ २६ ॥
न चैतन्यं प्रसज्येत सङ्घाताभावतस्तदा ।

एवं देहादिबुद्ध्यन्तानां प्रत्येकमात्मत्वे निराकृतेऽपि, यदि कश्चित् ब्रूयात् एषां सङ्घातः आत्मा अभ्युपगम्यते न प्रत्येकमिति, सः प्रष्टव्यः—सङ्घात एव चेतयते? तदवयवा अपि प्रत्येकम्? इति । तत्राद्यमनूद्य दूषयति—एषामिति ॥ सङ्घातो नाम—सम्पूर्णोऽवयवी, स चेदात्मा, तदा तस्यैकदेशे नयने श्रोत्रे मनसि वाचि वा नष्टे सङ्घातस्य नष्टत्वात् चैतन्यं न स्यात् । न चायं इष्टप्रसङ्गः, अन्धबधिरमूकजडादेरपि जीवनदर्शनात् । अतः न समुदायचेतनत्वपक्षः युक्तिमानित्यर्थः ॥

अवयवात्मवादनिराकरणम्

भिन्नदिग्गत्यभिप्रायो बहु चेत् तन्न पूजितम् ।। २७ ।।
सद्यो भिन्नं भवेदेतत् निष्क्रियं वा भविष्यति ।

अवयवचेतनपक्षं दूषयति—भिन्नेति ।। बहु चेत्—बहवश्चेदेकस्मिन् सङ्घाते आत्मानः स्युः, तदा कदाचित् भिन्नदिग्गत्यभिप्रायः—विरुद्धदिक्षु गमनेच्छा तेषां स्यात् इत्यर्थः । अस्त्विति चेत् तत्राह—तन्न पूजितमिति । कस्मान्न पूजितमिति चेत्तत्राह—सद्यो भिन्नमिति । एकेनात्मना पूर्वस्यां दिशि आकृष्यमाणं एतत्सङ्घातरूपं तदैव अन्येन प्रतीच्यां यथा आकृष्यते, तथा अन्येन उदीच्यां अन्येन दक्षिणस्यामिति, तदा सद्यः भिन्नं भवेत्—विदीर्येतेत्यर्थः । यदि न विदीर्येत, तथाऽपि निष्क्रियं कदाचित् भविष्यति, एकेनाकृष्यमाणस्यान्यैः स्थाप्यमानत्वादित्यर्थः । तस्मात् विचार्यमाणे सङ्घाततदवयवानां आत्मत्वं न सङ्गच्छते इति तद्विलक्षण एव आत्मा अभ्युपगन्तव्यः इति सिद्धम् ।।

आत्मनः व्यापकत्वम्

देहस्यान्तर्गतोऽप्यात्मा व्याप्त एवेति बुध्यते[1] ।। २८ ।।

एवमपि यावान् देहः तावानेव तदन्तर्गतः आत्मेति जैनमतानुसारिणः, अणुपरिमाण एवेति वेदान्त्येकदेशिनः, विभुरेवात्मेत्यन्ये साङ्ख्यादयोऽपि मन्यन्ते । अतो देहादिविलक्षणोऽप्यात्मा किंपरिमाणः इति विचिकित्सायामाह—देहस्यान्तर्गतोऽपीति ।। व्याप्त एवेति कर्तरि निष्ठा, व्यापक एवेत्यर्थः । इति बुध्यते—ज्ञायते निश्चीयते इति यावत् ।

---

[1] सांख्याः नैयायिकाः वैशेषिकाः पातञ्जलाः वेदान्तिनश्च आत्मविभुत्ववादिनः

आत्मनः अणुप्रमाणत्वे दोषः

अणुप्रमाणश्चेदेषः व्याप्नुयान्नाखिलं वपुः ।[1]

कथमात्मनो व्यापकत्वमिति चेत्, पक्षान्तरयोः दुष्टत्वात् इत्यभिप्रेत्य अणुपरिमाणात्मवादे दोषमाह—अणुप्रमाणश्चेदिति । अस्मिन् पक्षे सर्वाङ्गगतशीतोष्णादिनिबन्धनवेदनानुसन्धानयौगपद्याभावः प्रसज्येत । तथाच अणुमात्रचेतनाधिष्ठितस्य युगपदनेकाङ्गव्यूहनप्रत्यूहनादिव्यापाराभावप्रसङ्गः इत्यादिदोषो दुष्परिहरः इत्यर्थः ॥

देहप्रमाणत्वे दोषः व्यापकत्वे गुणश्च

देहप्रमाणश्चेन्न स्यात् बालस्य स्थविरादिता ॥ २९ ॥
देहवत् परिणामी चेत् तद्वदेव विनङ्क्ष्यति[2] ।
कर्मणां परिणामेन क्रिमिहस्त्यादिमूर्तिषु ॥ ३० ॥
व्याप्तत्वात् प्रविशत्यात्मा घटादिष्वन्तरिक्षवत् ।

देहपरिमाणात्मपक्षे दोषमाह—देहप्रमाणश्चेदिति ॥ अस्मिन् मते बालस्य स्थविरादिता युवस्थविरादिभावो न स्यात्, शरीरपरिमाणानां भिन्नत्वात् तद्गतात्मानोऽपि भिन्नाः इति नैकस्य बाल्याद्यवस्था सिध्येत् । तस्यानङ्गीकारे प्रत्यभिज्ञाविरोधः प्रसज्येतेति भावः ॥ अत्रैव दूषणान्तरमाह—कर्मणामिति ॥ अयमभिप्रायः—सन्त्येवैकस्यात्मनः अनेकानि कर्मणि विरुद्धानेक-

---

[1] द्वैतिनो विशिष्टाद्वैतिनश्च आत्मनोऽणुत्ववादिनः. अत्र च 'बालाग्रशतभागस्य शतधा कल्पितस्य च, भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते' इति श्रुतिः प्रमाणम्. जीवगतज्ञानादिप्रत्यक्षानुपपत्तिः, योगिनो नानाशरीरावच्छेदेन सुखाद्यनुपलब्धिप्रसङ्गश्चात्र नैयायिकैरुद्भावितौ दोषौ.

[2] देहपरिमाणवत्त्वं आर्हतैरङ्गीकृतम्. मध्यमपरिमाणरूपः इति च माध्यमिकाः. एतन्मते अविद्याप्रतिबिम्बत्वं जीवस्य, वेदान्तिनां तु केषांचित् अन्तःकरणप्रतिबिम्बत्वमिति च भेदः इति मन्तव्यम्.

देहप्रवेशयोग्यानि । तत्र मनुष्यशरीरपरिमाणस्यात्मनः कदाचित् केनचित् कर्मणा हस्तिजन्म प्राप्नुवतः तच्छरीरं न पूर्येत । कदाचित्क्रिमिशरीरं प्राप्नुवतो न तत्र जीवः स मीयेत । अतो नायमपि पक्षः साधुरिति । व्यापकात्मपक्षे नायं दोष इत्याह—व्याप्तत्वादिति । अन्तरिक्षवत्—आकाशवदित्यर्थः ॥

आत्मनो व्यापकत्वे लिङ्गद्वयम्

परमाणुप्रमाणेऽपि[1] मनसि प्रतिभासते ॥ ३१ ॥
स्वप्ने चराचरं विश्वं आत्मन्येव प्रतिष्ठितम् ।

अल्पपरिमाणेऽपि प्रतीयमानः आत्मा व्यापक एवेत्यत्र लिङ्गमाह—परमाणुप्रमाणेऽपीति ॥ परमसूक्ष्मेऽपीत्यर्थः । लिङ्गान्तरमाह—स्वप्न इति । एतल्लिङ्गद्वयमर्थापत्त्या आत्मनो व्यापकत्वगमकमिति द्रष्टव्यम् ॥

नास्तिक्यास्तिक्ययोः संसारमोक्षहेतुत्वे

देहादिष्वहमित्येवं भ्रमः संसारहेतुकः ॥ ३२ ॥
अन्तःप्रविष्टः शास्तेति मोक्षायोपादिशत् श्रुतिः ।

तस्मात् देहाद्यात्मवादानां युक्त्यसहत्वात् प्रमाणशून्यत्वाच्च देहादिष्वहमभिमानः भ्रम एवेति सिद्धमित्युपसंहरति—देहादिष्विति ॥ संसारहेतुकः—संसारहेत्वविद्याहेतुक इत्यर्थः । सृष्टेषु देहादिषु आत्मनोऽन्यस्य[2] प्रवेशश्रुतेरपि साक्षातादन्यः आत्मैव एष्टव्यः इत्यभिप्रेत्याह—अन्तः प्रविष्ट इति । तथा च

---

[1] आत्मनो विभुत्वं दृढीकृत्य विभुद्वयसंयोगाङ्गीकारे तादृशसंयोगस्य सर्वदा सर्वत्र सत्त्वेन सुषुप्त्याद्यनुपपत्तिरिति तद्वारणाय मनसः अणुत्वं अङ्गीकार्यं इति तन्त्राहुः.

[2] देहाद्यतिरिक्तस्येत्यर्थः.

श्रुतिः—'अन्तः प्रविष्टश्शास्ता जनानाम्। एकस्सन् बहुधा विचारः'[1] इति। मोक्षायेति—सञ्जातविवेकायेत्यर्थः[2] ॥

प्रकरणार्थनिगमनम्

एवमेषा महामाया वादिनामपि मोहिनी ॥ ३३ ॥
यस्मात् साक्षात्कृते सद्यो लीयते च सदाशिवे।
देहेन्द्रियासुहीनाय मानदूरस्वरूपिणे[3] ॥ ३४ ॥
ज्ञानानन्दस्वरूपाय दक्षिणामूर्तये नमः।

प्रकरणार्थमुपसंहरति—एवमेषेति ॥ एषा—महेश्वरशक्तिः। ईश्वरशक्तिकृतव्यामोहनिबन्धनैव वादिनां कल्पनेत्यत्र नियामकमाह—यस्मादिति। सदाशिवे साक्षात्कृते यस्मात् सद्यो लीयते तस्मात् मायामयी सर्वकल्पनेत्यर्थः ॥

तस्मै श्रीगुरुमूर्तये नमः इत्यत्र तच्छब्दार्थं प्रकटयन् अर्थमाह—देहेन्द्रियासुहीनायेति ॥

पञ्चमश्लोकोपसंहारः

इति श्रीदक्षिणामूर्तिस्तोत्रार्थप्रतिपादके ॥ ३५ ॥
प्रबन्धे मानसोल्लासे पञ्चमोल्लाससङ्ग्रहः।

पञ्चमश्लोकव्याख्यामुपसंहरति—इतीति ॥

इति श्रीमानसोल्लासे वृत्तान्ते च
पञ्चमोल्लासः समाप्तः

—o—

[1] स चैवंविधः परमात्मा नियामकः सन् सर्वेषां हृदये प्रविश्यावस्थितः. एक एव सन् ईश्वररूपेण, जीवरूपेण तु बहुधा भूत्वा विविधाचरणवान् भवति इत्यर्थः। यथोक्तं श्रुतिस्मृतिषु—'एक एव हि भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचन्द्रवत्'। इति, ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया इति च। [2] प्रकृतिपुरुषान्यताख्यातये इति यावत्.

[3] बाह्यवस्तुग्राहकैः सर्वैरपि प्रमाणैरगम्यायेत्यर्थः.

अथ षष्ठः उल्लासः

शून्नवादिमतानुवादः

स्वप्ने विश्वं यथा तत्स्थं जाग्रत्यपि तथेति चेत् ।
सुषुप्तौ कस्य किं भाति कः स्थायी तत्र चेतनः ॥ १ ॥

आत्मनि परमेश्वरे स्वप्ने इव दृश्यजातं, मायाशक्तिविलासकल्पित एव जाग्रत्प्रपञ्चः ; आत्मा च अधिष्ठानभूतो नित्य एको निर्विकारः इति देहाद्यात्मवादनिराकरणेन प्रतिपादितम् । तत्र बौद्धाः—स्थायी आत्मा सद्रूपः न युक्तिपथमवतरति, अतः कथं विज्ञानशून्यपञ्चस्कन्धवादाः ईश्वरमायाशक्तिविलासकल्पितमहाव्यामोहरूपाः ? इति प्रत्यवतिष्ठन्ते—स्वप्ने विश्वमित्यादिना ॥ यथा विश्वं दृश्यं सर्वं स्वप्ने तत्स्थं ईश्वराधिष्ठितं, तथा जाग्रत्यपि नित्यसिद्धेश्वराश्रयं इति यदभिमन्यते भवान् तदभिमन्यतां नाम; तथापीदं वक्तव्यम्—सुषुप्तौ कस्य द्रष्टुः किं तत्त्वं भाति ? तत्र सुषुप्तौ कः स्थायी चेतनः ? न कोऽपि तत्र चेतनः, न कस्यापि किमपि भाति । अतो नास्ति त्वदभिमत आत्मा इति शून्यवादी मन्यते इत्यर्थः ॥ १ ॥

विज्ञानवादिमतम्

सर्वं च क्षणिकं शून्यं सर्वमेव स्वलक्षणम् ।

विज्ञानवादिमतमाह—सर्वं चेति ॥ सर्वं च—जगत् आत्मसहितं क्षणिकं—क्षणमात्रं सत्, तथा सर्वं शून्यं—प्रागुत्तरक्षणयोरसत्[1] । तथा सर्वं स्वलक्षणं— स्वग्राह्यम्, न ग्राह्यग्राहकभेदवदित्यर्थः[2] ॥

---

[1] यत् सत् तत् क्षणिकम्, यथा जलधरपटलम्, सन्तश्चामी भावाः इति तेषामनुमानम्. सत्त्वं चात्र अर्थक्रियाकारित्वम्. क्षणिकत्वं च द्वितीयक्षणोत्पन्नध्वंसप्रतियोगित्वम्.

[2] अत्रेदं बोध्यम्—बौद्धानां हि चतुर्विधभावनया परमार्थसिद्धिः । ताश्च भावनाः—सर्वं क्षणिकं, स्वलक्षणं, दुःखं, शून्यं चेति.

पञ्चस्कन्धसमुदायात्मवादिमतम्

सङ्घातः परमाणूनां मह्यम्ब्वग्निसमीरणाः ॥ २ ॥
मनुष्यादिशरीराणि स्कन्धपञ्चकसंहतिः ।

इदानीं पञ्चस्कन्धसमुदायमतमुपन्यस्यति—सङ्घात इति ॥ मह्यम्ब्वग्नि-समीरणाः चत्वारि भूतानि परमाणूनां चतुर्विधानां संघातः, नारब्धावयवी, नापि परिणामः इत्यर्थः । अणुहेतुकं बाह्यसङ्घातमुक्त्वा स्कन्धहेतुकं अध्यात्मसङ्घातमाह— मनुष्यादीति ॥

पञ्चस्कन्धानां परिचयः

स्कन्धाश्च[1] रूपविज्ञानसंज्ञासंस्कारवेदनाः ॥ ३ ॥

के ते स्कन्धाः इत्यपेक्षायामाह—स्कन्धाश्च रूपेति ॥

तत्र रूपस्कन्धः

रूप्यन्त इति रूपाणि विषयाश्चेन्द्रियाण्यपि ।

उद्देशक्रमेण तेषां स्वरूपमुपदिशति—रूप्यन्त इति ॥ सविषयाणीन्द्रियाणि रूपस्कन्धः ।

विज्ञानस्कन्धः

विषयेन्द्रिययोर्ज्ञानं विज्ञानस्कन्ध उच्यते ॥ ४ ॥

विज्ञानस्कन्धस्वरूपमाह—विषयेन्द्रिययोरिति । ज्ञानमात्रं विज्ञानस्कन्धः इत्यर्थः ॥ ४ ॥

संज्ञास्कन्धः

संज्ञा गुणक्रियाजातिविशिष्टप्रत्ययात्मिका ।
पञ्चधा कल्पना प्रोक्ता संज्ञास्कन्धस्य सौगतैः ॥ ५ ॥
गवां गौरिति संज्ञोक्ता जातिर्गोत्वं तु गोगतम् ।

---

[1] स्कन्द्यते आरुह्यते इति स्कन्धः· इति विग्रहः· प्रयोगस्तु अर्थविशेषे योगरूढ्येति भाव्यम् ·

गुणाः शुक्लादयः तस्य गच्छत्याद्याः तथा क्रियाः ॥ ६ ॥
शृङ्गी चतुष्पाल्लाङ्गूली विशिष्टप्रत्ययो ह्यसौ ।
एवं पञ्चविधा क्लृप्तिः संज्ञास्कन्ध इतीर्यते ॥ ७ ॥

संज्ञास्कन्धस्वरूपमाह—सञ्ज्ञेति ॥ संज्ञा—शब्दः, गुणः—रूपादिः, क्रिया—तत्तत्कार्यजननसामर्थ्यं, जातिः—अवच्छेदको धर्मविशेषः, विशिष्टप्रत्ययः—नानावयवसंस्थाननिबन्धनप्रत्ययः । एवं पञ्चधा कल्पना संज्ञास्कन्धस्य सौगतैः—सौत्रान्तिकादिभिः प्रोक्तेत्यर्थः । पञ्चधाकल्पनामुदाहरणेन व्युत्पादयति—गवामिति ॥ ७ ॥

संस्कारस्कन्धः

रागाद्याः पुण्यपापे च संस्कारस्कन्ध उच्यते ।

संस्कारस्कन्धमाह—रागाद्या इति ॥

वेदनास्कन्धः

सुखं दुःखं च मोक्षश्च[1] स्कन्धः स्याद्वेदनाह्वयः ॥ ८ ॥

वेदनास्कन्धमाह—सुखमिति । मोक्षो नाम—निरुपप्लवविज्ञानसन्तानोदयः । मोहश्चेति पाठे विषयाद्याकारोपप्लुतविज्ञानसन्तानः इत्यर्थः ॥ ८ ॥

पञ्चस्कन्धातिरिक्तात्माभावः

पञ्चभ्य एव स्कन्धेभ्यो नान्य आत्मास्ति कश्चन ।
न कश्चिदीश्वरः कर्ता स्वगतातिशयं जगत् ॥ ९ ॥

आत्मा पञ्चस्कन्धातिरिक्तः कोऽपि स्थायी भविष्यतीत्याशङ्क्य तत्सत्त्वे प्रमाणाभावात् नैवमित्याह—पञ्चभ्य एवेति । पञ्चभ्य एव स्कन्धेभ्यो नान्य आत्मास्ति कश्चन । तथापि संहन्तुरभावे सङ्घातासिद्धेः संहन्ता ईश्वरोऽन्यः अभ्युपेयः, स एवात्मा भविष्यतीत्याशङ्क्याह—न कश्चिदिति । स्वगत एवातिशयो यस्य तत् स्वगतातिशयं—नान्यकृतातिशययोगीत्यर्थः ॥ ९ ॥

---

[1] मोहश्च. क.

जगति अन्यकृतातिशयाभावसाधनम्

स्कन्धेभ्यः परमाणुभ्यः क्षणिकेभ्योऽभिजायते ।
पूर्वपूर्वक्षणादेव क्षणः स्यादुत्तरोत्तरः ॥ १० ॥

स्वगतातिशयत्वं उभयविधेऽपि सङ्घाते साधयति—स्कन्धेभ्यः इति ॥ स्कन्धेभ्यः आध्यात्मिकसङ्घातोऽभिजायते, परमाणुभ्यो बाह्यः इत्यक्षरार्थः । ईश्वरः किं अन्यत्किमप्यनपेक्ष्य संहन्ता स्यात्? अपेक्ष्य वा? आद्ये दृष्टविरोधः । न हि तक्षा दार्वादिनिरपेक्ष एव गृहसङ्घातकर्ता दृष्टः । न युज्यते च, संहन्तृतायाः संहन्यमानसापेक्षत्वात्, तदभावे अनुपपत्तेः । द्वितीये स्वयं संहननसमर्थान् पदार्थान् संहन्यादीश्वरः, असमर्थान् वा? नाद्यः, समर्थानामन्यानपेक्षत्वात्, अन्यथेश्वरस्यापि स्वप्रेरकान्तरापेक्षया प्रवृत्तिप्रसङ्गात् । एवं सति अनवस्थाप्रसङ्गः । न द्वितीयः, जलेनापि दध्युत्पादनप्रसङ्गात् । अतो न संहन्ता चेतनोऽन्यः कल्पनां लभते इति भावः । किञ्च-अणूनां स्कन्धानां वा क्षणिकानां कुर्वद्रूपत्वेन अकुर्वतः ईश्वरस्य सत्ताऽनुपपत्तेः पूर्वपूर्वक्षणहेतुकः उत्तरोत्तरक्षणः अभ्युपेयः इत्याह—पूर्वपूर्वक्षणादेवेति ॥ १० ॥

पूर्वस्मादेव हि ज्ञानात् जायते ज्ञानमुत्तरम् ।
स एवायमिति ज्ञानं सेयं ज्वालेव विभ्रमः[1] ॥ ११ ॥

विषयवत् विषयिणोऽपि ज्ञानस्य क्षणिकत्वात् तदपि न हेत्वन्तरसापेक्षमित्याह—पूर्वस्मादेवेति ॥ ननु स एवायं घटः सोऽहं पुमानस्मीत्येवं विषयविषयिणोः प्रत्यभिज्ञायाः स्थायित्वावगमात् कथं तद्विरुद्धं क्षणिकत्वं इत्यत आह—स एवायमिति । ज्वालावन्निरन्तरोत्पत्तेः भेदाग्रहनिबन्धनो विभ्रमः प्रत्यभिज्ञेत्यर्थः ॥ ११ ॥

---

[1] ज्वालेतिवत् भ्रमः. च.

मायासमाच्छादितः सुखरूपः आत्मा
सुषुप्तावपि सन्
'राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादनात्

बौद्धवादोपसंहारः

अस्ति भातीति धीर्भ्रान्तैः आत्मानात्मसु कल्प्यते ।
हानोपादानराहित्यात् आकाशः किं प्रकाशते ।। १२ ।।

उपसंहरति—अस्तीति ।। आत्मानात्मसु विषयविषयिष्वित्यर्थः । सविकल्पकज्ञानं भ्रमः इत्यर्थः । कुत इत्यत आह—हानोपादानराहित्यादिति । यथाप्रतिपत्ति संवादाभावादिति यावत् । तथा च अहेयानुपादेयस्य आकाशवत् अवस्तुत्वात् अस्तित्वभाने न स्तः इत्यर्थः ।। १२ ।।

उत्तरश्लोकावतरणम्

इत्येवं बौद्धसिद्धान्ती भाषमाणो निषिद्ध्यते ।

उपन्यस्तपूर्वपक्षमनूद्य निराकरणायोत्तरं पद्यमवतारयति—इत्येवमिति ।।

राहुग्रस्तेति ।। राहुग्रस्तदिवाकरेन्दुसदृशः यः पुमान् प्रागस्वाप्समिति प्रत्यभिज्ञायते तस्मै नमः । यः पुमानात्मा करणोपसंहरणतः—इन्द्रियाणां विशेषविज्ञानाकारहेतूनामुपसंहारात्[1] कारणात्मनि लयात्, सुषुप्तोऽभूत्—

अत्रेयं तत्त्वसुधा—.

ननु शून्यवादिना सुषुप्तौ कस्याप्यनुपलम्भात् शून्य एवात्मेति यदुक्तं, तस्य किं समाधानम्? इत्याशङ्क्य, सुषुप्तौ आत्माऽस्तित्वं साधयन् समाधत्ते—राहुग्रस्तेति ।।

यः पुमान्—प्रत्यग्रूपः परमेश्वरः करणोपसंहरणतः—विशेषविज्ञानहेतुचक्षुरादिकरणानामुपसंहारात्[1] सन्मात्रः—पूर्णानन्दादिरूपेण स्फुटमप्रकाशमानतया केवलं

---

[1] उपसंहारः—सम्यक् प्रत्यावर्तनं प्रत्याहरणं वा.

सन्मात्रः करणोपसंहरणतो यो भूत् सुषुप्तः पुमान् ।

विशेषविज्ञानरहितोऽभूत् । केनात्मना सुषुप्तो भवेदित्यपेक्षायामाह—सन्मात्रः इति । स्वप्रकाशसत्तामात्रः इत्यर्थः । यद्वा—करणोपसंहरणतः सुषुप्तः सन्मात्रो यः पुमानभूदिति सम्बन्धः । अर्थः पूर्ववत् । एवं सन्मात्रोऽपि—स्वेन ज्योतिषा भासमानोऽपि तदानीं पूर्णप्रकाशात्मना न भासत इति । तस्य अनवभासमानतां दृष्टान्तेन स्पष्टयति—राहुग्रस्तादिवा-

---

सन्मात्रेणावस्थितस्सन् सुषुप्तोऽभूत्—सुप्तिं प्राप्तोऽभूत् । करणाभावेपि पूर्णानन्द-भानवतो मुक्तात्मनस्सकाशात् सुषुप्तात्मनो वैषम्यमाह—मायासमाच्छादनात् इति[1] । माययाऽऽत्माऽविद्यया समाच्छादनात् आवरणात्, सन्मात्रः इति सम्बन्धः । स्फुटमप्रकाशमानस्य स्वरूपतः सत्त्वे दृष्टान्तमाह—राहुग्रस्तेति । राहुग्रस्तदिवा-करेन्दुसदृशः—राहुणा सैंहिकेयेन ग्रस्तौ गृहीतौ यौ दिवाकरेन्दू सूर्यचन्द्रौ[2] तत्सदृशः तत्समानः सन्, सुषुप्तोऽभूदिति सम्बन्धः । यथा राहुणा ग्रस्तो दिवाकरश्चन्द्रो वा स्फुटं न प्रकाशते इत्येतावता दिवाकरस्य चन्द्रमसो वा नासत्त्वम्; तद्वत् करणानामु-पसंहारात् माययाऽऽवृतत्वाच्च सुषुप्तौ स्फुटं आत्मा न भासते इत्येतावता आत्मनो नासत्त्वमित्यर्थः ।।

---

[1] 'सुषुप्तिसमाध्योः मनोलयाविशेषेऽपि महदस्त्युभयोर्भेदः, तमसि लीनत्वात् मुक्ति हेतुत्वाभावाच्च' इत्यादि मण्डलब्राह्मणोपनिषदत्रानुसन्धेया. सांख्यमते-सुषुप्त्यवस्था द्विविधा—अर्धलय समग्रलयभेदात्, अर्धलये विषयाकारा न वृत्तिः, किन्तु स्वगत सुखदुःखमोहाकारैव; समग्रलये तु बुद्धेः वृत्तिसामान्याभावः मरणादाविवेति । वेदान्तिमते तु समग्रलये जीवः परमात्मनैक्यमाप्नोति. तथा च श्रुतिः—'यत्रैतत् पुरुषः स्वपिति नाम सता सोम्य ! तदा सम्पन्नो भवति, स्वमपीतो भवति, तस्मादेनं स्वपितीत्याचक्षते' इति.

[2] इयं च कल्पना आध्यात्मिकतत्त्वभूमिकामाधारीकृत्य ज्ञानिभिः परिकल्पितेति ज्ञेयम्. नातोऽसङ्गतत्वशङ्कावकाशः.

प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते

करेन्दुसदृसः इति। तत्र हेतुः—मायासमाच्छादनादिति। मायया—अनादितमोरूपया समाच्छादनात्—आवृतब्रह्मात्मस्वरूपत्वात्, उपरक्तचन्द्रार्कवत् यथावदनवभासमानोऽपि सन्मात्रः, न शून्यः क्षणिको वेत्यभिप्रायः। अथ कथमवगम्यते सुषुप्तौ सन्नेव पुमानिति? प्रत्यभिज्ञानप्रमाणादित्याह—प्रागस्वाप्समिति। प्रबोधसमये अस्माप्रागेतावन्तं कालं सुखमहमस्वाप्समिति प्रत्यभिज्ञायते। य एतावन्तं कालं सन्मात्रः अभूवं, न कमपि विशेषमज्ञा-

---

ननु राहुग्रस्तस्य सूर्यस्य चन्द्रमसो वा स्फुटप्रकाशाभावेपि चक्षुषा अविशेषतः सर्वैर्ग्रहणात् अस्ति सत्त्वम्। न तद्वत् आत्मनः केनचित् सत्त्वमनुभूयते इत्याशङ्क्य, सुषुप्तौ आत्मनोऽप्यविशेषतो भानं साधयति—प्रागस्वाप्समित्यादिना। यः—सुषुप्तिकालीनात्मा प्रबोधसमये—सुषुप्तेरुत्थानसमये, प्रत्यभिज्ञायते। कथम्? प्राक् योऽहं अस्वाप्सं स इदानीं जागर्मीति। न च तदा अननुभूतस्य प्रत्यभिज्ञानं सम्भवति, अन्यत्र देवदत्तात् अननुभूते प्रत्यभिज्ञानादर्शनात्। न च तदा करणेन आत्मानुभवः, इन्द्रियादिकरणानां सुषुप्तौ अभावात्। अतः स्वप्रकाशस्य आत्मनः सत्त्वात् न तदा शून्यत्वम्। नापि तस्य क्षणिकत्वम्; नापि जडत्वम्, उक्तयुक्तेरेव॥

'सुषुप्तिकाले सकले विलीने तमोऽभिभूतस्सुखरूपमेति।
पुनश्च जन्मान्तरकर्मयोगात्स एव जीवस्स्वपिति प्रबुद्धः[1] ॥'

---

[1] विलीने—विशेषविज्ञाने स्वकारणे लयं गते। अयमीशः सुषुप्तौ मोक्षे च समः। विशेषस्तु तमोऽभिभूतः इति। अज्ञानावृतः सन् स्वयंप्रकाशमानं आनन्दात्मस्वरूपं गच्छतीत्यर्थः। भूयोऽपि प्राग्भवीयकर्मानुसारात् स एव प्राणावधारकः स्वप्नावस्थां जागरणावस्थां च प्राप्नोति। कै. उ. 1. 15.

तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ६ ॥'

सिषं, सोऽहमिदानीं प्रबुद्धः विप्रसृतकरणग्रामतया जागर्मि इत्यात्मनः प्रत्यभिज्ञायमानत्वात् नायं शून्यः क्षणिको वेत्यभिप्रायः । तस्मै इत्युक्तार्थम् ॥ ६ ॥

शून्यवादनिरासः

अस्यायमाशयः—

शून्यं चेत् जगतो हेतुः जगदेव न सिद्ध्यति ॥ १३ ॥

घटः शून्यः पटः शून्यः इति कैः प्रतिपाद्यते ।

श्लोकतात्पर्यार्थमाह—अस्यायमिति ॥

यदुच्यते बौद्धैः—जगद्धेतुत्वेनोपलक्षितः ईश्वरः आत्मा नास्ति, शून्यमेव जगतः प्रागवस्था इति, तदनूद्य दूषयति—शून्यं चेदिति ॥ कस्माज्जगतोऽसिद्धिः शून्यहेतुकत्वे इत्यत आह—घटः शून्य इति । यदुपादानकं हि यत् कार्यं तत् तदात्मना प्रतीयते, उपादीयते च, यथा सुवर्णोपादानकं कुण्डलादि सुवर्णात्मना; तथा शून्योपादानकत्वे जगतः शून्यात्मनैव व्यवहारः प्रसज्येत, न सदात्मना; सदात्मनैव तु व्यवह्रियते सर्वैः, न शून्यात्मनेत्यर्थः । अकारणकार्योत्पत्त्यभ्युपगमे कार्यार्थिना उपादानप्रवृत्तिदर्शनविरोधात्, असत्पूर्वकत्व-

---

'सता सोम्य तदा सम्पन्नो भवति'[1] इत्यादिश्रुतिश्च आत्मनः सच्चिदानन्दरूपत्वेन सुषुप्ताववस्थानं दर्शयति । आत्मनः सुखरूपत्वं च उत्थितेन तेनानुसन्धीयते 'सुखमहमस्वाप्सम्' इति । अतो न कोऽपि दोषः इति भावः ॥ ६ ॥

---

[1] यस्मिन् काले अस्य स्वपितीत्येतन्नाम भवति तदा सच्छब्दवाच्यया प्रकृतया देवतया सङ्गतः एकीभूतो भवतीत्यर्थः । अत एव मनआदिसंसर्गकृतं जीवरूपं परित्यज्य स्वं आत्मानमेव अपिगतो भवतीति स्वपितीत्याचक्षते ।

कल्पनायां असतः सदात्मतापत्तौ दृष्टान्ताभावात्, 'कथमसतः सज्जायेत'[1] इति श्रुतिनिरस्तत्वाच्च, असत्कारणत्वपक्षः न प्रामाणिकैः आदरणीय इति भावः ॥ १३ ॥

नैव भासेत शून्यं चेत् जगत् नरविषाणवत् ॥ १४ ॥
वस्त्वर्थी किमुपादद्यात् भारार्तः किं परित्यजेत् ।

उक्तमेव सर्वव्यवहारविरोधं प्रपञ्चयति—नैव भासेतेति ॥ यद्वा—शून्यकारणकं जगदपि शून्यमेवास्तु, व्यवहारस्तु संवृतिमात्रेण भविष्यति इत्याशङ्क्य शून्यस्य निरुपाख्यत्वात् संवृत्याऽपि न व्यवहारसिद्धिः इत्यभिप्रेत्याह—नैव भासेतेति । न हि नरविषाणं संवृत्याऽपि क्वचित् प्रतीयते इति भावः । उपादानपरित्यागयोः सिद्धविषयत्वात् शून्यपक्षे किमुपादद्यात्? किं वा परित्यजेत्? इत्यर्थः ॥ १४ ॥

को विदध्यात् निषिद्धवेद्वा शून्यत्वात् स्वस्य चात्मनः ॥
अवसीदेत् निराकूतं तस्मात् सर्वमिदं जगत् ।

व्यवहार्यवत् व्यवहर्तुरप्यभावात् शून्यवादे व्यवहारानुपपत्तिः इत्याह—को विदध्यादिति ॥ शून्यवाददूषणमुपसंहरति—अवसीदेदिति । निराकूतं निर्हेतुकम् ॥ १५ ॥

पञ्चस्कन्धसमुदायात्मवादनिरासः

स्कन्धानां परमाणूनां न सङ्घातयिताऽस्ति चेत् ॥ १६ ॥
सङ्घातो न विना हेतुं जडाः घटपटादयः ।

इदानीं पञ्चस्कन्धसङ्घातात्मवादं निराकरोति—स्कन्धानामिति ॥ सोऽयं प्रष्टव्यः—स्कन्धानां परमाणूनां सङ्घातकर्ता कश्चिदस्ति न वा? अस्ति चेत्, स स्थिरः क्षणिको वा? आद्ये—तव अपसिद्धान्तः । द्वितीये—

---

[1] छान्दोग्ये. 6. 2. 2.

सङ्घातोत्यचिक्षणासम्बन्धिनः सङ्घातयितृत्वानुमपत्तिः, इत्यभिप्रेत्य द्वितीयमनूद्य दूषयति—न सङ्घातयिताऽस्ति चेदिति । अस्य दूषणम्—सङ्घातो न विना हेतुमिति । संहन्तारं हेतुं विना न सङ्घातः सिध्येत्, यतो घटपटादयः संहन्यमानाः पदार्था जडाः, स्वयमेव संहननासमर्थाः इत्यर्थः । न हि लोके जडानां तन्तुवीरणमृद्दार्वादीनां कुविन्दपुरुडकुलालतक्षाद्यनधिष्ठितानां स्वयमेव पटकटघटरथाद्यात्मना संहन्यमानता उपलभ्यते । अतः दृष्टान्ताभावात्, प्रत्युत दृष्टान्तविरोधाच्च, निरात्मकस्कन्धवादः अप्रामाणिकः इति भावः ॥ १६ ॥

क्षणिकविज्ञानवादनिरासः

महानुभावो भूयासमिति भ्रान्तश्च मन्यते ॥ १७ ॥
आत्माऽपलापको बौद्धः किमर्थं चरति व्रतम् ।

क्षणिकात्मपक्षमङ्गीकुर्वतां बौद्धानां अविवेकं प्रकटयन् असामञ्जस्यं तन्मतस्य सूचयति—महानुभावः इति ॥ भ्रान्तः—दृष्टमात्रप्रत्ययः । व्रतं—पारलौकिकं चैत्यवन्दनादीत्यर्थः । क्षणिकात्ममते कर्तुः भोक्तुश्च एकस्याभावात् व्रताचरणं व्यर्थमिति, तस्य तद्विधानशास्त्रं न प्रामाणिकमिति भावः ॥ १७ ॥

तदङ्गतया प्रत्यभिज्ञायाः भ्रमत्वनिरासः

प्रत्यभिज्ञा यदि भ्रान्तिः भोजनादि कथं भवेत् ॥
इष्टसाधनमेवैतदन्नं गतदिनान्नवत् ।
इति निश्चित्य बालोऽपि भोजनादौ प्रवर्तते ॥ १९ ॥

यदुक्तं—ज्वालाप्रत्यभिज्ञावत् सोऽहमिति प्रत्यभिज्ञा भ्रमः इति, तदनूद्य दूषयति—प्रत्यभिज्ञेति ॥ कथं न भोजनादि भवेदित्यत आह—इष्टसाधनमिति ॥ अयमर्थः—वस्तुनि दृष्टे पुरुषस्य तस्मिन् प्रवृत्तिर्वा ततो निवृत्तिर्वा जायते इत्येतत् अनुभवसिद्धम् । प्रवृत्तिनिवृत्ती च ममैतदनुकूलं प्रतिकूल-

मिति बुद्धिनिबन्धने । यत् उपभुज्यमानं स्वात्मनि सुखं जनयति तत् अनुकूलतया प्रतीयते, दुःखजनकं तु प्रतिकूलतया इति प्रसिद्धम् । तथाच अनुपभुक्तसजातीये अकस्मादुपनते वस्तुनि अनुकूलत्वादिबुद्ध्यनुदयात् सहसा तत्र प्रवृत्तेरसम्भवात्, यत्र सहसा वस्तुदर्शनमात्रात् प्रवृत्त्यादि दृश्यते तत्र पूर्वानुभूतसजातीयत्वेन लिङ्गेन तस्य स्वानुकूलत्वं अननुकूलत्वं वा अनुमाय प्रवर्तते निवर्तते च इत्यङ्गीकार्यम् । एतच्च पूर्वोत्तरकालयोः अतिविप्रकृष्टयोः अनुगतस्य एकस्य अनुसन्धातुः आत्मनोऽभावे नोपपद्यत इति जीवनमपि दुर्लभं क्षणिकात्मवादिनः इति । विमतः अयं ओदनः मदिष्टसाधनं, ओदनत्वात् गतदिनभुक्तोदनवत् इति निश्चित्य बालोऽपि—अर्भकोऽपि भोजनादौ प्रवर्तते । अतः आबालवृद्धं आगोपपण्डितं अविप्रतिपन्नं व्यवहारमार्गं अपलपन् बौद्धः दूरत एव परिहरणीयः श्रेय इच्छद्भिः इति भावः ॥ १९ ॥

अवकाशप्रदातृत्वं आकाशार्थक्रिया यथा ।
तथैवार्थक्रिया पुंसः कर्तृत्वज्ञातृतादिका ॥ २० ॥

यदप्युच्यते बौद्धैः—स्थायिनोऽर्थक्रियानुपपत्तेः क्षणिक एवात्मा एष्टव्यः इति, तदपि अविचारिताभिधानं इत्यभिप्रेत्य आत्मन्यर्थक्रियां तावत् साधयति —अवकाशेति ॥ न च आवरणाभावमात्रत्वात् आकाशस्य न अर्थक्रियाकारित्वमिति वाच्यम्, आवरणाभावमात्रस्यापि निरधिष्ठानस्य अनुपलम्भात्, तदधिष्ठानतया कस्यचित् सत्त्वाङ्गीकारे तस्यैव आकाशत्वात् । तथा च पक्ष्यादेरुपगमे सति यत् आव्रियते, तदपगमे च यत् विव्रियते तदस्त्वाकाशाख्यं भावरूपं वस्तु इति गमयितव्यम् । ज्ञातृत्वकर्तृत्वे तु आत्मनः प्रसिद्धे । अतः अर्थक्रियाकारित्वात् सत्त्वसिद्धौ प्रागुक्तयुक्त्या सिद्धमस्य स्थायित्वमिति भावः ॥ २० ॥

सुषुप्तिसमयेऽप्यात्मा सत्यज्ञानसुखात्मकः ।
सुखमस्वाप्समित्येवं प्रत्यभिज्ञायते यतः ॥ २१ ॥

नन्वर्थक्रियासमय एव सत्त्वात् तामङ्गीकुर्वतः जाग्रत्स्वप्नयोः सत्त्वेऽपि सुषुप्तौ अर्थक्रियाभावात् असत्त्वं आत्मनः प्राप्तं इत्यत आह––सुषुप्तिसमयेऽपीति ॥ प्रत्यभिज्ञायाः प्रामाण्यं प्राक् साधितमेव । पूर्वोत्तरक्षणयोः एकस्य द्रष्टुः सद्भावानङ्गीकारात् सादृश्यग्राहकाभावात् बौद्धस्य प्रत्यभिज्ञाभ्रमोऽपि न सिद्ध्यतीति न तस्याः भ्रमत्ववाचोयुक्तिः युक्तेति भावः ॥ २१ ॥

आत्मनो विषयत्वनिरासः

प्रत्यभिज्ञायत इति प्रयोगः कर्मकर्तरि ।
आत्मा स्वयंप्रकाशत्वात् जानात्यात्मानमात्मना ॥ २२ ॥

सुखमिति प्रत्यभिज्ञायते इति वदता आत्मनो विषयत्वमुक्तं, कर्मप्रत्ययनिर्देशात्; तथा च वेदान्तिनः तव स्वयञ्ज्योतिरात्मेत्यभ्युपगमविरोधः इति कस्यचिदाशङ्कां परिहरति––प्रत्यभिज्ञायते इति ॥ प्रयोगः इति । मुच्यते वत्सः स्वयमेव इतिवत् कर्मकर्तरिप्रयोगात् न स्वप्रकाशत्वाभ्युपगमविरोधः इत्येतत् स्पष्टयति––आत्मेति ॥ २२ ॥

देहात्मविवेचनक्रमः

सुषुप्तौ मायया मूढः जडोऽन्ध इव लक्ष्यते ।
अप्रकाशतया भाति स्वप्रकाशतयाऽपि च ॥ २३ ॥

एवं तात्पर्यवर्णनेन आत्मनः नित्यशुद्धबुद्धमुक्तस्वभावतां उपपाद्य, इदानीं राहुग्रस्तेत्यक्षरार्थं अर्थतो वर्णयति––सुषुप्तावित्यादिना ॥ जडत्वं अचेतनत्वं, अन्धत्वं––अज्ञातृत्वमिति भेदः । अतो विशेषविज्ञानाभावात् अप्रकाशतया भाति, स्वरूपविज्ञानस्य विलोपाभावात् स्वप्रकाशतयाऽपि च आभातीत्यर्थः ॥ २३ ॥

जडात्मनि च देहादौ साक्षादीशो विविच्यते ।

एतावता पूर्वार्धं व्याख्यातं, उत्तरार्धाद्यपादार्थमाह—जडात्मनीत्यादिना ॥ देहेन्द्रियमनोबुद्धिषु जडेषु स्वपरव्यापारानभिज्ञेषु योऽहमद्राक्षं सोऽहं जिघ्रामि, शृणोमि, वच्मि, मन्ये, जानामि, गच्छामि, तिष्ठामि, लङ्घयामि इति सर्वावभासकतया आत्मा साक्षादीश्वरः इति विविच्यते इत्यर्थः ॥

मोक्षस्वरूपम्

एषैव मोहिनी नाम मायाशक्तिर्महेशितुः[1] ॥ २४ ॥
मोहापोहः प्रमातॄणां मोक्षः इत्यभिधीयते ।

एवं नित्यशुद्धत्वादिलक्षणेश्वरस्वभावत्वमात्मनो ययाऽऽव्रियते, यस्याश्च अस्तमये भेदकाभावात् विद्यावतां संसारबन्धनिवृत्तिः, एषैव मोहिनी मायाशक्तिः, यया मोहिताः बौद्धाः नैरात्म्यवादमुपगताः इत्युपसंहरति—एषैवेति ॥

आत्मस्वरूपम्

अवस्थात्रयनिर्मुक्तो दोषादिभिरनाविलः ॥ २५ ॥
इषीक इव सन्मात्रः न्यग्रोधकणिकोपमः ।[2]
बाह्याद्बाह्यदळोन्मुक्तकदळीकन्दसन्निभः ॥ २६ ॥
निरंशो निर्विकारश्च निराभासो निरञ्जनः ।
पुरुषः केवलः पूर्णः प्रोच्यते परमेश्वरः ॥ २७ ॥

प्रबोधसमये प्रत्यभिज्ञायमानस्य आत्मनः स्वरूपमाह—अवस्थात्रयेति ॥ अवस्थात्रयसाक्षित्वादेव अवस्थात्रयवर्जितः । एवमपि देहादिभिः—अनाविलः अकलुषितः साक्ष्यसम्बन्धकृतदोषरहितः असङ्गत्वादित्यर्थः ॥ अस्य आत्मनः

---

[1] 'अतो भगवतो माया मायिनामपि मोहिनी, यत् स्वयं चात्मवर्त्मात्मा न वेद किमुतापरे' इति भागवते. 3. 6. 35.

[2] 'इषीकां च यथा मुञ्जात् कश्चित् निष्कृष्य दर्शयेत्, योगी निष्कृष्य चात्मानं तथा पश्यति देहत'. इति महाभारते.

सदैकरूपत्वं इन्द्रियागोचरत्वं च दृष्टान्ताभ्यामाह—इषीक इवेति ।। मुञ्जतृणपुञ्जान्तश्शलाका—इषीकेत्युच्यते । अस्य शब्दस्योभयलिङ्गत्वेन पुंस्त्वेन निर्देशः । तस्य अन्तरेवोपलभ्यत्वं दृष्टान्तेनाह—बाह्यादिति ।। उक्तदृष्टान्तवशादेव सावयवत्वपरिच्छेदविकारित्वादि स्यात् इति शङ्कां वारयति—निरंशः इत्यादिना ॥ निराभासः—जन्यज्ञानाविषयः । निरञ्जनः—निर्लेपः । केवलः—उपाधिसंसर्गरहितः । पूर्णः—अपरिच्छिन्नः । एवंविधः परमेश्वर एव पुरुषः आत्मा, आत्मा पुरुष एव परमेश्वरः प्रोच्यते सर्ववेदान्तेष्वित्यर्थः ।। २७ ।।

तस्य आत्मनः प्रपञ्चविलक्षणत्वम्

वाचो यत्र निवर्तन्ते मनो यत्र विलीयते ।
एकीभवन्ति यत्रैव भूतानि भुवनानि च ।। २८ ।।
समस्तानि च तत्त्वानि समुद्रे सिन्धवो यथा ।
कश्शोकः तत्र को मोहः एकत्वमनुपश्यतः ।। २९ ।।

उक्तलक्षणेश्वरात्मनः सर्वप्रपञ्चधर्मविलक्षणस्वभावत्वं श्रुत्युक्तं विशदयति—वाचः इति ।। तथा च श्रुतयः—'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह'[1] 'आत्मेत्येवोपासीतात्र ह्येते सर्वे एकं भवन्ति'[2] 'परेऽव्यये सर्वे एकीभवन्ति'[3] 'यथास्यैव प्रज्ञायै सर्वाणि भूतानि एकं भवन्ति तद्व्याख्यास्यामः'[4] 'अथास्मिन् प्राण एवैकधा भवति'[5] इत्याद्याः ।। २८ ।।

---

[1] तै. उ. 2. 4. [2] 'स योऽत एकैकमुपास्ते न स वेद अकृत्स्नो ह्येषः अत एकैकेन भवति' इत्यादिः. प्राणादीनि सर्वाण्यप्याप्नुवन् आत्मेत्युच्यते. बृ. उ. 1.4.7.

[3] अनन्ते अक्षये परे ब्रह्मणि सर्वेऽपि अविशेषतां गच्छन्तीत्यर्थः. मुं, उ. 3. 2. 7.

[4] कौषी. उ. 3. 4. [5] कौषी. उ. 3. 3.

जीवानामुपाधिपरित्यागेन ब्रह्मात्मैकतापत्तिप्रतिपादकश्रुत्यर्थमाह—समस्तानि चेति ॥ तत्त्वानि—जीवाः । तथा च श्रुतिः—

'यथा नद्यस्स्यन्दमानास्समुद्रे
अस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान्नामरूपाद्विमुक्तः
परात्परं पुरुषमुपैति दिव्यम् ॥'[1]

इति एवमेकात्मत्वं पश्यतो निखिलबन्धनिवृत्तिरित्यत्रापि श्रुतिमुदाहरति—कः शोकस्तत्रेति ॥

'यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कश्शोकः एकत्वमनुपश्यतः ॥'[2]

इति ईशावास्योपनिषन्मन्त्रः अनेनोक्तः ॥ २९ ॥

विलक्षणत्वसम्भावनोपायः

वाच्यवाचकरूपत्वात् सविकल्पोऽपि सन्नहम् ।
देहादीनां व्यपोहेन सम्भवेत् निर्विकल्पकम् ॥ ३० ॥

कथमेवंलक्षणः आत्मा स्यात्, तस्य नामरूपप्रपञ्चाधिष्ठानत्वेन वा तदुपादानत्वेन वा तदन्तःपातित्वात् इत्यत आह—वाच्यवाचकरूपत्वादिति ॥ ३० ॥

असन्नेव भवेद्विद्वानसद्ब्रह्मेति वेद चेत् ।
अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः[3] ॥ ३१ ॥

---

[1] अस्तं· अविशेषात्मभावम् · नामरूपात् अविद्याकृतात्· मुं· उ· 3. 2. 8.

[2] यस्मिम् काले, परमार्थवस्तु विजानतः आत्मैव संवृत्तः, तत्र—तस्मिन् काले· तत्र आत्मनि चेत्यर्थः. अत्र द्वितीयाद्वै भयं भवतीत्यनुसन्धेयम्· ईशा· उ. 7.

[3] असन्—अपुरुषार्थसम्बन्धी. सन्—साधु मार्गस्थः. तै· उ, 2. 6.

देहादिव्यपोहस्य शून्यावसानत्वात् कथं निर्विकल्पकात्मसिद्धिः ? इत्याशङ्क्य विचारपूर्वकं श्रुत्या निर्विकल्पकात्मसत्तानिर्धारणात् नैवमित्याह—असन्नेवेति ॥ यः कोऽपि असत्—नस्ति ब्रह्मेति वेद चेत् सोऽप्यसन्नेव—अविद्यमान एव भवति, ब्रह्मण एवात्मत्वात्, तस्य नास्तित्वे स्वस्यैव नास्तित्वापातात् इत्यर्थः । स्पष्टमन्यत् ॥ ३१ ॥

षष्ठश्लोकोपसंहारः

इति श्रीदक्षिणामूर्तिस्तोत्रार्थप्रतिपादके ।
प्रबन्धे मानसोल्लासे षष्ठोल्लासस्य सङ्ग्रहः ॥ ३२ ॥

षष्ठश्लोकव्याख्यामुपसंहरति—इतीति ॥ ३२ ॥

इति मानसोल्लासे वृत्तान्ते च षष्ठोल्लासः ॥

-o-

अथ सप्तमः उल्लासः

श्रीगुरुप्रसादादेव प्रत्यगात्मनि परमात्माभेदधीजननम्

'बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि

उत्तरश्लोकस्य प्रत्यभिज्ञाप्रामाण्यसाधकत्वम्

प्रत्यभिज्ञाबलादात्मा स्थायी निर्धार्यते यदि ।
का नाम प्रत्यभिज्ञैषा किं वा तस्याश्च कारणम् ॥
प्रत्यक्षादिप्रमाणेषु प्रत्यभिज्ञा न पठ्यते ।
कथं तस्याः प्रमाणत्वं इति पृच्छन् प्रबोध्यते ॥ २ ॥

प्रत्यभिज्ञाबलादात्मनः स्थायित्वमुक्तम्, तत्र प्रत्यभिज्ञायाः प्रमाणत्वमाक्षिपति—प्रत्यभिज्ञाबलादिति ॥ का नाम प्रत्यभिज्ञा? इत्याक्षेपार्थं प्रकटयति—प्रत्यक्षादीति ॥ इन्द्रियार्थसन्निकर्षमात्रजन्यज्ञानविशेषः—प्रत्यक्षम्, न प्रत्यभिज्ञा तथाविधा, तस्यां संस्कारस्यापि कारणत्वात् । अतः प्रत्यक्षं तावन्न भवति प्रत्यभिज्ञा । अनुमानादिष्वस्याः प्रसङ्ग एव नास्ति, अर्थसम्प्रयोगस्यापि कारणत्वात् । नापि स्वतन्त्रमिदं प्रमाणान्तरम् । तस्मात् न प्रत्यभिज्ञा आत्मनः स्थायित्वे प्रमाणमित्यर्थः । एतत्परिहाराय उत्तरश्लोकमवतारयति—इति पृच्छन् प्रबोध्यत इति ॥ २ ॥

यः भजतां शिष्याणां स्वात्मानं प्रकटीकरोति, कया? भद्रया—कल्याणकारिण्या मुद्रया—तर्कमुद्रया प्रकटीकरोति—व्याख्यानमुद्राप्रदर्शनेन

अत्रेयं तत्त्वसुधा—

इदानीं मुञ्जादिषीकामिव देहादिभ्यो विविच्य सच्चिदानन्दरूपं प्रत्यगात्मानं प्रदर्श्य, तस्य परमेश्वराभेदं श्रुतिगुर्वीश्वरप्रसादलभ्यं प्रदर्शयन्नाह—बाल्यादिष्विति ॥

व्यावृत्तास्वनुवर्तमानमहमित्यन्तस्स्फुरन्तं सदा ।

शिष्याणां स्वात्मतत्त्वं साक्षात्कारयति, तस्मै श्रीगुरुमूर्तये इत्यन्वयः । किंलक्षणं स्वात्मानं? सदा—सर्वदा अहमित्यन्तःस्फुरन्तं—अहमिति प्रत्यग्रूपेण शरीरान्तःस्फुरतं—प्रकाशमानमित्यर्थः । एतदुक्तं भवति—अहमित्यनिदं चिदात्मनि तादात्म्येनाध्यस्तमविद्याकार्यमन्तःकरणमुच्यते । तच्चाहमित्येवमाकारया स्ववृत्त्या स्थूलदेहपर्यन्तं प्रसर्पति । तथा च स्वाध्यस्ताहङ्कारात्मना

बाल्यादिषु—बाल्यं—शैशवं, तदादिषु—शैशवकौमारयौवनमध्यवयस्स्थाविररूपासु,[1] जाग्रत्स्वप्नसुषुप्तिमूर्छाजन्मजरामरणरूपासु, तथा अन्यास्वप्यवान्तरासु दर्शनश्रवणादिरूपासु कर्तृत्वभोक्तृत्वादिरूपासु च सर्वासु अवस्थासु दशासु व्यावृत्तासु—परस्परं व्यावर्तमानासु अनुवर्तमानं— अनुगततया सर्वास्ववस्थासु वर्तमानम् । अयं भावः—यो हि असत्यजडानानन्दरूपासु सर्वास्ववस्थासु व्यावर्तमानासु 'योऽहं सुप्तौ स्वप्नमद्राक्षं सोहमिदानीं जागर्मि' इति अवस्थात्रये 'योहं बालो युवा चाभूवं सोऽहमिदानीं वृद्धोऽस्मि' इति बाल्यादिष्वपि च सत्त्वेनानुवर्तमानः अनुभूयते, तथा द्रष्टृत्वेनाभिमतेषु चक्षुरादिषु व्यावर्तमानेषु स्वयं तत्सकलसाक्षित्वेन यः चिद्रूपः सदा अनुवर्तमानोऽनुभूयते, तथा प्रियत्वेनाभिमतवित्तपुत्रपिण्डादिषु[2] व्यावर्तमानेषु च यः स्वयं सदा प्रीतिविषयः सर्वशेषित्वेन निरतिशयप्रीतिविषयतया आनन्दरूपत्वेनानुवर्तमानः अनुभूयते, तद्वदेव अहंबुद्धिविषयतया आत्मत्वेनाभिमतेषु देहादिभोक्त्रन्तेषु व्यावर्तमानेषु यश्च स्वयं अहंबुद्धिमव्यभिचरन् सदा आत्मत्वेनानुवर्तमानोऽनुभूयते, ततः सद्रूपत्वं चिद्रूपत्वमानन्दरूपतया प्रियत्वं अहंबुद्धिविषयतया प्रत्यक्त्वं च यः कदापि न व्यभिचरति स एव त्वंपदलक्ष्यार्थ आत्मेति । तथा च तापनीयश्रुतिः— 'तं वा एतमात्मानं जाग्रत्यस्वप्नमसुषुप्तं स्वप्नेऽजाग्रतमसुषुप्तं सुषुप्तेऽजाग्रतमस्वप्नं

---

[1] पञ्चदशवर्षपर्यन्तं बाल्यं—शैशवम् , त्रिंशद्वर्षपर्यन्तं कौमारम् , पञ्चाशद्वर्षपर्यन्तं यौवनम् , षष्टिवर्षपर्यन्तं मध्यवयः, तत ऊर्ध्वं वार्धक्यं इति चरके.

[2] पिण्डशब्दः देहवाची. यथा 'पिण्डे ष्वनास्था खलु भौतिकेषु' इति रघुवंशे. 2. 57.

स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया

अवभासमानमेव आत्मानं अहङ्कारगतेदमंशापोहेन विविच्य स्वं—स्वाभाविकं ब्रह्मरूपं पूर्णमात्मानं प्रकटीकरोति। तत्र विवेकप्रकारं दर्शयन्नात्मानं विशिनष्टि—बाल्यादिष्विति। बाल्यकौमारयौवनवार्धकेषु तथा जाग्रत्स्वप्नसुषुप्तिषु तथा अन्यास्वपि सर्वासु मूर्छातुरास्वास्थ्यसस्वनिस्स्वाद्यनेकावस्थासु। किंलक्षणासु? व्यावृत्तासु—प्रतिप्रत्ययकालं भिन्नासु अनुवर्तमानं अभिन्नं अहमा-

---

तुरीयेऽजाग्रतमस्वप्नमसुषुप्तं अव्यभिचारिणं नित्यानन्दसदेकरसं[1] ह्येवं चक्षुषो द्रष्टा श्रोत्रस्य द्रष्टा वाचो द्रष्टा'[2] इति। एतदेवाह—अहमित्यन्तस्स्फुरन्तं सदेति। अन्तः—शरीरादिषु मध्ये अहमिति—अहंबुद्धिविषयत्वेन सदा—सर्वेष्वपि कालेषु स्फुरन्तं—भासमानम्, उपलक्षणमेतत् सत्त्वेन प्रियत्वेन च सदा स्फुरन्तमित्यपि द्रष्टव्यम्। एवम्भूतं प्रत्यगात्मानं यः—परमेश्वरः, स्वात्मानमेव—स्वं—'सत्यं ज्ञानमनन्तं ब्रह्म'[3] 'विज्ञानमानन्दं ब्रह्म'[4] इत्यादिषु श्रुतिषु सच्चिदानन्दात्मकत्वेन त्रिविधपरिच्छेदशून्यतया च प्रसिद्धः परमेश्वर एव आत्मा—स्वरूपं यस्य प्रत्यगात्मनः, न तु कर्त्रादिरूपेण प्रतीयमानः आत्मा सः स्वात्मा प्रत्यगात्मा, तं स्वात्मानं ब्रह्माभिन्नमिति यावत्, भद्रया—शोभनया मुद्रया—करकलितज्ञानमुद्रया[5] भजतां स्वभ-

---

[1] नित्यानन्दं सदैकरसम्. च.

[2] तमिति तुरीयस्य परामर्शः. अस्य च आत्मनः अनात्मवत् न व्यभिचारः, सर्वकल्पनाधिष्ठातृत्वात् सर्वबाधावधित्वाच्चेति भावः. द्वितीयान्तानामेषां ओङ्कारेणैकीकुर्यादित्युत्तरत्र सम्बन्धः. नृसिंहोत्तरतापनीये. 2.

[3] तै. उ. 2. 1. [4] बृ. उ. 3. 9: 28. विज्ञप्तिः विज्ञानं, तच्च न विषयज्ञानवत् दुःखानविद्धं. किन्तु प्रसन्नं शिवं अनायासं नित्यतृप्तं एकरसं, तदेव ब्रह्मेत्यर्थः.

[5] मुदं रातीति मुद्रा. 'मोदनात् सर्वदेवानां द्रावणात् पापसन्ततेः. तस्मान्मुद्रेति विख्याता सर्वकामार्थसाधनी' इति तन्त्रे. 'तर्जन्यङ्गुष्ठकौ सक्तौ अग्रतो विन्यसेत् हृदि. वामहस्ताम्बुजं वामजानुमूर्धनि विन्यसेत्. ज्ञानमुद्रा भवेदेषा' इति तन्त्रसारे उक्तम्.

तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ७ ॥'

कारानुरक्तदेहेन्द्रियादेरनेकविधपरिणामवतः सर्वावस्थस्य सदैकरूपः अपरिणममानः सन् अवभासकः चिदानन्दाद्वयब्रह्मरूपः आत्मा अहमस्मीति जानत इति शिष्यान् बोधयन्तं इत्यर्थः ॥ ७ ॥

बाह्यार्थविषयकप्रत्यभिज्ञास्वरूपम्

एतदुक्तं भवति—

भातस्य कस्यचित् पूर्वं भासमानस्य साम्प्रतम् ।
सोऽयमित्यनुसन्धानं प्रत्यभिज्ञानमुच्यते ॥ ३ ॥

श्लोकतात्पर्यं वक्तुमारभते—एतदुक्तं भवतीति ॥

तत्र 'का नाम प्रत्यभिज्ञा' इति किं प्रश्नः कृतः ? उत आक्षेपः ? इति पूर्ववादी प्रष्टव्यः । तत्राद्यस्योत्तरमाह—भातस्येति ॥ कस्यचित् पदार्थस्य पूर्वं क्वचिद्भातस्य—अवगतस्य साम्प्रतं—इदानीं भासमानस्य—अवगम्यमानस्य सोऽयमिति सामानाधिकरण्येन यदनुसन्धानं तत् प्रत्यभिज्ञानमुच्यते । पूर्वोत्तरदेशकालवैशिष्ट्यांशपरित्यागेन अनुगताविशिष्टवस्तुमात्रानुसन्धानं प्रत्यभिज्ञानमित्यर्थः ॥ ३ ॥

आत्मविषयकप्रत्यभिज्ञास्वरूपम्

तद्देशकालाकारादीनवधूयानुषङ्गिकान् ।
यथैकं वस्त्वनुस्यूतं प्रत्यभिज्ञानमात्मनः ॥ ४ ॥

कानां प्रकटीकरोति तेषां प्रत्यगात्मानं ब्रह्मस्वरूपत्वेनाप्रकटं प्रकटं करोति स्फोरयति, तस्मै नमः ॥

बाल्यादिषु तथा जाग्रदादिष्वपि सर्वास्ववस्थासु व्यावृत्तास्वनुवर्तमानं सदाऽन्तरहमिति स्फुरन्तं भजतां प्रत्यगात्मानं यो भद्रया मुद्रया स्वात्मानं प्रकटीकरोति तस्मै नम इत्यन्वयः ॥ ७ ॥

उक्तं च बाह्यार्थगोचरं प्रत्यभिज्ञानं सप्रकारमनूद्य आत्मनि तद्दर्शयति—तद्देशेति ।। आकारः—अवयवसंस्थानविशेषः । अनुषङ्गिकान्—अन्यतःप्राप्तान् अस्वाभाविकानिति यावत् । यथैकं वस्तु अनुस्यूतमवगम्यते तथा आत्मनः प्रत्यभिज्ञानं भवतीत्यर्थः ।। ४ ।।

मायानुषङ्गसञ्जातकिञ्चिज्ज्ञत्वाद्यपोहनात् ।
सर्वज्ञत्वादिविज्ञानं प्रत्यभिज्ञानमात्मनः ।। ५ ।।

दार्ष्टान्तिकं आत्मप्रत्यभिज्ञानं उपपादयति—मायेति ।। पदार्थपरिशोधनदशायां अनृतजडपरिच्छिन्नानात्मतद्धर्मविलक्षणतया अपरिच्छिन्नज्ञानरूपेण सम्भावितस्य वाक्यार्थावगमसमये मायातत्कार्याध्यासनिबन्धनकिञ्चिज्ज्ञत्वादेः अध्यस्तांशापोहेन अपोहनात् सर्वज्ञत्वादिविज्ञानम् । आदिशब्दात् अनन्तानन्दरूपता गृह्यते । अपरिच्छिन्नज्ञानानन्तानन्दरूपसाक्षात्कारः आत्मनः प्रत्यभिज्ञानमित्यर्थः ।। ५ ।।

आत्मनः स्थायित्वसाधनम्

पूर्वजन्मानुभूतार्थस्मरणात् मृगशावकः ।
जननीस्तन्यपानाय स्वयमेव प्रवर्तते ।। ६ ।।

प्रश्नोत्तरमुक्त्वा, आक्षेपः पूर्वमेव 'प्रत्यभिज्ञा यदि भ्रान्तिर्भोजनादि कथं भवेत्' इत्यनेन परिहृतः इति मत्वा आत्मनः स्थायित्वं साधयति—पूर्वजन्मेति ।। मृगशावकः—मृगबालकः सद्योजातः तत्कालमेव जननीस्तन्यपानाय स्वयमेव यत् प्रवर्तते तत् पूर्वजन्मानुभूतार्थस्मरणादेव, अन्यथा अनुधावनायामपि[1] प्रवर्तेतेत्यर्थः । तथा च बाल्यादिस्थाविरान्तं विपरिणममानेऽपि देहे यथा आत्मा न विपरिणममानः भिन्नास्ववस्थासु अभिन्नः तथा देवतिर्यङ्मनुष्यादिक्रमभाव्यनेकशरीरेषु जायमानेषु अजायमानो म्रियमाणेषु अम्रियमाण एव आत्मा इति तस्य सिद्धा नित्यतेत्यभिप्रायः ।। ६ ।।

---

[1] अन्यथा खुरधावनायामपि. च.

तस्मान्निश्चीयते स्थायीत्यात्मा देहान्तरेष्वपि ।
स्मृतिं विना न घटते स्तन्यपानं शिशोर्यतः ॥ ७ ॥

आत्मनः स्थायित्वोपपादनमुपसंहरति—तस्मादिति ॥ एतदुक्तं भवति—पूर्वानुभूतविषयसंस्कारवशादनुभूतसजातीयदर्शने पूर्वानुभूतविषयस्वभावं स्मरन् परिदृश्यमानविषयेऽपि तज्जातीयत्वेन लिङ्गेन अस्यापि तादृक्स्वभावतां कल्पयन् उभयवस्त्वनुभवकालानपायिनं एकमात्मानं प्रत्यभिजानाति पुमानिति इति ।

प्रत्यभिज्ञायाः प्रत्यक्षप्रमाणरूपत्वम्

एवं च सति प्रत्यभिज्ञा प्रमाणमेव, सा च प्रत्यक्षे अन्तर्भवति, सामग्रीभेदस्य प्रत्यक्षव्यक्तिभेदनियामकत्वेन जात्यन्तरगमकत्वाभावात् । न हि दोषसंस्कारसहितसंप्रयोगजन्यं भ्रान्तिज्ञानं अप्रत्यक्षं भवति । तस्मात् प्रत्यभिज्ञानं प्रत्यक्षं प्रमाणमिति स्थितम् ॥ ७ ॥

स्मृतेः स्वातन्त्र्येण प्रामाण्याभावः

पूर्वत्रानुभवे काले स्मृतिकाले परत्र सन् ।
आत्मा संस्काररूपेण स्मरत्यर्थं स्वनिष्ठितम् ॥ ८ ॥

उक्तमेवार्थं विशदयति—पूर्वत्रेति ॥ स्मृतिकालः—प्रागनुभूतस्य अनुभूतत्वेनानुभवकालः । उभयकालेऽपि सन् आत्मा संस्काररूपेण—अव्यक्तरूपेण स्वनिष्ठितं—स्वगतमर्थं स्मरति प्रत्यभिजानातीत्यर्थः ॥ ८ ॥

स्मृत्यन्यथाऽनुपपत्तेः आत्मस्थैर्ये प्रमाणता

प्रत्यभिज्ञेति भावानां स्मृतिश्चेदभिधीयते ।
आत्मस्थैर्ये प्रमाणत्वं स्मृतिश्च प्राप्नुयात् कथम् ॥ ९ ॥

स्मरतीत्यत्र यथाश्रुतमादाय पूर्वपक्षी प्रत्यवतिष्ठते—प्रत्यभिज्ञेति ॥ स्मृतेरप्रमाणत्वस्य सर्ववादिसम्मतत्वादित्यर्थः ॥ ९ ॥

स्मृतौ प्रकाशो नार्थस्य न चाप्यर्थस्य निश्चयः ।[1]

---

[1] नचार्थानुभवस्य ख. ग.

न चाप्यर्थानुभवयोः अङ्गुल्योरिव सम्भवेत् ॥ १० ॥

स्मृत्यप्रामाण्यं स एव साधयति—स्मृताविति ॥ स्मृतिः न प्रत्यक्ष प्रमाणं, यतः अर्थस्य स्मृतौ प्रकाशः—यथावस्थितस्वरूपावभासः नास्ति । नाप्यनुमानादिरूपमित्याह—न चापीति । निश्चयः—सद्भावनिश्चयः । न हि स्मरणदशायामर्थसत्तानिश्चयोऽस्तीत्यर्थः । 'न चार्थानुभवस्य च' इति यदि द्वितीयपादपाठो लभ्यते तदा उत्तरार्धं सुसङ्गतं भवति । पूर्वानुभूतार्थानुभवस्य वा न च स्मृतौ प्रकाशः, तस्य नष्टत्वादिति तस्यार्थः । अत एव नोभयोरपि प्रकाशः सम्भवेदित्याह—न चापीति । अङ्गुल्योरिवेति व्यतिरेकदृष्टान्तः ॥ १० ॥

नानुभूतिविशिष्टस्य पदार्थस्य च दण्डिवत् ।
सर्वत्राप्येवमित्येवं प्रसङ्गादिति तच्छृणु ॥ ११ ॥

तथाप्यन्यतरविशिष्टस्यान्यतरस्मृतौ प्रकाशो भविष्यतीत्याशङ्क्य, तदपि दुर्घटम्, अतिप्रसङ्गादित्याह—नानुभूतीति ॥ चकारात् पदार्थविशिष्टानुभूतिर्गृह्यते । पदात् पदार्थस्मृतावपि अनुभवविशिष्टार्थप्रकाशप्रसङ्गः इत्यर्थः । निराकरोति—तच्छृण्विति ॥ ११ ॥

प्राक्तनानुभवे नष्टे तदवष्टम्भसम्भवात् ।
संस्कारसंज्ञात् सामग्र्यात् पौरुषात् जायते स्मृतिः ॥

न वयं स्मृतिं प्रमाणं ब्रूमः, किन्तु स्मृत्यन्यथानुपपत्तिं आत्मस्थैर्ये प्रमाणमभ्युपगच्छामः, अतो न कोऽपि भवदुक्तदोषः अस्मन्मते इत्यभिप्रेत्य स्मृत्युत्पत्तौ तावत् सामग्रीं दर्शयति—प्राक्तनानुभवे इति ॥ पूर्वं यदा कदाचिज्जातोऽनुभवः—प्राक्तनानुभवः, तस्मिन् नष्टे सति तदवष्टम्भः—प्राक्तनानुभवाश्रयः तस्मिन् सम्भवो यस्य तथा । संस्कार इति संज्ञा यस्य, तस्मात्, सामग्र्यात्—समग्रभावात् असाधारणकारणादिति यावत् । पौरुषात्—

पुरुषेण चैतन्यप्रधानेन प्रमात्रेश्वरेण चाधिष्ठितादित्येतत्, एवंलक्षणात् सामग्र्यात् स्मृतिर्जायते ॥ १२ ॥

आवेद्यानुभवे नष्टे तदीयं विषयं प्रति ।
अनुभावकमात्मानं बोधयत्यनपायिनम् ॥ १३ ॥

एवं जायमाना स्मृतिः किं करोति? एतदाह—आवेद्येति ॥ आवेद्यस्य—सम्यग्वेदनीयस्य अनुभवे नष्टे तदीयं विषयं—आवेद्यं प्रति यः पूर्वमनुभावकः—अनुभविता आत्मा तं आत्मानं अनपायिनं नित्यमेकं बोधयति—ज्ञापयति, स्मृतिरिति शेषः । तथा च पूर्वानुभवजनितसंस्कारात् पूर्वानुभूतं विषयं स्मरन् इदानींतनविषयानुभवसमनन्तरं एवं मन्यते पुरुषः—'योऽहं पूर्वं हस्तिनरतुरगादिसङ्कुलं राज्यमन्वभूवं सोऽहमद्य हिमगिरिकुहरगुहापरिसरप्रपतन्मन्दाकिनीघोषमनुभवामि' इत्यात्मानं प्रत्यभिजानाति । एवं जन्मान्तरीयमपि विषयं स्मरन् जन्मान्तरीयमप्यात्मानं प्रत्यभिजानाति पुमानिति स्मृतिद्वारत्वात् प्रत्यभिज्ञानस्य स्मृतिरेव प्रत्यभिज्ञेत्यभिहितमिति भावः ॥ १३ ॥

वेदितुः आत्मनः नित्यत्वम्

विषये च प्रमुषिते नष्टे चानुभवे सति ।
स्वविश्रान्तं स्मरत्यर्थं देवोऽप्रमुषितस्सदा ॥ १४ ॥

वेद्यवेदनयोर्व्यावृत्तावपि वेदिता न व्यावर्तते, अतोऽपि वेदिताऽऽत्मा नित्य इत्याह—विषये चेति ॥ प्रमुषिते—नष्टे स्वविश्रान्तं—स्वात्मनि संस्काररूपेण विलीनमित्यर्थः, देव—आत्मा अप्रमुषितः अनन्तर्हितः ॥ १४ ॥

मायाऽविद्ययोः स्वरूपम्

प्रमोषणं प्रमातॄणां मायया तमसा कृतम् ।
मायाविद्ये प्रभोश्शक्ती भानोः छायाप्रभोपमे ॥ १५ ॥

कथं देवः अप्रमुषितः सदैवेत्युच्यते? तस्य सुषुप्तिप्रळययोः प्रमोषण-

सम्भवात् इत्यत आह—प्रमोषणमिति ॥ मायिकमेवात्मनः प्रमोषणं न पारमार्थिकं, तच्च विशेषाकारानवभासमात्रं न स्वरूपनाशरूपम् । तस्मादविद्यातत्कार्योपाध्यविवेकादुपाधिषु प्रलीयमानेषु आत्मापि प्रलीनो नष्ट इति भ्रम इत्यर्थः । मायारूपोपाधेरात्मावरणस्यानादिभावरूपत्वेनानुच्छेद्यत्वात् आत्मनो मोक्षाभावप्रसङ्गः इत्याशङ्क्य विद्यापोह्यत्वात् मायाया अविद्यामात्रत्वात् तस्याश्च अनिर्वचनीयत्वत् नोक्तदोष इत्यभिप्रेत्य मायाविद्ययोः एकत्र पूर्वापरभावेन सङ्गतिमाह—मायाविद्ये इति । प्रभोरात्मन ईश्वरस्य शक्ती सामर्थ्ये, आभ्यां बन्धमोक्षौ भवतः स्वात्मन्यनुभवति इत्यनयोश्शक्तित्वमुपचारादुच्यते, न वस्तुतः; यतोऽसङ्गस्यालुप्तप्रकाशस्वभावस्य अविद्यात्मकमायाश्रयत्वं व्याहतं, ज्ञानस्वरूपस्य चागन्तुकज्ञानानपेक्षत्वात् तदाश्रयत्वायोगः । अत्र दृष्टान्तमाह—भानोरिति । छाया—राहुः । यथा राहुः वस्तुतो भान्वसम्बद्धोऽपि तत्सम्बन्धितया प्रतीयमानः तदाच्छादकः, एवं मायापि वस्तुत आत्माऽसम्बन्धिन्यपि आत्मतत्त्वाच्छादिका । प्रभादृष्टान्तस्तु स्वरूपस्यैव सतः केनचिन्निमित्तेन धर्मित्वव्यवहारसिद्ध्यर्थः ॥ १५ ॥

मायाऽविद्ययोः कार्यम्

सर्वान् आच्छादयेन्माया विद्या व्याक्षिप्य दर्शयेत् ।
प्रत्यभिज्ञैव सर्वेषां प्रमाणानां च साधनम् ॥ १६ ॥

उक्तयोः मायाविद्ययोः कार्यमाह—सर्वानिति ॥ प्रमातॄनित्यर्थः । व्याक्षिप्य—व्यावृत्य—उद्वास्येत्यर्थः । कथं सर्वावरणभूतां मायामपावृत्य जीवानां तत्त्वं विद्या दर्शयेत्, तस्या जडत्वात्, जडा हि विद्या, अन्तःकरणवृत्तिरूपत्वात् तस्याः, इत्याशङ्क्याह—प्रत्यभिज्ञैवेति । सर्वेषां प्रमाणानां, चकारादप्रमाणानां च, साधनं—साधकं प्रत्यभिज्ञैव, प्रत्यभिज्ञायते—सर्वेष्ववभासेष्वनुस्यूततयावगम्यते इति प्रत्यभिज्ञा, साक्षी, स एव सर्वविज्ञानसाधकः इत्यक्षरार्थः । विद्यायाः स्वरूपतो जडत्वेऽपि अशेषविज्ञानाधिष्ठान-

साक्षिचैतन्यव्याप्ततया तप्तायःपिण्डवत् आपन्नप्रकाशत्वात्, सा मायानिवारण-समर्थेति भावः। यद्वा—कथमवगम्यते 'विद्या व्याक्षिप्य दर्शयेत्' इति? तत्राह—प्रत्यभिज्ञेवेति। सर्वेषां प्रमाणानां प्रमाणवृत्तीनां या प्रत्यभिज्ञा इदं अज्ञासिषमहं इत्याकारा, सा साधनं विद्यारूपप्रमाणवृत्तिस्वभावसाधकं, विद्यायाः विषयावरणतिरोधानसामर्थ्यप्रत्यायकमित्यर्थः। अथवा—केयं विद्या? या अविद्यां व्याक्षिप्य सर्वेषां तत्त्वं प्रदर्शयेदित्याकाङ्क्षायामाह—प्रत्यभिज्ञेवेति। प्रतिप्रत्ययं प्रतिविषयं च प्रकाशकतया प्रत्यभिज्ञायते प्रकर्षेण अभितोऽनवच्छेदेन ज्ञायते यः प्रत्यगात्मा साक्षी सा प्रत्यभिज्ञा, यतः सर्वप्रमाणानां साधनं सर्वप्रमाणवृत्तान्ताभिज्ञानात्मकमित्यर्थः॥ १६॥

ईश्वरप्रत्यभिज्ञास्वरूपम्

ईश्वरोऽन्योऽहमप्यन्यः इति विच्छेदकारिणीम्।
व्याक्षिप्य विद्यया मायामीश्वरोऽहमिति स्मृतिः॥

तामेव प्रत्यभिज्ञां स्वरूपतो निर्दिशति—ईश्वरोऽन्य इति॥ स्मृतिः प्रत्यभिज्ञेति शेषः। यद्वा—मायास्वभावमनूद्य तस्या विद्ययापबाधने सति स्वयमेव स्वरूपाविर्भावः प्रत्यभिज्ञेति दर्शयति—ईश्वरोऽन्योऽहमिति॥ १७॥

विद्याकार्यम्

ईषत्प्रकाशोऽभूदीशः मायायवनिकावृतः।
सम्यगावरणापाये सहस्रांशुरिव स्फुरेत्॥ १८॥

विद्यया अविद्यामात्रं बाध्यते न स्वरूपं प्रकाश्यते इत्येतत्प्रपञ्चयति—ईषत्प्रकाश इति॥ मायैव यवनिका—तिरस्करिणी। मेघावरणापाये यथा सहस्रांशुः—सूर्यः सदा स्वसिद्धप्रकाशेनैव स्फुरति, एवं मायावरणस्य विद्यापाये जाते स्वतसिद्धप्रकाशेनैव आत्मा स्फुरेत्। तथा च पूर्वसिद्धस्फुरणेनैव यथावत्स्वरूपाभिव्यक्तिमात्रं प्रत्यभिज्ञेत्यभिप्रायः॥ १८॥

अज्ञाननिवृत्तेरेव प्रमाणफलता

न कारणानां व्यापारात् प्रमाणानां न वा पुनः ।
प्रत्यभिज्ञापनं नाम मोहापसरणं परम् ॥ १९ ॥

कथं पूर्वसिद्धस्वरूपमात्रं प्रत्यभिज्ञानमुच्यते, आगन्तुकमेव किञ्चिद्धर्मरूपं कथं नेष्यते इत्याशङ्क्य, तत्किं कारणव्यापारात् प्रमाणव्यापाराद्वा स्यादिति विकल्प्य क्रमेण निराकरोति—न कारणानामिति ॥ कारणव्यापारादुत्पाद्या न प्रत्यभिज्ञा, न पुनः प्रमाणव्यापारात् ज्ञाप्येत्यर्थः । किं तर्हि ? मोहापसरणं परं—अभिव्यक्तिकारणमित्यर्थः ॥ १९ ॥

आत्मभानस्य स्वतस्सिद्धता

यावन्ति सन्ति मानानि व्यवहारप्रवृत्तये ।
तेषां मोहापसरणात् व्यापारोऽन्यो न विद्यते ॥ २० ॥

विद्यया आत्माऽवभासः स्वतस्सिद्धः, आवरणतिरोधानमेव मानकृत्यं इत्येतत्सर्वप्रमाणसाधारण्यप्रतिपादनेन साधयति—यावन्ति सन्तीति ॥ अयं भावः —अयं घट इत्येवं प्रमाणेनावभासमाने घटे प्रमाणजनितातिशयः किमपूर्वधर्मोपजनिः ? किं वा तद्गतयत्किञ्चिन्निवृत्तिः ? इति विवेक्तव्यम् । आद्येऽपि, किं स्फुरणरूपस्य ? किं वा ज्ञाततादिरूपस्य ? नाद्यः, स्फुरणस्य चेतनतया जडे घटे जन्मानुपपत्तेः, घटज्ञानवानहं इति ज्ञातरि प्रमाश्रयत्वानुभवानुपपत्तेश्च । जानातिक्रियाया ज्ञातृगामित्वेऽपि फलस्य प्रमायाः विषयगतत्वमेव वक्तव्यं, घटस्तिष्ठतीतिवत् घटः स्फुरतीति स्फुरणस्य घटकर्तृकत्वप्रतीतेः इति चेत्; मैवं, घटो मम स्फुरतीति ज्ञातुरेव स्फुरणधर्मवत्त्वानुभवात् । ज्ञातारो हि ममेदानीमिदं स्फुरति न स्फुरतीति वा व्यवहरन्ति, नार्थः कदाचिदपि । किञ्च—अनुभवस्य स्वाश्रये एव संस्कारजनकत्वनियमात् संस्काराश्रये एव स्मृत्युत्पत्तिनियमाच्च ज्ञातरि विषयस्मरणाभावप्रसङ्गः स्यात्, तथा च ज्ञातुरर्थ-

स्मृत्यभावात् तस्य तद्विषयव्यवहारलोपात् जीवनमपि दुर्घटमिति अनाशङ्कनीय एवायं पक्षः । न द्वितीयः ; ज्ञातता नाम द्रव्यं, गुणो वा, कर्म वा, सामान्यं वा, यत् विषये ज्ञानेन जन्यते इत्यभ्युपगम्यते । सर्वथाऽपि नोपपद्यते । एषामतीन्द्रियत्वे तदाधारो विषयोऽपि न स्फुरेदिति ज्ञातो मया घट इति व्यवहारानुदयप्रसङ्गः । इन्द्रियग्राह्यत्वे तु घटगतालोकरूपादिवदन्यवेद्यताऽपि स्यात् । किञ्च—तत्र स्वजनकज्ञानेन ज्ञातता अवभासते? ज्ञानान्तरेण वा? नाद्यः, जन्मावभासयोः यौगपद्याभावात्, क्रमेण तु ज्ञानस्य विरम्य व्यापारवत्त्वानुपपत्तेः । ज्ञानान्तरेणावभासमाने तस्यापि ज्ञाततान्तरोत्पादे एवोपक्षयात् अनवस्थाप्रसङ्गः ;[1] तस्मान्न ज्ञानेन विषये कश्चिदपूर्वधर्मोपजनिः क्रियत इति स्थितम् । तर्ह्यस्तु आत्मन्येव स्फुरणोत्पत्तिर्ज्ञानजन्योऽतिशयः, तार्किकैरपि तथाऽङ्गीकारादिति चेत् ; एतदपि न सम्यगिव, घटः स्फुरतीति स्फुरणस्य घटत्वसामानाधिकरण्यानुभवविरोधात् । स्फुरणस्य घटासंसर्गित्वे, परावगत इव, 'ज्ञातो मया घटः' इति स्वात्मनि ज्ञातृज्ञेयसम्बन्धो न स्यात्, विशेषाभावात् । स्वेन्द्रियसंसृष्टत्वं विशेष इति चेत्, न । तस्य अतीन्द्रियत्वेन तत्सम्बन्धतायाः अनवगमात्, तन्निबन्धनस्य ज्ञेयसम्बन्धस्य आत्मनि प्रत्यक्षत्वायोगात् । आश्रयात्मज्ञानद्वारा विषयसम्बन्धो ज्ञानस्येत्यपि नोपपद्यते, तस्य सर्वगतात्माश्रयत्वे सर्वसंसर्गित्वादात्मनो युगपत् सर्वावभासप्रसङ्गात् । देहावच्छिन्नात्माश्रयत्वे देहाद्बहिः सम्बन्धाभावात् बहिर्विषयानवभासप्रसङ्गः । किञ्च —विषये वाऽऽत्मनि वा उत्पद्यमानं ज्ञानं प्रागसदुत्पद्यते? सद्वा? नाद्यः, असतः सत्तासम्बन्धानुपपत्तेः । सत्तासम्बन्धो हि समवायः, स सतोरेव धर्मोऽभ्युपगतः न सदसतोर्वा असतोर्वा । स्वकारणसम्बन्धः उत्तरक्षणसम्बन्धो वा सर्वोऽपि भावधर्म एवेति असदयोगः समान एव । सिद्धं भूत्वा संबध्यते

---

[1] ज्ञातान्तरोत्पादकत्वापेक्षया तदनवस्थाप्रसङ्गः. च.

इत्यभ्युपगमे त्वन्योन्याश्रयः, उक्तसम्बन्धिसम्बन्धात् प्राक्सिद्धतानुपपत्तेः, उपपत्तौ वा, सत्कार्यवादापातात् । तथा च सिद्धे सत्तादिसम्बन्धे स्वरूपसिद्धिः, तस्मिन् सिद्धे इतरसिद्धिरिति परस्पराश्रयो दुर्वारः इति नासदुत्पद्यते । नापि सदुत्पद्यते, सिद्धस्य साध्यत्वव्याघातात् । नापि सदसदात्मकमुत्पद्यते, विरुद्धस्वभावस्य वस्तुनोऽसम्भवात् । अत एव न सदसद्विलक्षणमप्युत्पद्यते इति । तस्मान्नपूर्वधर्मोत्पत्तिरात्मनि विषये वा सम्भवति । नापि विषयगतयत्किञ्चिन्निवृत्तिज्ञानकृतोऽतिशयः परमार्थो युज्यते । तथा हि—सतो ज्ञानेन निवृत्तिस्तावन्न सम्भवति, ज्ञानस्यारोपितमात्रनिवृत्तिसाधनसामर्थ्यस्यैव सर्वत्रोपलम्भात्, यथा शुक्तितत्त्वज्ञानमारोपितरजतं तद्विशिष्टं च अज्ञानं निवर्तयति, न शुक्तिगतमलमपि । उत्तरज्ञानेन पूर्वज्ञानस्य सतोऽपि निवृत्तिर्दृश्यते इति चेन्न, ज्ञानस्योत्पन्नस्य विनापि ज्ञानान्तरोदयं स्वरसत एव निवृत्तिदर्शनात् । कदाचित् भवदप्युत्तरज्ञानं न तन्निवर्तकं, अन्यथा सुषुप्त्यभावप्रसङ्गात् । प्रमाणसिद्धं हि सदित्युच्यते, तच्च न प्रमाणान्तरेण बाधितुं शक्यते, बाध्यविषयकस्याप्रमाणत्वनियमात् । तस्मात् न सन्निवृत्तिः प्रमाणफलम् । नाप्यसन्निवृत्तिः, असतो नित्यनिवृत्तत्वात् । प्रागभावस्य असतोऽपि प्रतियोग्युत्पत्त्या निवृत्तिः दृश्यते इति चेन्न, अभावस्य ध्वंसप्रतियोगित्वे भावत्वापत्तेः । निवृत्तिर्हि ध्वंसः स भावधर्मः, न त्वभावधर्मः । तस्मात् न असन्निवृत्तिरपि ज्ञानसाध्या । नापि सदसन्निवृत्तिः सम्भवति, सदसदात्मकस्याभावादेव । तस्मात्परिशेषादनिर्वचनीयस्य कस्यचिदनिर्वचनीयेन निवृत्तिरिति मोहनिवृत्तिमात्रं प्रमाणकृत्यमिति सिद्धमिति ॥ २० ॥

संसारस्य अध्यासनिबन्धनत्वम्

जडानृतपरिच्छिन्नदेहधर्माः[1] चिदात्मनि ।

---

[1] देहधर्मः. घ.

सत्यज्ञानसुखात्मत्वं मोहाद्देहेऽपि कल्प्यते ॥ २१ ॥

यत एवं सर्वप्रमाणानां स्वस्वविषयाज्ञानरूपमोहनिवर्तकत्वं स्वभावः, तस्मादात्मन्यपि वेदान्तवाक्यजनितवृत्तिरूपं प्रमाणं तद्गतानाद्यनिर्वचनीयाज्ञानरूपमोहनिवृत्त्या तत्कार्यदेहादिबन्धनिवृत्तिमात्रं करोति, नाधिकमाचरतीत्येतदेव विशदयितुं देहात्मनोः परस्पराध्यासनिबन्धन एव संसारबन्धो न परमार्थ इति दर्शयति—जडानृतेति ॥ २१ ॥

सत्ख्यातिनिरासः

शुक्तौ रजतमित्येवं यथा व्यामुह्यतेऽन्यथा ।
सदेव रूप्यं चेद्भाति विलयस्ते न सिध्यति ॥ २२ ॥

उक्ते देहात्मनोरन्योन्यस्मिन् अन्योन्यधर्माध्यासे दृष्टान्तमाह—शुक्तौ रजतमिति ॥ व्यामुह्यते, लोकः इति शेषः । वस्तुगत्या शुक्त्यादौ अरजते रजतमिदमिति अन्यथा, अनिदमि रजते इदं रजतमिति च । एवं परस्पराध्यासरूपं व्यामोहं प्राप्नोति लोकः इत्यर्थः ॥ शुक्तौ भासमानस्य रजतस्यानिर्वचनीयत्वोपपादनेन मायामयत्वं साधयति—सदेवेति । ते—तव मते सदेव चेद्रूप्यं शुक्तौ भाति तदा तस्य विलयः—बाधः न सिध्यतीति योजना । उक्तं चैतत् भगवता—'नाभावो विद्यते सतः'[1] इति ॥ २२ ॥

असत्ख्यातिनिरासः

नात्यन्तासत् प्रकाशेत नरशृङ्गादिवत् क्वचित् ।
कान्ताकरादौ रजतमिति स्यात् स्मरणं भ्रमे ॥ २३ ॥

सत्त्वनिषेधात् प्राप्तमसत्त्वं प्रत्याचष्टे—नात्यन्तासदिति ॥ प्रत्येकं सदसत्पक्षदूषणोपजीवनेन प्रवृत्तस्य सदसत्समुच्चयपक्षस्योपजीव्यनिषेधादेव निषेधसिद्धेः सोऽप्यर्थात् निषिद्धो वेदितव्यः । नन्वन्यसम्प्रयोगेऽन्यविषयकज्ञानं स्मृतिरेव नानुभवः, अतः कुतो भ्रान्तिः? इति प्राभाकरमतमाशङ्क्य अस्य

---

[1] भगवद्गीता. 2. 16.

स्मरणाकारवैपरीत्यात् न स्मरणमिदमित्याह—कान्ताकरादाविति । यदिदं पूर्वदृष्टमेव भासेत तदा यत्र दृष्टं तत्रत्यमित्येव तदवभासेत, नेदमिति । दोषवशात् तत्ताप्रमोषात्तथा नावभासत इति चेत्, तर्हि तत्ताप्रमोषे स्मृतित्व-स्यैवानिश्चयात् यथावभासमनुभवत्वोपपत्तेः न अख्यातिवादाद्यवकाशः इति भावः ॥ २३ ॥

प्रथमान्यथाख्यातिमतनिरासः

तेनेदं तुल्यमित्येवं स्यात् सादृश्यात्तु विभ्रमः ।
पीतश्शङ्खो गुडस्तिक्तः इत्यादौ नास्ति तुल्यता ॥

ननु माभूत् स्मर्यमाणता रजतस्य, तथापि मायामयत्वं न सिध्यति, पूर्व-दृष्टरजतसादृश्यसन्दर्शनात् तत्संस्कारसमुद्बोधे स्मृतरजतस्य पुरोवर्तिन्यारोपे रजतमिदमिति प्रतीतिसम्भवात्, स्मर्यमाणरजताभेदेन शुक्तिकाया एव रजता-त्मत्वानुभवाद्वा, इति अन्यथाख्यातिवादिनां मतद्वयं क्रमेणानूद्य दूषयति—तेनेदमिति ॥ यदि रजतसादृश्यात् विभ्रमो भवेत्तदा 'तेन रजतेनेदं पुरोवर्ति सदृशम्' इति वा 'अनेन तत्सदृशम्' इति वा विभ्रमोल्लेखः स्यात् न त्विदं रजतमितीत्यर्थः । किञ्च—सादृश्यात् भ्रमं वदन् प्रष्टव्यः—किं विभ्रमस्य सादृश्यं व्यापकं व्याप्यं वा? तत्र नाद्य इत्याह—पीतः शङ्ख इति । तुल्यता सादृश्यम् । न द्वितीयः, शुक्तिकायाः शुक्तिकान्तरसादृश्ये सत्यपि तद्विभ्रमोदयादर्शनादिति द्रष्टव्यम् ॥ २४ ॥

द्वितीयान्यथाख्यातिमतनिरासः

तादात्म्येन स्फुरति चेत् रजतत्वेन शुक्तिका ।
विभ्रमो निरधिष्ठानो बाधो निरवधिर्भवेत् ॥ २५ ॥

द्वितीयमन्यथाख्यातिमतं दूषयति—तादात्म्येनेति । शुक्तिरजतयोस्ता-दात्म्यं चेत् विभ्रमालम्बनं, तदोभयोरध्यस्तत्वान्मिथ्यात्वे सति सत्यस्य वस्तुनो-ऽन्यस्याभावात् शून्यवादापातप्रसङ्गः इत्यर्थः । 'तिमिरान्धकदृष्टीनां यथा

केशोण्डूकादि खे । स्फुरत्येवं जगद्रूपं अनात्मन्येव तिष्ठति' ॥ इति वासिष्ठे ।[1] केशोण्डूकादिविभ्रमाणामपि दृश्यमानालोकाधिष्ठानकत्वस्य अन्यत्र निरूपितत्वात् न निरधिष्ठानविभ्रमे निरवधिबाधे वा उदाहरणमस्तीति नायं शून्यवादिनोऽपि इष्टप्रसङ्गः इति, असत्ख्यातिरप्यनेन निराकृतेति वेदितव्या ॥ २५ ॥

आत्मख्यातिनिरासः

बुद्धिस्थितं चेद्रजतं बाह्यत्वेन प्रतीयते ।
गुञ्जादौ ज्वलनारोपे देहदाहः प्रसज्यते ॥ २६ ॥

इदानीमात्मख्यातिपक्षं निराकरोति—बुद्धिस्थितमिति ॥ २६ ॥

अनिर्वचनीयख्यातिसिद्धान्तः

युक्तिहीनप्रकाशत्वात् भ्रान्तेर्न ह्यस्ति लक्षणम् ।
यदि स्याल्लक्षणं किंचित् भ्रान्तिरेव न सिद्धयति ॥

यदि क्वचित्कथञ्चित् सद्रजतं न भासते अत्यन्तासदपि न भासते चेत् किमिदमलौकिकं किञ्चिदुच्यते बुद्धयनारूढमेव शुक्तौ रजतं इत्येवमित्याशङ्कय केनापि रूपेण रूपवत्त्वे प्रामाणिकत्वेन ज्ञानापनोद्यत्वासम्भवात् रजतज्ञानस्य भ्रान्तित्वप्रसिद्धयनुपपत्तिः स्यादित्यभिप्रेत्याह—युक्तिहीनेति ॥ २७ ॥

जलचन्द्रवदेकस्मिन् निर्भये रज्जुसर्पवत् ।
प्रतीयते यथा स्वर्णे कारणे कटकादिवत् ॥ २८ ॥

दृष्टान्ते मायामयत्वमुपपाद्य, दार्ष्टान्तिकेऽपि मायामयत्वं सिद्धं अनेन दृष्टान्तान्तरानुवादेन उपसंहरति—जलचन्द्रवदिति सार्धद्वयेन ॥ एकस्मिन् चन्द्रे जलोपाधिभेदात् यथा अनेकत्वं, एवं एकस्मिन् चिदानन्दाद्वयात्मनि देहोपाधिभेदात् अनेकत्वं अवभासते इत्यादिदृष्टान्तार्थो विवक्षितः । निर्भये

---

[1] अयंश्लोकः ग॰ पुस्तके नास्ति.

—भयहेतुत्वरहिते चिदात्मनि रज्जुसर्पवत् संसारभयावभासः इति द्वितीय-दृष्टान्तार्थः। एकस्मिन् अनेकत्वं प्रतीयते, निर्भये भयं प्रतीयत इति च योजना। कार्यकारणवादं लोकप्रसिद्धमाश्रित्य, कारणादन्यत् कार्यं नास्तीत्यत्र दृष्टान्तमाह—यथा स्वर्णे इति। कटकादिवदिति स्वार्थे कः, वतिप्रत्ययः कटकासत्यत्वार्थः[1] ॥ २८ ॥

विवर्तवादनिगमनम्

उपात्ते रूप्यवच्छुक्तौ व्याप्ते यक्षपुरीव खे।
रश्म्यम्बुवत् स्फुरद्रूपे स्थाणौ चोरवदक्रिये ॥ २९ ॥
असत्कल्पमिदं विश्वं आत्मन्यारोप्यते भ्रमात्।

इदानीं श्रुतियुक्तिभ्यां निर्णीतं विवर्तवादमाश्रित्य अधिष्ठानात् पृथक्सत्त्वं न दृश्यस्यास्ति, किन्त्वधिष्ठाने भ्रान्तिसिद्धं जगदित्यत्र दृष्टान्तद्वयमाह—उपात्ते इति। शुक्तौ रूप्यवन् उपात्ते स्वयमेव सिद्धे चिदात्मनीदं विश्वं असत्कल्पमित्यन्वयः। व्याप्ते अपरिच्छिन्ने कूटस्थे चिदात्मनि खे यक्षपुरीव गन्धर्वनगरमिव विश्वमिति; तथैव सर्वत्रान्वयः असत्कल्पमिति। स्वयंप्रकाशतया स्फुरद्रूपे चिदात्मनि रश्म्यम्बुवत् मरुमरीचिषु उदकविभ्रमवत्, अक्रिये निर्व्यापारे चिदात्मनि व्यापारवत्त्वाध्यासः स्थाणौ चोरत्वाध्यासवदित्यर्थः। भ्रमात्—मिथ्याज्ञानात् आरोप्यते—व्यवह्रियते इत्यर्थः ॥ २९ ॥

ईश्वरप्रत्यभिज्ञाफलम्

स्वयंप्रकाशं सद्रूपं भ्रान्तिबाधविवर्जितम् ॥ ३० ॥
प्रत्यभिज्ञायते वस्तु प्राग्वन्मोहे व्यपोहिते।

तथा च जीवभेदस्य बाह्यप्रपञ्चस्य चाविद्यामात्रत्वाद्विद्यया तद्बाधे अद्वैतानन्दब्रह्मरूपः आत्माऽवभासत इत्युपसंहरति—स्वयं प्रकाशमिति ॥ भ्रान्ति-

---

[1] स्वार्थिको वति प्रत्ययः. स.

बाधविवर्जितं—अनागमापायधर्मकमित्यर्थः । प्रत्यभिज्ञायते इति ।[1] वस्तु-—परमार्थं मोहे व्यपोहिते—तत्वज्ञानेनाज्ञाने बाधिते सति प्राग्वद्यथावस्थितस्वरूपं प्रत्यभिज्ञायते—साक्षात्क्रियते इति योजना ॥

देहाद्युपाधौ निर्धूते स्यादात्मैव महेश्वरः ॥ ३१ ॥

कारणाविद्याबाधात् कार्यबाधे सति आत्मतत्त्वब्रह्मस्वरूपावभासप्रतिबन्धाभावात्तदात्मैवेश्वरत्वोपलक्षितं ब्रह्म भवतीत्याह—देहाद्युपाधाविति ॥ ३१ ॥

उक्तार्थे प्रमाणानि

स्मृतिः प्रत्यक्षमैतिह्यमित्यादीन्यपराण्यपि ।
प्रमाणान्याप्तवागाह प्रत्यभिज्ञाप्रसिद्धये ॥ ३२ ॥

युक्त्योपपादितेऽर्थे प्रमाणान्याह—स्मृतिरिति ॥ 'क्षेत्रज्ञञ्चापि मां विद्धि' सर्वक्षेत्रेषु भारत[2] 'न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्'[3] इत्याद्या—स्मृतिः । प्रत्यक्षं—ब्रह्माहमस्मीति विद्वदनुभवः । ऐतिह्यं—गुरूपदेशवाक्यं तत्त्वमसीति । आदिशब्देनानुमानं गृह्यते । जीवेश्वरौ न तत्त्वतो भिन्नौ एकस्वभावत्वे अति उपाधिपरामर्शमन्तरेणाविभाव्यमानभेदवत्त्वात् आकाशवदित्यादि—अनुमानम् । न च विशेषणासिद्धिः, 'सत्यं ज्ञानं'[4] 'प्रज्ञानघन एव'[5] इत्युभयोः चित्स्वभावताश्रवणादिति । आप्तवागाहेति, 'स्मृतिः प्रत्यक्षमैतिह्यं । अनुमानश्चतुष्टयम् । एतैरादित्यमण्डलम् । सर्वैरेव विधास्यते'[6] इति श्रुतिराहेत्यर्थः । आदित्यमण्डलमित्यध्यात्ममधिदैवं च अक्ष्यादित्यमण्डलोपलक्षितं प्रत्यग्ब्रह्मतत्त्वं विधास्यते इत्युदाहृतश्रुत्यर्थः । प्रत्यभिज्ञाप्रसिद्धये इति, अहं ब्रह्म ब्रह्मैवाहमिति ब्रह्मात्मनोरेकत्वप्रसिद्धये इत्यर्थः ॥ ३२ ॥

---

[1] 'प्रत्यभिज्ञायते इति' इति नास्ति. च. [2] गीता. 13. 2. [3] गीता. 9. 5.
[4] तै. उ. 2. 1. [5] मांडू. 5. [6] तै. आ. 1. 2.

सप्तमश्लोकोपसंहारः

इति श्रीदक्षिणामूर्तिस्तोत्रार्थप्रतिपादके ।
प्रबन्धे मानसोल्लासे सप्तमोल्लाससङ्ग्रहः ॥ ३३ ॥

सप्तमश्लोकव्याख्यामुपसंहरति ॥ इतीति ॥ ३३ ॥

इति श्रीमानसोल्लासे वृत्तान्ते च सप्तमोल्लासः ॥

—o—

अथ अष्टमः उल्लासः

प्रकाशव्यतिरेकेण पदार्थः कोऽपि नास्ति चेत् ।
परमार्थोपदेशान्तो व्यवहारः कथं भवेत् ॥ १ ॥

इदानीमुक्तस्यैव सर्वशास्त्रार्थस्योपसंहारार्थं उत्तरश्लोकः, तमुत्थापयति—प्रकाशव्यतिरेकेणेति । वस्तुगत्या कालत्रयेऽपि चित्प्रकाशव्यतिरेकेण कोऽपि पदार्थो भूतभौतिकरूपो नास्ति चेत्, तदा परमार्थोपदेशान्तो गुरोः तत्त्वज्ञान-ग्रहणोपदेशात् प्राक्तनो व्यवहारः संसाररूपः किमालम्बनः स्यादि त्यर्थः ॥ १ ॥

कस्य बन्धश्च मोक्षश्च बध्यते केन हेतुना ।
मायाया लक्षणं किं स्यात् इत्येवं परिपृच्छतः ॥
प्रश्नः स्यादुत्तरं वक्तुं प्रतिपत्तुं सुखेन च ।
उक्तोऽर्थस्सप्तभिश्श्लोकैः पुनस्संक्षिप्य कथ्यते ॥ ३ ॥

न केवलमेतावत्, अन्यदप्यस्ति दुर्घटमित्याह—कस्येति ॥ बन्धाभावे कस्य मोक्षेऽपि, बन्धनिवृत्तिरूपत्वात् तस्येत्यर्थः । एतत् सर्वं मायामयमिति चेत्, तर्हि किंलक्षणा सेति वक्तव्यमित्याह—मायाया इति । इत्येवं परि-पृच्छतः प्रश्नः स्यात्—भवेत् इति । सम्भावनायां लिङ् । एतस्य प्रश्न-स्योत्तरं वक्तुं गुरुणा शिष्येण च सुखेन प्रतिपत्तुं च पूर्वं सप्तभिः श्लोकैरु-क्तोऽर्थः पुनरस्मिन् अष्टमे श्लोके संक्षिप्य कथ्यते इति योजना ॥ ३ ॥

दुर्बोधार्थविषये पौनरुक्त्यस्य अदोषत्वम्

पौनरुक्त्यं न दोषोऽत्र शब्देनार्थेन वा भवेत् ।
अभ्यासेन[1] गरीयस्त्वं अर्थस्य प्रतिपाद्यते[2] ॥ ४ ॥

---

[1] अभ्यासे हि. क. [2] प्रतिपद्यते. क.

अब्रह्मात्मकवस्त्वभावेऽपि मायया
व्यवहारोपपत्तिः

'विश्वं पश्यति कार्यकारणतया स्वस्वामिसम्बन्धतः
शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः ।

तत्राप्यशेषशास्त्रार्थश्चेत् सप्तभिः श्लोकैः निर्णीतः, तदा पुनः कथनं निरर्थमित्याशङ्क्याह—पौनरुक्त्यमिति ॥ अत्र—अस्मिन् शास्त्रे पौनरुक्त्यं न दोषः, प्रतिपाद्यवस्तुनोऽतिसूक्ष्मत्वेन सकृदेव दुरधिगमत्वादित्यर्थः[1] । अर्थस्य ब्रह्मात्मवस्तुनः गरीयस्त्वं—श्रुतितात्पर्यगोचरत्वम् ॥ ४ ॥

य एष पुरुषः कार्यकारणभावेन स्वमिभृत्यभावेन वा, शिष्याचार्यतया वा, तथा पितृपुत्रभ्रातृदुहितृमातुलश्वशुराद्यात्मना वा, येन केनापि प्रकारेण

अत्रेयं तत्त्वसुधा—

ननु ब्रह्मव्यतिरिक्तं चेत् किमपि न वस्त्वस्ति, तर्हि कथं परमार्थोपदेशादिव्यवहारः ? न हि जातु कश्चित् तत्र बद्धोऽस्ति, येन बन्धनिवृत्तये विद्योपदेशः स्यात्, बन्धहेतोः कस्याप्यभावात् । नापि विद्यावतो मुक्तः सम्भवति, तद्धेतुगुरुशास्त्रादीनां अभावात् इत्याशङ्क्य अनाद्यनिर्वचनीयपरमात्माध्यस्तमायावशादेव सर्वो व्यवहारः ब्रह्मसाक्षात्कारपर्यन्तं घटते इत्यभिप्रेत्याह—विश्वं पश्यतीति ॥

पुरुषः—पूर्णः यः—श्रुत्यन्तप्रसिद्धः परमेश्वरः मायापरिभ्रामितः—स्वोपाधिभूतमायया मलिनसत्त्वप्रधानया कार्यकारणसङ्घाताकारेण परिणतया स्वेन प्रविष्टया परिभ्रामितः बहुविधं भ्रमं प्रापितः एषः—सर्वप्राण्यपरोक्षजीवः सन् संसारित्वेन भावितः, विश्वं—जगत् भेदतः—बहुभेदभिन्नतया भ्रमेण पश्यति—अवलोकयति । भेदमेव दर्शयति—कार्यकारणतया इत्यादिना । अयमर्थः—यद्यपि परमार्थतो ब्रह्मव्यतिरिक्तं किमपि नास्त्येव, 'नेह नानास्ति किञ्चन' इत्यादिना श्रुत्या निषेधात्; तथापि अनाद्यनिर्वाच्याविद्यावशात् मुधैव भ्रान्तो जीवः प्रपञ्चं बहुभेदभिन्नं पश्यति, निद्रापरवश इव अनेकविधं स्वप्नम् । तस्य च वस्तुतो ब्रह्मैव सन्तमात्मानं निखिला-

---

[1] अधिगमेऽपि स्थूणानिखननन्यायेन दृढीकरणीयत्वाच्चेति भाष्यम् ।

स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामितः
तस्मै श्री गुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ।। ८ ।।'

देवतिर्यङ्मनुष्यादिरूपेण च भेदतः—भेदवत्तया स्वप्ने जाग्रति वा विश्वं पश्यति, मायया—अनाद्यनिर्वचनीयया अज्ञानात्मिकया परिभ्रामितः—मोहितः आच्छाद्य विक्षिप्तस्सन् न परमार्थतः, तस्मै—प्रत्यग्रूपाय तत्त्वज्ञाननिवृत्तमायाविभ्रमाय श्रीगुरुमूर्तये इत्युक्तार्थम् ।। ८ ।।

नर्थसङ्कुलया मायया भ्राम्यतः स्वभ्रान्तिसिद्धगुरुशास्त्रन्यायादिभ्यो विद्योत्पत्तौ अविद्या सवासना निवर्तते, निद्राणस्येव स्वाप्नव्याघ्रदर्शनसमुपजातभयेन प्रबुद्धस्य स्वप्नः । ततः संसारान्मुक्तः स्वस्वरूपे सच्चिदानन्दात्मनि निरतिशयमहत्त्वसम्पन्न एव रममाणोऽवतिष्ठते । तदुक्तं सर्वज्ञात्ममुनिभिः—

'तस्माद्ब्रह्माविद्यया जीवभावं प्राप्य स्थित्वा[1] तावके तु स्वरूपे ।
स्वचित्तेन स्पन्दितं विश्वजातं[2] आकाशादि क्ष्मावसानं च पश्येः ।।[3]
स्वीयाविद्याकल्पिताचार्यवेदन्यायादिभ्यो जायते तस्य विद्या ।
विद्याजन्मध्वस्तमोहस्य तस्य स्वीये रूपेऽवस्थितिः स्वप्रकाशे ।।[4] इति ।

ततः सर्वस्य परमार्थतो ब्रह्ममात्रत्वेऽपि मायावशात् भ्रान्त्या सर्वमुपपद्यते इति । कार्यं—जन्यम् , कारणं—जनकम् , स्वं—गृहक्षेत्रधनादि, स्वामी—तद्वान् देवदत्तादिः, शिष्यः—विद्याग्रहणार्थं विधिवद्गुरुमुपसन्नः[5], आचार्यः—विद्योपदेष्टा,[6] पिता—निषेक्ता, पुत्रः—तच्छुक्लसम्भवः, इत्यादिरूपेण विश्वं यः पश्यति तस्मै नमः इति सम्बन्धः ।। ८ ।।

---

[1] प्राप्यास्थित्वा. च. [2] जीवजातं. ग. [3] अत्र चित्तपदं अविद्यापरमिति रामतीर्थः.

[4] आदिपदेन चित्तसमाधानं गृह्यते. विद्योदयनन्तरीयकतयैव मोहध्वंसः, प्रकाशस्य स्वविरोध्युपमर्दोदयस्वभावत्वदर्शनादिति भावः. संक्षेपशारीरके. 2—162, 163.

[5] शासनीयः गुरुहृदयेन सह संश्लेषयोग्यः शिष्यः.

[6] आचारं शासयेद्यस्तु स आचार्य उदाहृतः.

व्यवहारसामान्यस्य काल्पनिकत्वम्

अस्यायमभिसन्धिः—

स्वयंप्रकाशे सद्रूपेऽप्येकस्मिन् परमेश्वरे ।
कार्यकारणसम्बन्धाद्यनेकविधकल्पना ।। ५ ।।
राहोश्शिरः सुषिः खस्य ममात्मा प्रतिमावपुः ।
इत्यादिकल्पनातुल्या न पृथग्वस्तुगोचरा ।। ६ ।।

श्लोकव्याख्यां प्रतिजानीते—अस्यायमभिसन्धिरिति ।। एकस्मिन्नेव अखण्डानन्दचिदात्मनि यावद्विद्यया अविद्या नापोह्यते तावत् सर्वो व्यवहारोऽविद्या, माया, अव्यक्तं, इत्यभिधानाभिधेयानाद्यनिर्वचनीयाज्ञानविलसितप्रपञ्चालम्बनो न विरुध्यते इत्यभिप्रेत्याह—स्वयं प्रकाशे इति ।। एकमप्यनेकधा व्यवहारास्पदं भवतीत्यत्र दृष्टान्तमाह—राहोरिति ।। खस्य—आकाशस्य सुषिः—छिद्रं, प्रतिमावपुः—प्रतीमायाः शरीरं, इत्येवमादिकल्पनातुल्या कार्यकारणरूपेण प्रपञ्चभेदकल्पना च, न तत्त्वतः पृथग्वस्तुविषयेत्यर्थः ।। ६ ।।

सा च कल्पना आत्मन्येवाधिष्ठाने

उपास्योपासकत्वेन गुरुशिष्यक्रमेण च ।
स्वामिभृत्यादिरूपेण क्रीडति स्वेच्छयेश्वरः ।। ७ ।।
पितरं प्रति पुत्रो यः पुत्रं प्रति पितैव सः
एक एव हि नानेव कल्प्यते शब्दमात्रतः ।। ८ ।।

न तस्य कार्यं करणं च विद्यते
न तत्समश्चाभ्यधिकश्च दृश्यते ।
परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च ।[1]

[1] श्वेताश्वतरे. 6. 8.

इति श्रुत्यर्थमनुसन्दधानो 'लोकवत्तु लीलाकैवल्यम्'[1] इति न्यायेन ईश्वर एव अनेकधा विभाव्यते इत्याह—उपास्योपासकत्वेनेति ॥ पितृपुत्रादिभावः नैकस्मिन् नियतो दृश्यते, अतोऽपि कल्पित एवेत्याह—पितरमिति ॥ पितृत्वादेः सापेक्षत्वात् न परमार्थत्वमित्यर्थः ॥ ८ ॥

उक्तार्थनिगमनम्

तस्मात् प्रकाश एवास्ति परमार्थनिरूपणे ।
भेदप्रतीतिर्मिथ्यैव माययाऽऽत्मनि कल्पिता ॥ ९ ॥

यत् सापेक्षमिहेक्ष्यते तत् स्वप्नवन्मायामयमेव, न परमार्थमित्युपसंहरति—तस्मादिति ॥ ९ ॥

मिथ्यात्वस्वरूपम्

मिथ्यात्वं नाम बाध्यत्वं सम्यग्ज्ञानोदये सति ।
शिष्याचार्योपदेशादि स्वप्नवत् प्रतिभासते ॥ १० ॥

यदुक्तं 'मायाया लक्षणं किं स्यात्' इति तदुत्तरमर्थाद्दर्शयन् 'भेदप्रतीतिर्मिथ्यैव' इत्युक्तस्य मिथ्यात्वस्य लक्षणमाह—मिथ्यात्वं नामेति ॥ तत्त्वज्ञानापनोद्यत्वं बाध्यत्वं मिथ्यात्वमित्यर्थः । इदमेव मायाया लक्षणम् । न हि प्रमाणसिद्धं प्रमाणज्ञानबाध्यं भवेत्, बाध्यत्वे तस्य प्रामाणिकत्वव्याघातात् । बाधश्च यत्र यत् प्रतिपन्नं तत्रैव तस्य कालत्रयाभावावबोधव्यवहारयोग्यतया लीयमानत्वम् । विमतः शिष्याचार्यरूपो भेदप्रपञ्चः वस्तुत आत्मन्यन्यत्र वा न कालत्रयेऽप्यस्ति, यत्र यत् प्रतिपन्नं तत्रैव ज्ञानापनोद्यत्वात् स्वप्नदृष्टप्रपञ्चवत् इत्यनुमानमाह—शिष्याचार्येति ॥ १० ॥

असत्यस्यापि सत्यार्थबोधकत्वम्

मिथ्याभूतोऽपि वेदान्तः सत्यमर्थं प्रबोधयेत् ।
देवताप्रतिमावच्च चित्रवत् प्रतिबिम्बवत् ॥ ११ ॥

---

[1] ब्रह्मसूत्रे. 2. 2. 33.

नन्वेवं सति प्रत्यग्ब्रह्मबोधकवेदान्तशास्त्रस्य कथं प्रामाण्यमित्यत आह—मिथ्याभूतोऽपीति ॥ स्वरूपेण मिथ्यात्वेऽपि वेदान्तस्य सत्यार्थज्ञापकत्वे दृष्टान्तमाह देवतेति । यथा अदेवतायां प्रतिमायां अरोपिताऽपि देवता पूजकस्य सत्यं फलं ददाति, न हि प्रतिमैव देवता, तथा सति तदुचितानेकलौकिकव्यापारवत्ताप्रसङ्गात् । यथा वा चित्रव्याघ्रगजादिः सत्यभयादिहेतुः बालस्य, यथा वा प्रतिबिम्बं बिम्बावदाततादिसत्यबोधकं, तथा वेदान्तः स्वयं मिथ्याभूतोऽपि सत्यब्रह्मतत्त्वबोधकः इत्यर्थः ॥ ११ ॥

मायिकस्य सर्वव्यवहारस्यापि प्रबोधेन बाधः

सर्वोऽपि व्यवहारोऽयं मायायाः परिजृम्भणम् ।
सुषुप्तिसदृशी माया स्वप्रबोधेन बाध्यते ॥ १२ ॥

किं बहुना—सर्व एव व्यवहारः मायामयः इत्यत्र न कोऽपि विघ्नः इत्युपसंहरति—सर्वोऽपीति ॥ परिजृम्भणं—विवर्तः । मायायाः स्वरूपं दृष्टान्तेन बुद्धिमारोहयति—सुषुप्तीति । स्वप्रबोधेन—आत्मावबोधेन वेदान्तजनितेन बाध्यते—अपलप्यत इत्यर्थः ॥ १२ ॥

मायास्वरूपम्

युक्तिहीनप्रकाशस्य संज्ञा मायेति कथ्यते ।
नासती दृश्यमाना सा बाध्यमाना न वा सती ॥

इदानीं मायायाः साक्षाल्लक्षणमाह—युक्तिहीनेति ॥ युक्तिहीनः प्रकाशः प्रतीतिमात्रं यस्य तस्य भासमानस्य मायेति संज्ञा कथ्यते इत्यर्थः । सर्वप्रकारयुक्त्यसहत्वे सत्यपि प्रकाशमानत्वं मायायाः लक्षणमित्यर्थः । तस्याः युक्तिशून्यप्रकाशत्वं साध्यते—नासतीति । दृश्यमाना, अपरोक्षतयेति शेषः । न सती, बाध्यमानत्वात् ॥ १३ ॥

न प्रकाशादियं भिन्ना छायेवार्कस्य तामसी ।
न चाभिन्ना जडत्वेन विरोधान्नोभयात्मिका ॥ १४ ॥

सदसद्विलक्षणत्वेऽपि भिन्नाभिन्नत्वाभ्यां सावयवनिरवयवत्वाभ्यां वा युक्तिसहेतेत्याशङ्क्य निराकरोति—न प्रकाशादिति ॥ यथा—अर्कस्य छाया तामसी रात्रिरूपा अर्काद्भिन्ना न तथेयमिति व्यतिरेकदृष्टान्तः । यद्वा—अर्कस्य छाया अर्काच्छादिका तामसी तमोदृष्टिभिः दिवान्धैः आरोपिता नार्काद्भिन्ना यथेत्यर्थः । 'परास्य शक्तिः'[1] इति श्रुतौ मायायाः आत्मशक्तित्वावगमात्, न हि शक्तिः शक्तिमतो भेदेन विभाव्यते । नापि चिदात्मनोऽभिन्ना, भिन्नाभिन्ना वा, जडत्वात् भिन्नत्वात् विषयत्वानुपपत्तिप्रसङ्गात् जडाजडयोरेकत्वायोगाच्च इत्याह—न चाभिन्नेति ॥ १४ ॥

स्वहेत्ववयवाभावात् नेयं सावयवोच्यते ।
न चावयवहीना सा कार्येष्ववयवान्विता ॥ १५ ॥

प्रकारान्तरमप्यपाकरोति—स्वहेत्ववयवाभावादिति ॥ अनादित्वादित्यर्थः । तस्या एव कार्याकारत्वात् कार्यस्य च सावयवत्वात् सैव कार्याकारेणावयवान्वितेत्यर्थः । न हि मायाविनिर्मितहस्त्यश्वादि निरवयवं भवतीति भावः ॥ १५ ॥

अविचारितसिद्धेयं मायावेश्याविलासिनी ।
पुरुषं वञ्चयत्येव मिथ्याभूतैः स्वविभ्रमैः ॥ १६ ॥

अतः प्रकारान्तराभावात् सिद्धमस्याः युक्तिहीनप्रकाशत्वं लक्षणमित्युपसंहरति—अविचारितेति ॥ १६ ॥

मायानिरसनमन्तरा मोक्षाभावः

न तस्याः मूलविच्छेदमभिवाञ्छन्ति केचन ।
तेषां पक्षे कथं मोक्षो मनसः सम्भविष्यति ॥ १७ ॥

ये वेश्याविलासवञ्चिताः चपलेन्द्रियग्रामाः वेश्यामायाविलासवंचिताः तां

---

[1] श्वेताश्वतरे. 6. 8.

न जिहासन्ति, तान् शोचन्नाह—न तस्याः इति ॥ मूलविच्छेदः—सवासनानिवृत्तिः । तदनिवृत्तौ को दोषः इति चेत्, संसारदुःखपरम्परायाः अनिवृत्तिरित्याह—तेषां पक्षे इति । मनसो मोक्षः—मनसस्सकाशान्मोक्षः मनोविलयो वा परमोपशमलक्षितपरमानन्दः तेषां कथं स्यादित्यर्थः ॥ १७ ॥

अवस्थात्रयम्

तिस्रोऽप्यवस्थाः मनसः जाग्रत्स्वप्नसुषुप्तयः ।
चक्रवत् परिवर्तन्ते भेदभ्रान्त्येकहेतवः ॥ १८ ॥

मनोमोक्षाभावे कथं परमानन्दालाभः इत्यत आह—तिस्रोऽपीति ॥ मनसि सति, तस्य मनसः तिस्रोऽपि जाग्रदाद्यवस्थाः चक्रवत् परिवर्तन्ते, भेदभ्रान्तेः मुख्यकारणभूताः इत्यर्थः । एतदुक्तं भवति—मनसः यदा बाह्येन्द्रियद्वारा बाह्यविषयाकारता भवति, तदा जाग्रदवस्था, यदा जाग्रद्दृष्टवासनामात्रतया अन्तः प्रविशति तदा स्वप्नावस्था, यदा पुनः नाडीच्छिद्रप्रचारं परित्यज्य स्वकारणे लीयते तदा अशेषविशेषवेद्यवेदनाकारप्रविलयात् सुषुप्तिर्भवति । एवं मनसः संचारात् भेदविभ्रमाः जायन्ते कर्तृक्रियाकारकफलाश्रयाः इति ॥ १८ ॥

तस्यैव बन्धनहेतुत्वम्

ताभिः करोति कर्माणि पुनस्तैर्बध्यते मनः ।

सति च भेदविभ्रमे किं स्यादिति तदाह—ताभिरिति ॥ भेदभ्रान्तिरित्यर्थः ॥

आत्मनः निर्लिप्तत्वम्

मनसः केवलः साक्षी भानुवत् पुरुषः परः ॥ १९ ॥

कथं मनसः संसारवर्णनं क्रियते, आत्मनः संसारित्वादित्यत आह—मनस इति । मनसः अनेकविकारिणः साक्षी पुरुषः केवलः—निर्विकारो मनसः परोऽन्यो, यथा जगत्साक्षी भानुरित्यर्थः । साक्षिणः अवस्थासंसार-

धर्मवत्त्वे तस्यापि साक्ष्यकोटिपतितत्वात् असाक्षिकं अवस्थात्रयं स्यादिति भावः ॥ १९ ॥

आत्मनः बन्धाभावः

यथा प्राणिकृतैरर्कः कर्मभिः नैव बध्यते ।
तथा मनःकृतैरात्मा साक्षित्वान्नैव बध्यते ॥ २० ॥

कर्मसाक्षित्वादेवायं पुरुषः कर्मभिः न लिप्यते इत्याह––यथा प्राणिकृतैरिति ॥ तथा च श्रुतिः––'सूर्यो यथा सर्वलोकस्य चक्षुः'[1] इत्यादि ॥ २० ॥

आत्मनि कर्तृत्वादिकं औपाधिकम्

आत्मा करोति कर्माणि बध्यते मुच्यते च तैः ।
इत्यौपचारिकी क्लृप्तिः भ्रममात्रैव केवलम् ॥ २१ ॥

यद्येवमकर्ताऽभोक्ता चात्मा, कथं तर्हि तस्मिन् वादिनां लोकागमयोश्च कर्तृत्वादिप्रसिद्धिः इत्याशङ्क्य, जपाकुसुमादिसन्निहिते स्फटिके लौहित्यावभासवत् कर्तृमनआदिसन्निध्युपाधिनिमित्तः तस्मिन् कर्तृत्वाद्यवभासः, अविवेकात् वादिलोकागमप्रसिद्धिः उपपद्यते इत्यभिप्रेत्याह––आत्मा करोतीति ॥ २१ ॥

आत्मनो मायाविदूरत्वम्

धूमाभ्रधूळीनीहारैः अस्पृष्टोऽपि दिवाकरः ।
यथा छन्न इवाभाति तथैवात्माऽपि मायया ॥ २२ ॥

यद्यात्मनो मनआद्युपाधिसम्बन्धाद्यथावदप्रकाशः, तर्हि तस्य कथं असङ्गकूटस्थत्वादिस्वभावता ? इत्याशङ्कां दृष्टान्तेन प्रत्याचष्टे––धूमाभ्रेति ॥ मायया ––मायातत्कार्यैरित्यर्थः ॥ २२ ॥

---

[1] न लिप्यते चाक्षुषैः बाह्यदोषैः, एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः' इति वाक्यशेषः. कठे. 5. 11.

विक्षेपावभासस्याप्यपारमार्थिकता

यथा लीलावशात् कैश्चित्[1] भ्राम्यमाणः कुमारकः ।
भ्रमत् तत् पश्यति[2] जगत् शतचन्द्रं नभस्स्थलम् ॥
तथैव मायया जीवो भ्रामितो वासनाशात् ।
नानाकारमिदं विश्वं भ्रममाणं च पश्यति ॥ २४ ॥

परमार्थत आवृतत्वाभावेऽप्यात्मनः आवृतत्वप्रतीतिं दृष्टान्तेनोपपाद्य, विक्षेपावभासोऽपि तस्य न परमार्थतः इत्यत्र दृष्टान्तमाह—यथा लीलावशादिति ॥ दार्ष्टान्तिकमाह—तथैवेति ॥ वासनावशात्—पूर्वपूर्वभ्रमजसंस्कारोद्बोधवशात् । नानाकारं देवतिर्यङ्मनुष्याद्यनेकाकारं भ्रममाणं चञ्चलमित्यर्थः ॥ २४ ॥

माययैवात्मनः भ्रामितत्वम्

संसृज्य मनसा देवः संसरन्निव लक्ष्यते ।
यथाऽर्को जलसंसर्गात् चलन् नानेव लक्ष्यते ॥ २५ ॥

मायया भ्राम्यमाणस्यापि जीवस्य न परमार्थतो भ्रमणमस्तीत्येतत् दृष्टान्तेनोपपादयति—संसृज्य मनसेति ॥ देवः—आत्मा । आत्मनो नानात्वप्रतिभासोऽप्यनेन दृष्टान्तेन मिथ्येत्युपपादितः इति दर्शयति—नानेव लक्ष्यते इति । चलन्निव नानेवेति योजना ॥

जीवन्मुक्त्युपायः

योगाभ्यासवशाद्येन मनो निर्विषयं कृतम् ।
निवृत्तः स पुमान् सद्यो जीवन्मुक्तो भविष्यति ॥ २६ ॥
द्वा सुपर्णौ च सयुजौ अभवन्मायया शिवः ।
अजामेकां जुषन्नेकः नानेवासीदिति श्रुतिः ॥ २७ ॥

तदेवं मायाद्वारकं जीवस्य चिदात्मनो बन्धमुपवर्ण्य, ससाधनं तत्त्वज्ञानद्वारकं मोक्षमाह—योगाभ्यासेति ॥ निर्विषयं कृतं—आलम्बनशून्यं अविषय-

---

[1] कश्चित् . क. [2] भ्रमार्तः पश्यति. क.

ब्रह्माकारं कृतमित्यर्थः। अत एव स पुमान् उपस्थितात् बाह्यविषयात् निवृत्तः सन् जीवन्मुक्तः सद्यः—निर्विषयात्मज्ञानोदयसमये एव भविष्यतीत्यर्थः ॥ अत्र जीवेश्वरयोः मायिकभेदानुवादिन्यौ ऋचौ उदाहरति—द्वा सुपर्णाविति ॥

'द्वा सुपर्णा सयुजा सखाया
    समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्ति
    अनश्नन्नन्यो अभिचाकशीति ॥[1]'
अजामेकां लोहितशुक्लकृष्णां
    बह्वीं प्रजां जनयन्तीं सरूपाम्[2]

इत्यादि ॥ २७ ॥

अष्टमश्लोकार्थोपसंहारः

इति श्रीदक्षिणामूर्तिस्तोत्रार्थप्रतिपादके ।
प्रबन्धे मानसोल्लासे अष्टमोल्लाससंग्रहः ॥ २८ ॥

अष्टमश्लोकव्याख्यामुपसंहरति—इतीति ॥ २८ ॥

इति श्रीमानसोल्लासे वृत्तान्ते च अष्टमोल्लासः ॥

—o—

[1] द्वौ शोभनपतनौ सहैव सर्वदा युक्तौ सखायौ पक्षिणौ अविशेषं शरीरात्मकं ऊर्ध्वमूलं अवाक्शाखं अश्वत्थं वृक्षं परिष्वक्तवन्तौ, तयोरन्यः क्षेत्रज्ञः कर्मनिष्पन्नं सुखदुःखाद्यात्मकं फलं स्वादु अत्ति, अविवेकतः इतरः नित्यशुद्धबुद्धमुक्तस्वभावः ईश्वरस्तु अनश्नन्नेव प्रकाशते इत्यर्थः. मुं. उ. 3. 1.

[2] अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः इति वाक्य शेषः. तै. उ. 4. 12.

अथ नवमः उल्लासः

उत्तरश्लोकस्य तत्त्वज्ञानसाधनप्रकाशकत्वम्

कथमेवंविधा माया निवर्तेतेति पृच्छतः ।
ईश्वरोपासनारूपः तदुपायः प्रकीर्त्यते ॥ १ ॥

अधुना यथोक्तामेश्वरतत्त्वज्ञानसाधनविधानाय उत्तरश्लोकः इति, तत्सङ्गतिमाह—कथमेवंविधेति ॥ १ ॥

भगवतः षट्त्रिंशत्तत्त्वमूर्तिकत्वम्

षट्त्रिंशत्तत्त्वरूपासु परमेश्वरमूर्तिषु ।
प्रत्यक्षेणोपलभ्यन्ते सर्वैरप्यष्टमूर्तयः ॥ २ ॥

किमालम्बनेश्वरोपासना कार्या? न हि निरालम्बनोपासना सम्भवति; नच ईश्वरः स्वरूपत एव तदालम्बनं भवति, तस्य निराकारत्वेन तदयोगात् इत्याशङ्क्य, प्रपञ्चोपधानकल्पितविग्रहस्येश्वरस्य युक्तं उपासनालम्बनत्वं इति परिहरति—षट्त्रिंशत्तत्त्वरूपास्विति ॥ षट्त्रिंशत्तत्त्वानि—शैवागमे प्रसिद्धानि । निर्धारणार्था सप्तमी । आकाशस्यापि मनोगोचरत्वं साक्षिमात्रगोचरत्वं वेति मतमाश्रित्य 'प्रत्यक्षेणोपलभ्यन्ते' इत्युक्तमिति द्रष्टव्यम् ॥ २ ॥

तस्य मूर्त्यष्टकस्वरूपत्वकथने हेतुः

अनुमेयासु न मनः क्षिप्रमारोहतीत्यतः ।[1]
मूर्त्यष्टकमयीं ब्रूते गुरुः सर्वात्मभावनाम् ॥ ३ ॥

कथमष्टावेव इमाः मूर्तयः उपादीयन्ते, नान्याः? इत्यतः आह—अनुमेयास्विति[2] ॥ गुरुः—श्रीशङ्कराचार्यः । प्रकाश्यप्रकाशकातिरिक्तस्य ज्ञेयस्य अभावात्, तस्य अष्टमूर्त्यतिरिक्तत्वाभावात्, अत्र वक्ष्यमाणाष्टमूर्तिध्यानमेव ईश्वरस्य सर्वात्मभावनेत्यभिप्रेत्योक्तं—सर्वात्मभावनामिति ॥ ३ ॥

---

[1] अमेयासु मनः क्षिप्रमारोढुं नार्हतीत्यतः॰ क.   [2] अमेयास्विति॰ च.

अधिकारभेदेन व्यक्ताव्यक्तोपसनयोः
मुक्तिसाधनत्वम्

'भूरम्भांस्यनलोऽनिलोऽम्बरं अहर्नाथो हिमांशुः पुमान्
इत्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।

अहर्नाथः—सूर्यः । पुमान्—त्रैलोक्यान्तर्यामी पुरुषः । यद्वा—पुमान् भोक्ता । अन्यत् प्रसिद्धम् । इत्येवं यदिदं चराचरात्मकं आभाति तत् सर्वं यस्यैव मूर्त्यष्टकं तस्मै इति सम्बन्धः । कथमेतत् विश्वं ईश्वरमूर्ति-

---

अत्रेयं तत्त्वसुधा—

इदानीं उक्तरूपब्रह्मापरोक्षज्ञाने मन्दाधिकारिणां[1] अष्टमूर्त्युपासनं क्रममुक्तिदायकं, उत्तमाधिकारिणां श्रोतव्यादिश्रुतिसिद्धवेदान्ततद्विषयब्रह्मविचारः साधनमित्यभिप्रेत्याह—भूरम्भांसीति ॥

भूः—पृथिवी, अम्भांसि—जलानि, अनलः—अग्निः, अनिलः—वायुः, अम्बरं—आकाशः, अहर्नाथः—सूर्यः, हिमांशुः—चन्द्रः, पुमान्—सकलकर्मविद्याधिकारी जीवः, इति—एवम्प्रकारेण, यस्यैव—परमेश्वरस्य सर्वज्ञस्य सर्वशक्तेः सच्चिदानन्दाद्वयस्य सदाशिवस्यैव मूर्त्यष्टकं—मूर्तीनां विग्रहभूतानां अष्टकं आभाति—आ समन्ताद्भाति । अयमर्थः—उपासकः स्वदेहे वर्तमानपञ्चभूतानि व्यष्टिभूतानि समष्टिभूतैः प्राणापानौ च सूर्यशशाङ्काभ्यामेकीकृत्य, पञ्चभूतात्मकशरीराभिमानिनं स्वात्मानमष्टमूर्तं परमेश्वरेणैकीकृत्य, सकलव्यापी अष्टमूर्त्यात्मकस्सदाशिवोऽस्मीति चिन्तयेत् । ततो भावनातिशयेन तत्सायुज्यं प्राप्य सर्वैश्वर्यसम्पन्नः अन्ते तत्प्रसादासादिततत्त्वज्ञानेन तत्त्वसाक्षात्कारेण विमुच्यते इति । विमृशतां—तत्त्वं विधिवद्गुरुश्रुतिभ्यो युक्त्या चानिशं विचारयतां पुरुषाणां परस्मात्—सर्वकारणात् विभोः—विविधप्रपञ्चात्मना भवतः विवर्तमानात् यस्मात्—सर्वाधिष्ठानात् सच्चिदानन्दात्मकात्परमेश्वरात् अन्यत्—पृथक् किञ्चन—किञ्चिदपि न विद्यते—न भवति, सर्वस्य तस्मिन् परमेश्वरे अध्यस्तत्वेन तन्मात्रत्वात् । तथा चोक्तं महिम्नस्तवे—

---

[1] यद्धर्मविशिष्टः सन् कृतकर्मानुबन्धिफलसम्पन्नो भवति तत्तद्धर्मविशिष्टः तत्तत्कार्येषु अधिकारी.

नान्यत् किंचन विद्यते विमृशतां यस्मात् परस्मात् विभोः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ।। ९ ।।'

रूपं ईश्वराद्भिन्नत्वादस्य ? इत्याशङ्क्याह—नान्यदिति ॥ विमृशतां—विचारं कुर्वतां यस्मात्—परस्मात् सर्वकारणाद्विभोः अपरिच्छिन्नादीश्वरात् अन्यन्न विद्यते, विचार्यमाणे ईश्वरात् पृथक् स्वातन्त्र्येण जगतोऽभावात् सर्वमस्मिन् कल्पितं, अस्यैव शरीरमित्यभिप्रायः । यत्तदोरन्वयः पूर्ववत् ॥ ९ ॥

'त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहः
त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ।
परिच्छिन्नामेवं त्वयि परिणतां बिभ्रति गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि ।।'[1] इति ।

श्रुतिश्च—

'विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् ।
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ।'[2]
'यस्मात् परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् ।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ।[3]

इत्याद्या । स्तब्धः—निश्चलः, दिवि—स्वप्रकाशे स्वरूपे । तथा च उक्तरूपब्रह्मात्मज्ञानात् उत्तमाधिकारिणां इहैव सच्चिदानन्दाद्वयपरशिवरूपेणावस्थानलक्षणा मुक्तिः आसाद्यते, 'अत्र ब्रह्म समश्नुते'[4] इत्यादि श्रुतेः इति भावः । तस्मै—ज्ञानोपदेष्ट्रे गुरुरूपाय दक्षिणामूर्तये परमेश्वराय नमोऽस्तु इति ॥

---

[1] महिम्नस्तवे. 27. [2] तै. उ. 4. 24. [3] तै. उ, 4. 12.

[4] 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः, अथ मर्त्योऽमृतो भवति अत्र ब्रह्म समश्नुते' इति पूर्णवाक्यम् । प्रबोधात् प्राक् मर्त्यस्य स्थितस्य बुद्धौ ये कामयितव्याः आसन् तेषां सर्वेषां विशरणे अविद्याकामकर्मलक्षणस्य मृत्योः विनाशात् अमृतो भवति, प्रदीपनिर्वाणवत् सर्वबन्धनोपशमात् ब्रह्मैव भवति इत्यर्थः कठे. 6. 14.

सर्वस्यापि जगतः अष्टमूर्त्यात्मकत्वम्

अस्यैवं सिद्धान्तः—

विराट्छरीरे ब्रह्माण्डे प्राणिनामपि विग्रहे ।
षट्त्रिंशत्तत्त्वसंघातः सर्वत्राप्यनुवर्तते ॥ ४ ॥

अस्य तात्पर्यतो व्याख्यानप्रपञ्चनामारभते—अस्यैवमिति ॥ अत्रेदं विवक्षितं—अष्टमूर्त्यात्मकं सर्वं जगत्, तच्च महेश्वरविग्रहं षट्त्रिंशत्तत्त्वात्मकम्, तच्च द्विविधं—अधिदैवं अध्यात्मं चेति । तत्राद्यं ब्रह्माण्डं चतुर्दशभुवनात्मकं, द्वितीयं पिण्डात्मकम्, एतयोः कार्यकारणरूपेणाभेदात् । समष्टिब्रह्माण्डावयवान् सर्वान् व्यष्टिपिण्डावयवेषु सम्पाद्य पिण्डावयविनं च ब्रह्माण्डावयव्यात्मना सम्पाद्य, महेश्वरं तदात्मतयाऽनुगतं ध्यायन्, तस्मिन् स्थिरीकृतान्तःकरणः तत्प्रसादात् तस्यैव निर्विशेषं तत्त्वं पूर्वश्लोकैरष्टभिः प्रतिपादितं साक्षात्कृत्य कृतकृत्यो भवतीति । तदेतत् सर्वं क्रमेण दर्शयति —विराडित्यादिना ॥ ब्रह्माण्डे—समष्टिरूपे; प्राणिनां विग्रहे—व्यष्टिरूपे । षट्त्रिंशत्तत्त्वानि द्वितीयश्लोकोल्लासे विवृतानि[1] । पञ्चभूतानि, पञ्चप्राणाः चतुर्दशेन्द्रियाणीति चतुर्विंशतिः; महान्, कालः, प्रधानं, माया, विद्या पुरुष इति षट्, बिन्दुनादौ शक्तिशिवौ शान्तातीताविति षट्; एवं षट्त्रिंशत्तत्त्वानि यानि शैवागमे प्रसिद्धानि तानि सर्वत्र—पिण्डे ब्रह्माण्डेऽपि अनुवर्तन्ते इत्यर्थः । न हि पिण्डब्रह्माण्डातिरिक्तं किंचिदस्ति, तदपि अष्टमूर्तिव्यतिरिक्तं नास्तीति भावः ॥ ४ ॥

पिण्डे ब्रह्माण्डसम्पत्तिरेव उपासनाफलम्

व्याप्तिः व्यष्टिशरीरेऽस्मिन् मनसो व्यष्टिरूपिणः ।
तस्मात् सर्वात्मकमिदं स्वशरीरं विचिन्तयेत् ॥ ५ ॥

---

[1] मानसोल्लासे 2. 42. (p. 52)

तत्र पिण्डे ब्रह्माण्डसम्पादनप्रकारं वक्तुं तावन्निमित्तमाह—व्याप्तिरिति ॥ व्यष्टिरूपिणो मनसः अस्मिन् व्यष्टिशरीरे व्याप्तिः यस्मात् तस्मादिति योजना । 'त एते सर्व एव समाः सर्वेऽनन्ताः'[1] इति वाङ्मनःप्रमाणाननुक्रम्य हिरण्यगर्भरूपेण आम्नानात् मनसो व्यापकत्वम् । तस्य मनःप्रधानालिङ्गात्मनः समष्टिशरीरस्य तत्कार्यव्यष्टिशरीरे व्याप्त्युपपत्तेश्च, तद्द्वारा व्यष्टिपिण्डस्यापि युक्तं सर्वात्मकत्वमिति भावः ॥ ५ ॥

व्यष्ट्युपासनया पुंसः समष्टिव्याप्तिमाप्नुयात् ।
उपसंक्रामतीत्येवं दशकृत्व उपादिशत् ॥ ६ ॥

यस्माच्चैवं पिण्डब्रह्माण्डयोः एकहिरण्यगर्भरूपत्वात् अत्यन्तमभेदः, तस्मात् पिण्डात्मना महेश्वरोपासनया समष्टिब्रह्माण्डात्मतां लभते इति, पिण्डे ब्रह्माण्डसम्पत्तिः कर्तव्येत्याह—व्यष्टीति ॥ पुंसः व्यष्ट्युपासनयेत्यन्वयः । पुंसः—परमेश्वरस्य व्यष्टिशरीरान्तरात्मना उपासनयेत्यर्थः । आप्नुयात्, उपासकः इति शेषः । तत्र प्रमाणमाह—उपसंक्रामतीत्येवमिति । तैत्तिरीयोपनिषत्सु प्रथममध्यात्मं पञ्चकोशानन्नमयादीननुक्रम्य, अन्ते—'एतमन्नमयमात्मानमुपसङ्क्रामति, एतं प्राणमयमात्मानमुपसंक्रामति । एतं मनोमयमात्मानमुपसंक्रामति । एतं विज्ञानमयमात्मानमुपसङ्क्रामति ।'[2] इति पञ्चकृत्वः सङ्क्रमणं अनन्दमयकोशान्तर्गतसर्वाधारव्यापकब्रह्मप्राप्तिरूपं उक्तम् । तथा भृगुवल्ल्यां च—अधिदैवं पञ्चकोशाननुक्रम्य, अन्ते—'एतमन्नमयमात्मानमुपसङ्क्रम्य'[3] इत्यादिना पञ्चकृत्वः तस्यैव सङ्क्रमणमाम्नातमिति परिच्छिन्नदृष्टेरपि पूर्णात्मविषयतया परिपूर्णप्राप्तिहेतुना प्रमाणसिद्धेत्यर्थः ॥ ६ ॥

ब्रह्माण्डपिण्डाण्डयोः समन्वयारम्भः

ब्रह्माण्डस्योदरे लोकाः सप्त भूरादयः स्मृताः ।
मूलादिब्रह्मरन्ध्रान्तेष्वाधारेषु वसन्ति ते ॥ ७ ॥

---

[1] बृ. उ. 3. 5. 13. [2] तै. उ. 2. 8. 5. [3] तै. उ. 3. 10. 5.

इदानीं सम्पत्तिमनुक्रमते—ब्रह्माण्डस्येति ।। भूरादयः सप्त लोकाः ये ब्रह्माण्डस्योदरे स्थिताः वर्तन्ते, ते मूलाधारादिब्रह्मरन्ध्रान्तेषु स्वाधारेषु वसन्ति, मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञासहस्रारेषु क्रमेण भूर्भुवस्स्वर्महर्जनस्तपस्सत्यमित्येते सप्त लोकाः वसन्तीति ध्यायेदित्यर्थः ।। ७ ।।

महामेरुः गङ्गायमुनासरस्वत्यः द्वीपाः समुद्राश्च

वीणादण्डो महामेरुः अस्थीनि कुलपर्वताः ।
गङ्गा तु पिङ्गळा नाडी यमुनेडा प्रकीर्तिता[1] ।। ८ ।।
सरस्वती सुषुम्नोक्ता नाड्योऽन्याः पुण्यनिम्नगाः ।
द्वीपाः स्युर्धातवः सप्त स्वेदबाष्पादयोऽब्धयः ।। ९ ।।

सम्पूर्णे पिण्डे लोकसंस्थानसम्पत्तिमुक्त्वा तत्रैव भूलोकसंस्थानविशेषसम्पादनप्रकारमाह—वीणादण्डः इति ।। अन्तस्सुषिरः पृष्ठवंशः—वीणादण्डः, सः महामेरुः—मध्यत्वोन्नतत्वसामान्यात् । तत्पार्श्वास्थीनि कुलपर्वताः—पारियात्रादयः, परितो विक्षिप्ततया स्थितत्वात् । गङ्गानदीं पिङ्गळानाड्यां सम्पादयेत्, इडायां यमुनां, सुषुम्नायां सरस्वतीं; पार्श्वयोर्मध्ये च प्रकटगुप्तत्वसामान्यात् नाडीत्रयं नदीत्रयात्मना ध्येयमित्यर्थः । अन्यासु नाडीषु सर्वाः अन्या नदीः सम्पादयेदित्याह—नाड्योऽन्या इति । त्वगादयः सप्त धातवो जम्ब्वादिद्वीपाः ध्येयाः इत्यर्थः । स्वेदबाष्पादयः शरीरगाः द्वीपावेष्टितसप्तसमुद्रत्वेन ध्येयाः इत्यर्थः ।। ९ ।।

सोमसूर्याग्नयः नक्षत्राणि च

मूले तिष्ठति कालाग्निरस्थिमध्ये च बाडबः ।
वैद्युतोऽग्निः सुषुम्नायां पार्थिवो नाभिमण्डले ।। १० ।।
हृदि तिष्ठति सूर्याग्निः कपाले चन्द्रमण्डलम् ।
नक्षत्राण्यपराण्याहुः नेत्रादीनीन्द्रियाण्यपि ।। ११ ।।

---

[1] शारदातिलकादितन्त्रग्रन्थेषु अस्य विस्तरो द्रष्टव्यः

मूले मूलाधारे कालाग्निः—प्रळयकालानलः, अस्थिमध्ये—अस्थिकूटान्तराळे स्वेदाद्यब्धिशोषको बाडबाग्निः तिष्ठतीत्यर्थः । वैद्युतोऽग्निः—दिव्योऽग्निः सुषुम्नायां तिष्ठति क्षणस्फुरणत्वात्, सर्वनाडीसूक्ष्मधाराप्रवर्तकत्वाद्वेत्यर्थः । पार्थिवः—पृथिवीधातुशोषणोऽग्निः, स नाभिमण्डले ध्येय इत्यर्थः । हृदीति प्रसिद्धार्थम् । कपालं—ललाटम् । अपराणि नक्षत्राणि—चन्द्रव्यतिरिक्तानि अश्विन्यादीनि सप्तविंशतिसङ्ख्यानि, तथा मङ्गळबुधादिग्रहाश्च नक्षत्ररूपेण दृश्यमानाः, ते सर्वे नेत्रादीन्द्रियेषु ध्येयाः इत्यर्थः ॥ ११ ॥

वायवः

धार्यन्ते वायुभिर्लोकाः यथा प्रवहणादिभिः ।
प्राणादिभिर्दशविधैर्धार्यते वायुभिर्वपुः ॥ १२ ॥

स्वप्रचारेण ब्रह्माण्डधारकं वायुमन्तश्शरीरे देहधारकप्राणात्मना ध्यायेदित्याह—धार्यन्त इति ॥ प्रहवणसंवहनादिभिः सप्तभिः भेदैरित्यर्थः ॥ १२ ॥

प्राणापानौ

प्राप्येडापिङ्गळे प्राणः मूलात् सूर्यस्वरूपतः ।
नासिकाभ्यां बहिर्गत्वा लीयते द्विषडङ्गुले ॥ १३ ॥
अष्टाङ्गुळेन सोमात्मा नाडीभ्यामन्तराविशत्[1] ।
मलमूत्रमरुच्छुक्राण्यपानो विसृजेद्बहिः ॥ १४ ॥

प्राणस्य दशविधत्वं तत्कार्यनिर्देशनद्वारा दर्शयति—प्राप्येति ॥ मूलात्—मूलाधारात् उत्थिते इडापिङ्गळे नाड्यौ प्राप्य सूर्यरूपतः—सूर्यवदूष्माश्रयस्सन् नासिकाभ्यां—द्वाराभ्यां बहिर्देहात् गत्वा द्विषडङ्गुले—द्वादशाङ्गुळमात्रदेशे लीयते—लयं—अदर्शनं गच्छतीत्यर्थः ॥ सोमात्मा सन् स एव प्राणोऽपानं प्रणुदन् अष्टाङ्गुलेन देशेनागत्य नाडीभ्यां—इडापिङ्गळारूपाभ्यां

---

[1] राविशेत् . क.

नासिकाछिद्राभ्यां अन्तः—शरीरमध्ये आविशत् । तत्रापानः वायुर्मलादि बहिर्विसृजेत्—गुदद्वारेत्यर्थः ॥ १४ ॥

उदानव्यानसमानाः

अग्नीषोममयो भूत्वा सुषुम्नारन्ध्रमाश्रितः ।
आब्रह्मरन्ध्रमुद्गच्छन् उदानो वर्धते स्वयम् ॥ १५ ॥
व्यापयेद्वपुषि व्यानः भुक्तान्नरसमन्वहम् ।
सन्धुक्षणं समानस्तु कायाग्नेः कुरुते सदा ॥ १६ ॥

तस्यैवोदानापत्तिमाह—अग्नीषोममय इति ॥ वर्धते—विजृम्भते ॥ भुक्तान्नरसं अन्वहं—प्रत्यहं यः उपरि देहनाडीषु व्यापयेत्—विविधं आसमन्तात् प्रापयेत्, प्रचारयत् सर्वनाडीर्व्याप्नोतीत्येतत्, सः व्यानः इत्यर्थः । सन्धुक्षणं—प्रज्वलनानुकूलो व्यापारः । कायाग्नेः सदा सन्धुक्षणं कुर्वन् समानः इत्यर्थः ॥ १६ ॥

नागकूर्मकृकरदेवदत्तधनञ्जयाः

नागो हिक्काकरः कूर्मो निमेषोन्मेषकारकः ।
क्षुतं करोति कृकरः देवदत्तो विजृम्भणम् ॥ १७ ॥
स्थौल्यं धनञ्जयः कुर्यात् मृतं चापि न मुञ्चति ।

श्रुतिप्रसिद्धान् प्राणादिपञ्चवायून् विभज्य योगशास्त्रप्रसिद्धान् नागादीनपरान् पञ्च वायून् विभजते—नागो हिक्काकरः इत्यादिना ॥ निमेषोन्मेषणे नेत्रयोः कुर्वन् कूर्मः इत्यर्थः । विजृम्भणं—तन्द्रीवशात् आस्यविदारणम् । स्थौल्यं—देहोपचयम् । मृतं च—शवरूपमपि न मुञ्चति, तत्राप्युच्छूनत्वकारणवायुः—धनञ्जयः इत्यर्थः ॥

आकाशः

आकाशो बहिरभ्यन्तरवकाशं प्रयच्छति ॥ १८ ॥

एतावता 'भूरम्भास्यनलोऽनिलः' इत्यन्तं व्याख्यातम् । इदानीमम्बरादीन् व्याचक्षाणः तत्सम्पादनं सूचयति—आकाशः इति ॥ १८ ॥

सूर्यचन्द्रौ पुरुषश्च

चन्द्रार्कौ कालनेतारौ प्राणापानौ शरीरिणाम् ।

साक्षी पुरुषः इत्येवं मूर्त्यष्टकमिदं वपुः ॥ १९ ॥

यौ कालनेतारौ सिद्धौ चन्द्रार्कौ तौ शरीरिणां—शरीरे प्राणापानौ ध्येयाविर्त्यथः । यः साक्षी संघातस्य स पुरुषः—पुमानित्युक्त इत्यर्थः । 'इत्याभाति चराचरात्मकम्' इत्येतद्व्याचष्टे—इत्येवमिति ॥ १९ ॥

एवंविधब्रह्माण्डसमन्वयोपायः

समनस्कमिदं योगी सेवमान उपासनम् ।

अष्टाङ्गयोगयुक्तस्सन् अमनस्कं स गच्छति[1] ॥ २० ॥

एवमष्टमूर्तिस्वरूपं देह एव सम्पाद्य ध्यायतः फलमाह—समनस्कमिति ॥ मनसा व्याप्तत्वात् समनस्कं इदं अष्टमूर्तिलक्षणं उपासनं—ध्यानं सेवमानः—अभ्यस्यन् योगी—योगनिरतः । कथं योगी? अष्टाङ्गयोगयुक्तस्सन् । सः अमनस्कं अलिङ्गं ईश्वरं गच्छति, तत्पदमाप्नोतीत्यर्थः । २० ॥

अष्टाङ्गयोगे यमाः

मनःप्रसादः सन्तोषः मौनं इन्द्रियनिग्रहः ।

दया दाक्षिण्यमास्तिक्यं आर्जवं मार्दवं क्षमा ॥ २१ ॥

भावशुद्धिः अहिंसा च ब्रह्मचर्यं स्मृतिर्धृतिः ।

इत्येवमादयोऽन्ये च मनस्साध्या यमाः स्मृताः ॥ २२ ॥

इदानीं योगाष्टाङ्गानि विभजते—मनःप्रसादः इत्यादिना ॥ मनसः उद्रिक्तसत्त्वावस्थापत्तिः—प्रसादः—प्रसन्नता—लक्ष्ये विक्षेपाभावेनावस्थितिरिति यावत् । सन्तोषः—यदृच्छालाभसन्तुष्टिः । मौनं—वृथा वागुत्सर्जनत्यागः इन्द्रियनिग्रहः—तद्वशीकरणम् । दया—भूतद्रोहाकरणम् । दाक्षिण्यं

---

[1] अमनस्कयोगविवरणं योगतारावलीराजयोगभाष्ययोः द्रष्टव्यम् . अष्टाङ्गयोग-विवरणं च पातञ्जलयोगसूत्रभाष्ययोः द्रष्टव्यम् .

—व्यवहारे दक्षता—आग्रहराहित्यमित्येतत्। आस्तिक्यं—शास्त्राद्युक्तविषये विश्वासः। आर्जवं—ऋजुत्वं अकुटिलत्वम्। मार्दवं मृदुत्वं अकठिनत्वम्। क्षमा—क्रोधहेतुष्वपि क्रोधपरित्यागः। भावशुद्धिः—वचनोच्चारणादौ मनःशुद्धिः—शुद्धान्तःकरणत्वमिति यावत्। अहिंसा—परपीडावर्जनम्। ब्रह्मचर्यं—अष्टाङ्गमैथुनत्यागः। स्मृतिः—जन्ममृत्युजराव्याधिदुःखदोषानुसन्धानम्। धृतिः—धैर्यं—मनःप्राणेन्द्रियाणामवसादप्राप्तावुत्तम्भनमिति। एवमादयः 'अमानित्वमदम्भित्वं'[1]इत्यादयः, अन्ये च—अद्वेष्टृत्वादयश्च[2] ये मनसः साध्या योगसाधनभूता धर्माः ते इमे यमाः स्मृताः उक्ताः विद्वद्भिरित्यर्थः। मनोमात्रसाध्याः निवृत्तिलक्षणयोगाङ्गविशेषाः—यमाः इति यमलक्षणमनेनोक्तमिति द्रष्टव्यम्॥ २२॥

नियमाः

स्नानं शौचं क्रतुस्सत्यं जपो होमश्च तर्पणम्।
तपो दानं तितिक्षा च नमस्कारः प्रदक्षिणम्॥ २३॥
व्रतोपवासाद्याश्चान्ये कायिकाः नियमास्स्मृताः।

---

[1] अमानित्वमदम्भित्वं अहिंसा क्षान्तिरार्जवम्, आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः. इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च, जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्. असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु, नित्यं च समचित्तत्वं इष्टानिष्टोपपत्तिषु, मयि चानन्ययोगेन भक्तिरव्यभिचारिणी, विविक्तदेशसेवित्वं अरतिः जनसंसदि, अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्. गीता. 13. 7—11.

[2] अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च, निर्ममो निरहङ्कारः समदुःखसुखः क्षमी. सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः मय्यर्पितमनोबुद्धिः यस्मान्नोद्विजते लोकः लोकान्नोद्विजते च यः, हर्षामर्षभयोद्वेगैः मुक्तः, अनपेक्षः शुचिः दक्षः उदासीनो गतव्यथः, सर्वारम्भपरित्यागी, यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति, शुभाशुभपरित्यागी, समः शत्रौ च मित्रे च तथा मानापमानयोः, शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः, तुल्यनिन्दास्तुतिः मौनी सन्तुष्टो येनकेनचित्. अनिकेतः स्थिरमतिः. गीता. 12, 13—19.

नियमान् कायसाध्यलक्षणान् योगविशेषानाह—स्नानमिति ॥ स्नानशौचे बाह्ये एव ग्राह्ये, भावशुद्धेः यमेषूक्तत्वात् । क्रतुः—ईश्वरपूजनम् । सत्यं —यथार्थवचनम् । तितिक्षा—द्वन्द्वसहनम् । व्रतोपवासाद्याः तत्तत्कालोचिताः । अन्येऽपि ये योगाविरोधिनः आहारविहारादयः कायिकाः—कायसाध्याः । उपलक्षणमेतत्, कायवाक्साध्याः इत्यर्थः ॥

आसनानि

स्वस्तिकं गोमुखं पद्मं हंसाख्यं ब्राह्ममासनम् ॥ २४ ॥
नृसिंहं गरुडं कूर्मं नागाख्यं वैष्णवासनम् ।
वीरं मयूरं वज्राख्यं सिद्धाख्यं रौद्रमासनम् ॥ २५ ॥
योन्यासनं विदुश्शाक्तं शैवं पश्चिमतानकम् ।
निरालम्बनयोगस्य निरालम्बनमासनम् ॥ २६ ॥
निरालम्बतया ध्यानं निरालम्बः सदाशिवः ।

आसनान्याह—स्वस्तिकमित्यादिना ॥ स्वस्तिकाद्यासनचतुष्टयं ब्राह्मं—ब्रह्मदेवत्यमित्यर्थः । नृसिंहादिचतुष्टयं वैष्णवं—विष्णुदेवत्यम् । वीरादिचतुष्टयं रौद्रं—रुद्रदेवत्यम् । योन्यासनं शक्तिदेवत्यं विदुरित्यर्थः । पश्चिमतानकं नाम आसनं शैवं विदुर्योगिन इति योजना ॥ योगविशेषे चासनविशेषमाह—निरालम्बनेति । निरालम्बनं करचरणादिसंस्थानविशेषनियमालम्बनरहितम् । कोऽसौ निरालम्बयोगः इत्यपेक्षायामाह—निरालम्बतया ध्यानमिति । को निरालम्बः इत्यत आह—निरालम्बः सदाशिव इति । सदाशिवः—निर्विशेषः परमात्मा, तदालम्बनं—तस्मिन् मनस्समाधानं निरालम्बनयोगः इत्यर्थः । स्वस्तिकाद्यासनानां लक्षणानि योगग्रन्थेभ्योऽवगन्तव्यानि ॥

प्राणायामः

रेचकः पूरकश्चैव कुम्भकः प्राणसंयमः ॥ २७ ॥

इदानीं प्राणायामानाह—रेचक इति । रेचकपूरककुम्भकरूपः त्रिविधः प्राणनिरोधः प्राणायामः इति तात्पर्यार्थः ॥ २७ ॥

प्रत्याहारः

इन्द्रियाणां समस्तानां विषयेभ्यो निवारणम् ।
प्रत्याहार इति प्रोक्तं प्रत्याहारार्थवेदिभिः ॥ २८ ॥

प्रत्याहारानाह—इन्द्रियाणामिति ॥ स्पष्टोऽर्थः ॥ २८ ॥

धारणा

आधारे क्वापि मनसः स्थापनं धारणोच्यते ।

धारणाख्यं योगाङ्गमाह—आधार इति । क्वापि—मणिपूरकादिषु चक्रेष्वित्यर्थः । अथवा—क्वापि—शुभविषये ह्याविष्कृतविष्णवादिमूर्तौ इत्यर्थः ॥

ध्यानम्

ब्रह्मविष्णुशिवादीनां चिन्ता ध्यानं प्रचक्षते ॥ २९ ॥

ध्यानमाह—ब्रह्मविष्णुशिवादीनामिति ॥ धारणा—प्राणेन सह मनसः क्वापि स्थिरीकरणमात्रं, ध्यानं तु—विषयविशेषे विष्ण्वादौ मनोवृत्तिधाराप्रवाहः इति भेदः ॥ २९ ॥

समाधिः

ध्यानादस्पन्दनं बुद्धेः समाधिरभिधीयते ।
अमनस्कसमाधिस्तु सर्वचिन्ताविवर्जितम् ॥ ३० ॥

अष्टममङ्गं समाधिमाह—ध्यानादिति । अयं सविकल्पकः समाधिः समनस्को ज्ञातृज्ञेयविभागोल्लेखलेशसहितः अङ्गमित्यर्थः । एतैः अङ्गैः साध्यं निर्विकल्पकसमाधिरूपं अङ्गिनं योगमाह—अमनस्कसमाधिस्त्विति । सर्वचिन्ता—ज्ञातृज्ञेयविभागोल्लेखः, तद्विवर्जितं—लयविक्षेपरहिततया प्रशान्तावस्थमित्यर्थः ॥ ३० ॥

चित्तचाञ्चल्यपरिहारस्यावश्यकता

चित्ते निश्चलतां याते प्राणो भवति निश्चलः ।
चित्तस्य निश्चलत्वाय योगं सध्यानमभ्यसेत् ॥ ३१ ॥

चित्तनैश्चल्यफलमाह—चित्त इति ॥ प्राणनैश्चल्ये चित्तनैश्चल्यं हेतुरुक्तः । चित्तनैश्चल्ये तु अष्टाङ्गयोग एव हेतुः । अतः तं यत्नेनाभ्यसेदित्याह—चित्तस्येति । सध्यानमिति ध्यानमात्रग्रहणं तत्रादरातिशयद्योतनार्थम् ॥ ३१ ॥

प्राणजयस्यावश्यकता

आकुञ्चनमपानस्य प्राणस्य च निरोधनम् ।
लम्बिकोपरि जिह्वायाः स्थापनं योगसाधनम् ॥ ३२ ॥

पुनरेकमन्यं योगसाधनमाह—आकुञ्चनमिति ॥ गुदद्वारस्य सङ्कोचनेन वायोरूर्ध्वस्रोतः प्रवर्तनं आकुञ्चनं; कुम्भकेन प्राणस्य शरीरान्तर्निरोधनं; लम्बिका—तालुमूले स्तनाकारो मांसखण्डः[1], तदुपरि जिह्वायाः स्थापनं—बलान्निरोधः इत्येतद्योगस्य—चित्तवृत्तिनिरोधलक्षणस्य साधनं—उत्कृष्टो हेतुरित्यर्थः ॥ ३२ ॥

स्थानविशेषे चित्तस्थैर्यप्राणजययोः प्राथमिकलक्षणानि

चित्ते निश्चलतां याते प्राणे मध्यपथं गते[2] ।
चिह्नान्येतानि जायन्ते पञ्चभूतजयात् पृथक् ॥ ३३ ॥
मलमूत्रकफाल्पत्वमारोग्यं लघुता तनोः ।
सुगन्धः स्वर्णवर्णत्वं[3] प्रथमं योगलक्षणम् ॥ ३४ ॥

इदानीमभ्यासवशीकृतचित्तप्राणस्य योगिनश्चिह्नान्याह—चित्ते निश्चलतां याते इति ॥ पञ्चभूतजयात् पृथगित्यस्यायमर्थः—पादादिजानुपर्यन्तं पृथिवी-

---

[1] अत्र 'अन्तरेण तालुके, य एष स्तन इवावलम्बते, सेन्द्रयोनिः' इति श्रुतिरनुसन्धेया.

[2] प्राणमध्ये लयं गते. च. [3] स्वरवर्णत्वं. क.

स्थानं, जान्वादिनाभिपर्यन्तं अपां स्थानं, तदादि कण्ठपर्यन्तं तेजस्स्थानं, ततो भ्रूमध्यपर्यन्तं वायुस्थानं, तत ऊर्ध्वं ब्रह्मरन्ध्रपर्यन्तं आकाशस्थानं, एतेषु धारणाभ्यासक्रमेण एतज्जयादेतानि चिह्नानि भवन्तीति ॥ कानि तानीत्यपेक्षायामाह—मलमूत्रेति । प्रथमं योगलक्षणं पृथिव्याख्यप्रथमभूमिकाजयपर्यन्तस्य योगस्य लक्षणमित्यर्थः । एवमुत्तरत्रापि योजना । अत्रास्ति श्वेताश्वतरीयाणां मन्त्रोपनिषत्—'युञ्जानः प्रथमं मनः' इति योगं प्रकृत्य—

'पृथ्व्याप्यतेजोनिलखे समुत्थिते पञ्चात्मके योगगुणे प्रवृत्ते ।
न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरम् ॥
लघुत्वमारोग्यमलोलुपत्वं वर्णप्रसादं स्वरसौष्ठवं च ।
गन्धः शुभो मूत्रपुरीषमल्पं योगप्रवृत्तिं प्रथमां वदन्ति ॥'[1]

इति ॥ ३४ ॥

द्वितीयतृतीयचतुर्थपञ्चमलक्षणानि

कण्टकाग्रेष्वसङ्गत्वं जलपङ्केष्वमज्जनम्[2] ।
क्षुत्तृडादिसहिष्णुत्वं द्वितीयं योगलक्षणम् ॥ ३५ ॥

द्वितीयभूमिकाधारणासिद्धिचिह्नान्याह—कण्टकाग्रेष्विति ॥ असङ्गत्वं—कण्टकैरवेधनम् ॥ ३५ ॥

बह्वन्नपानभोक्तृत्वं आतपाग्निसहिष्णुता[3] ।
दर्शनं श्रवणं दूरात् तृतीयं योगलक्षणम् ॥ ३६ ॥

तृतीयामाह—बह्वन्नेति ॥ ३६ ॥

---

[1] ध्यानारम्भे परमात्मनि मनः संयोजनीयमिति प्रकृत्येत्यर्थः; समुत्थिते—ध्यानेन तत्प्रयुक्तकार्ययोग्यतया वशीकृते, प्रवृत्ते—निष्पादिते. अलोलुपत्वं—विषयालम्पटत्वम्, वर्णप्रसादः—नयनाह्लादकररूपवत्त्वम्, चतसृषु योगावस्थासु प्रथमेयमवस्थेति भावः. श्वे. उ. 2, 12—13.

[2] जलसङ्गेऽप्यमज्जनम् . ग. [3] आतपादिसहिष्णुता. ग.

मण्डूकप्लवनं भूमौ मर्कटप्लवनं द्रुमे ।
आकाशगमनं चेति चतुर्थं योगलक्षणम् ॥ ३७ ॥

चतुर्थलक्षणमाह—मण्डूकप्लवनमिति ॥ ३७ ॥

ज्ञानं त्रिकालविषयमैश्वर्यमणिमादिकम् ।
अनन्तशक्तिमत्त्वं च पञ्चमं योगलक्षणम् ॥ ३८ ॥

पञ्चमं योगलक्षणमाह—ज्ञानमिति ॥ अनन्तशक्तिमत्त्वं—अपरिमितबलवत्त्वम् ॥ ३८ ॥

सुषुम्नायां प्राणजयादिलक्षणानि

प्राणे सुषुम्नां संप्राप्ते नादोऽन्तः श्रूयतेऽष्टधा ।
घण्टादुन्दुभिशङ्खाब्धिवीणावेण्वादिताळवत् ॥ ३९ ॥
तनूनपात्तटित्ताराताारेशतपनोपमम् ।
ब्रह्मनाडीं गते प्राणे बिम्बरूपं प्रकाशते ॥ ४० ॥

एवं स्थानविशेषाभिजये चिह्नान्युक्तानि । सुषुम्नायां प्राणनिरोधनेन तत्र मनोवशीकारे चिह्नमाह—प्राणे सुषुम्नां सम्प्राप्ते इति ॥ अष्टधात्वमेवाह—घण्टेति । वेण्वादीत्यादिपदात् मृदङ्गादि गृह्यते । एतेषां ध्वनिसदृशा नादाः श्रुतिगोचराः भवन्तीत्यर्थः ॥ एवं सिद्धे सुषुम्नायां धारणायोगे प्रत्यग्रूपेश्वराविर्भावो भवतीत्याह—तनूनपादिति ॥ तनूनपात्—अग्निः । तटित्—सौदामिनी । ताराः—नक्षत्राणि । तारेशः चन्द्रः । तपनः—सूर्यः । ब्रह्मनाडी—सुषुम्नाम् । बिम्बरूपं—परमेश्वरचैतन्यं क्रमेणाग्न्यादिभासवत्[1] अवभासत इत्यर्थः ॥ ४० ॥

आत्मनि प्रणवाभिव्यक्तिप्रकारः

श्वासाश्चरन्ति यावन्तः मनुष्यस्य दिनं प्रति ।
तावन्ति योजनान्यर्कः श्वासे श्वासे प्रधावति ॥ ४१ ॥

---

[1] भाववत् · ग·

इदानीं तत्र प्रणवाभिव्यक्तिप्रकारमाह—श्वासाश्चरन्तीति ॥ ४१ ॥

एकविंशतिसाहस्रं षट्छतं श्वाससङ्ख्यया ।
सोहमित्युच्चरत्यात्मा मन्त्रं प्रत्यहमायुषे ॥ ४२ ॥

मनुष्यस्य दिनं प्रति कति श्वासाश्चरन्तीत्यपेक्षायामाह—एकविंशतीति ॥ आ सूर्योदयात्—सूर्योदयपर्यन्तं—अहोरात्रं यावत् तावत् षट्छताधिकैकविंशतिसहस्रसङ्ख्यं श्वासोच्छ्वासमाचरन् हंसः सोहमिति मन्त्रमुच्चरति स्वभावत एव । किमर्थम्? आयुषे आयुर्वृद्ध्यर्थमित्यर्थः ॥ ४२ ॥

प्रणवस्वरूपम्

सकारं च हकारं च लोपयित्वा प्रयोजयेत् ।
सन्धिं वै पूर्वरूपाख्यं ततोऽसौ प्रणवो भवेत् ॥ ४३ ॥

ततः किमित्यत आह—सकारं चेति ॥ सकारे हकारे च लुप्ते ओकारः अकारः बिन्दुश्चावशिष्यते । तत्र पूर्वरूपाख्यं सन्धिं प्रयोजयेत्, अकारमोकारात्मन्येकीकुर्यात् बिन्दुं च ओङ्कारेण योजयेदित्यर्थः ॥ ४३ ॥

तदवयवविभजनम्

अकारश्चाप्युकारश्च मकारो बिन्दुनादकौ ।
पञ्चाक्षराण्यमून्याहुः प्रणवस्थानि पण्डिताः ॥ ४४ ॥

अस्य ओङ्कारस्य प्रणवाख्यस्य अवयवान् विभजते तच्चिन्तनार्थम्—अकारश्चाप्युकारश्चेति ॥ अश्च उश्च ओ, एतदुपरि मकारे योजिते, अयं च मकारः स्वरहीनत्वात् परेण बिन्दुना योज्यः । तदा ॐ इति रूपं निष्पद्यते । एतच्च घोषवता प्राणेन एकीकारेण नादेन मूलाधारादुत्थितेन प्राणोष्मसञ्चरणनाडीगतसुषिराभिव्यक्तेन अभिव्यज्यते इति नादावसान उच्यते । एवं प्रणवस्थानि—प्रणवशब्दवाच्यपिण्डस्थानानि अमूनि पञ्चाक्षराणि, अकार उकारो मकारो बिन्दुश्चेति चत्वारि, नादश्च तेषां सामान्यात्मकः पञ्चममक्षरं, इत्येवं पञ्चाक्षराण्याहुः पण्डिताः—आत्मविद्यासु कुशलाः इत्यर्थः ॥ ४४ ॥

तद्देवताः

ब्रह्मा विष्णुश्च रुद्रश्चापीश्वरश्च सदाशिवः ।
तेष्वक्षरेषु तिष्ठन्ति षट्त्रिंशत्तत्त्वसंयुताः ॥ ४५ ॥

अथैतेषामक्षराणां क्रमेण देवता आह—ब्रह्मा विष्णुश्चेति ॥ षट्त्रिंशत्तत्त्वसंयुता इति, तान्यपि तत्त्वानि प्रणवान्तर्गतान्येव, न ततो बहिः सन्तीति द्योतयन् प्रणवस्य पूर्णात्मतां ध्वनयति । सर्वं हि वाच्यं वाचकैर्ग्रस्तमवभासते । सर्वं च वाचकं प्रणवाक्षरेण गृह्यते, तस्य सर्वशब्दसामान्यात्मकतया सर्वशब्दव्यापकत्वात् । तथा च श्रुतिः—'तद्यथा शङ्कुना सर्वाणि पर्णानि सन्तृण्णान्येवमोङ्कारेण सर्वा वाक्सन्तृण्णोङ्कार एवेदं सर्वम्'[1] इति । 'ओमित्येतदक्षरमिदं सर्वम्'[2] 'सर्वं ह्येतद् ब्रह्म'[3] इत्योङ्कारब्रह्मणोरभेदप्रतिपादनात् पूर्णाद्वितीयब्रह्मात्मकः प्रणवः संवृतः इति स तथोपास्यः इति तात्पर्यार्थः ॥ ४५ ॥

योगसिद्ध्युपायः

गुरुप्रसादाल्लभते योगमष्टाङ्गलक्षणम् ।
शिवप्रसादाल्लभते योगसिद्धिं च शाश्वतीम् ॥ ४६ ॥

इदानीम्

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिताः ह्यर्थाः प्रकाशन्ते महात्मनः ॥[4]

---

[1] शङ्कुः—पर्णनालः. संतृण्णानि—निबद्धानि. छां. उ. 2. 23. 3.

[2] मां. उ. 1. [3] मां. उ. 2.

[4] यथा सच्चिदानन्दपरज्योतिषि निरुपचरिता भक्तिः—कायवाङ्मनस्समर्पणेनैकीभावः तथा ब्रह्मविद्योपदेष्टरि दीक्षागुरौ च यस्य भक्तिरविकला तस्यैतेऽर्थाः. प्रकाशन्ते—इदमित्थमिति प्रतीयन्ते. श्वे. उ. 6. 23.

इति श्रुतिमाश्रित्य गुरुदेवतोपासनाधीना सर्वसिद्धिरिति तत्कर्तव्यतां सूचयन्नाह—गुरुप्रसादादिति ॥ योगसिद्धिः—आत्मतत्त्वाविर्भावः ॥

प्राणप्रणमनरूपप्रणवार्थानुसन्धानम्

सच्चिदानन्दरूपाय बिन्दुनादान्तरात्मने ।
आदिमध्यान्तशून्याय गुरूणां गुरवे नमः ॥ ४७ ॥

व्याख्यानान्ते मङ्गळमाचरन्नुक्तप्रणवार्थं प्रकटयति—सच्चिदानन्दरूपायेति ॥ स्वरूपमुक्तम् । बिन्दुनादान्तरात्मने इति ताभ्यामुपलक्षणीयतया उपलक्षणमुच्यते । एतदुक्तं भवति—सच्चिदानन्दाः अकारोकारमकारात्मकाः प्रणवब्रह्मस्वरूपनित्यकूटस्थं च[1] । बिन्दुनादौ तु—रूपनामनी आविर्भावतिरोभावधर्मकौ स्तः,[2] उत्पत्तिस्थितिलयाधारं वस्तु गमयतः इति प्रणवब्रह्मोपलक्षणमिति । नामरूपात्मकनादबिन्द्वधिष्ठानस्य आश्रयान्तरशङ्कामपाकुर्वन्नाह—आदिमध्यान्तशून्यायेति । कोसावेवंविध इत्यत आह—गुरूणां गुरवे नमः इति । दक्षिणामूर्तये नमः इत्यर्थः ॥ ४७ ॥

नवमश्लोकोपसंहारः

इति श्रीदक्षिणामूर्तिस्तोत्रार्थप्रतिपादके ।
प्रबन्धे मानसोल्लासे नवमोल्लाससङ्ग्रहः ॥ ४८ ॥

नवमश्लोकव्याख्यामुपसंहरति—इतीति ॥ ४८ ॥

इति श्रीमानसोल्लासे वृत्तान्ते च नवमोल्लासः

—o—

---

[1] प्रणवः ब्रह्मस्वरूपं नित्यं कूटस्थं. च. ग.

[2] 'स्तः' इति नास्ति. ग.

अथ दशमः उल्लासः

स्तोत्रश्रवणादिफलम्

सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिन् स्तवे
तेनास्य श्रवणात् तथाऽर्थमननात् ध्यानाच्च सङ्कीर्तनात् ।

उत्तरश्लोकस्य स्तोत्रफलश्रुतिपरत्वम्

परिच्छिन्नमहम्भावं परित्यज्यानुषङ्गिकम् ।
पूर्णाहम्भावलाभोऽस्य स्तोत्रस्य फलमुच्यते ॥ १ ॥

उत्तरश्लोकतात्पर्यं संक्षिप्य कथयन् तस्य पूर्वेण सङ्गतिमाह—परिच्छिन्नमिति ॥ आनुषङ्गिकं देहाद्यभिमानानुषङ्गादागतमित्यर्थः । उच्यते, उत्तरश्लोकेनेति शेषः ॥ १ ॥

यस्मादमुष्मिन् स्तवे दक्षिणामूर्तिस्तोत्रे, इति—उक्तप्रकारेण सर्वात्मत्वमिदं प्रत्यक्षं स्फुटीकृतं, तस्मादस्य स्तोत्रस्य श्रवणात्—गुरोरर्थतोऽवगमात्; तथाऽर्थमननात्—यथा श्रुतं तथा अर्थस्य युक्त्या व्यवस्थापनात्: ध्यानात्

अत्रेयं तत्त्वसुधा—

इदानीमेतत्स्तोत्रपाठादौ प्रवृत्तानां पुरुषधौरेयाणां अवश्यंभावि फलं कीर्तयन् स्तोत्रमुपसंहरति—सर्वात्मत्वमिति ॥

इति—उक्तप्रकारेण अमुष्मिन् स्तवे—अस्मिन् स्तोत्रे इदं—श्रुतिषु 'इदं सर्वं यदयमात्मा'[1] इत्यादिषु श्रूयमाणं सर्वात्मत्वं—प्रत्यगात्मनस्स्वरूपत्वं स्फुटीकृतं—स्फुटमावेदितं यस्मात् तेन अस्य—स्तोत्रस्य श्रवणात्—गुरुतो विधिवत् श्रवणात्

---

[1] बृ. उ. 4. 5. 7.

[2] आत्मा वा अरे द्रष्टव्यो मन्तव्यो निदिध्यासितव्यः इत्यत्र निदिध्यासनं ध्यानरूपमिति ज्ञापितं भवति.

सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं ततः

श्रुतमतार्थाकारवृत्तिनैरन्तर्यकरणाच्च; सङ्कीर्तनाद्—केवलं स्तोत्रकीर्तनमात्राद-पीत्यर्थः; सर्वात्मत्वलक्षणा या महाविभूतिः तया सहितं ईश्वरत्वं—निरुप-मितं निरतिशयमीश्वरत्वं स्यात्, स्वतः स्वभावतः सिद्धं, न प्रयत्नसाध्यं, तस्य अनित्यत्वावश्यम्भावादित्यर्थः। यत् पुनः प्रसिद्धं अष्टधा परिणतं अणिमाद्यैश्वर्यं, तच्च सिद्ध्येत् अनुषङ्गादेव। तच्च अव्याहतं अप्रतिहतम्। अतः इदं स्तोत्रं अर्थतः पाठतः यत्नेन गुरुभ्योऽवगम्य तन्निष्ठः भवेत्,

---

तदर्थमननात्—श्रुतस्यार्थस्य युक्तिभिरनुचिन्तनात् ध्यानात्[2]—श्रवणमननाभ्यां निर्णीतस्य तथैव सोऽहं सर्वात्मा परमेश्वरोऽस्मीति विजातीयप्रत्ययतिरस्कारेण सजातीय-प्रत्ययैकविषयीकरणात् सङ्कीर्तनात्—सम्यक्परेभ्यः कथनाच्च सर्वात्मत्वमहाविभूतिस-हितम्—सर्वात्मत्वमेव महाविभूतिः—महती सिद्धिरणिमाद्यपेक्षया, तस्य त्रिविध-परिच्छेदशून्यत्वात्, तया सहितं—युक्तं ईश्वरत्वं—सत्यज्ञानानन्दलक्षणपरमेश्वरत्वं, तत्—श्रुतिप्रसिद्धं स्वतः एव नित्यं विद्यमानं स्यात्—भवेत्, अधुना ज्ञायत इत्यर्थः। पुनः—भूयः अष्टधा—अष्टप्रकारेण परिणतं—मायापरिणामरूपं ऐश्वर्यं च—अणिमा-दिकं अव्याहतं—क्वचिदप्यप्रतिहतं सिध्येत्—'स एकदा भवति त्रिधा भवति'[1] 'स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुपतिष्ठन्ते[2] इत्यादिश्रुत्युक्तं सर्वं भवेदित्यर्थः ॥ १० ॥

---

[1] न पश्यो मृत्युं पश्यति न रोगं नोत दुःखिताम्. सर्वं ह पश्यः पश्यति सर्व-माप्नोति सर्वशः इति एतत्पूर्ववाक्यम्. सार्वात्म्यबोधिका श्रुतिरियम्. य एवं विद्वान् सः सृष्टिप्रभेदात् प्राक् एकधैव भवति. ततश्च त्रिधादि भेदात् अनन्तप्रकारो भवन् अपि अन्ततः पारमार्थिकं एकधाभावमेव प्रतिपद्यते इत्यर्थः. छां. उ. 7. 26.

[2] यः आत्मानं यथोक्तलक्षणं हृदि साक्षात्कृतवान् सः यदि स्वजनपितृभिः पितृभिः सह संबन्धुमिच्छावान् भवति तदा पितर एवास्यात्मसम्बन्धितामापद्यन्ते, ईश्वरस्यैवास्यापि विशुद्धसत्त्वतया सत्यसङ्कल्पत्वादिति भावः. छां. 8. 2. 1.

सिद्ध्येत् तत् पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ।। १० ।।[1]

इति श्री भगवत्पादशङ्कराचार्यविरचितं

श्रीदक्षिणामूर्तिस्तोत्रं सम्पूर्णम् ।।

मुमुक्षुरभ्युदयार्थी वेत्यर्थः ।। १० ।।

इदमत्राकूतम्—

स्तोत्रार्थानुभवस्य ईश्वरभावानुकूल-

समस्तसमृद्धिप्रदत्वम्

पुत्रपौत्रगृहक्षेत्रधनधान्यसमृद्धयः ।

अर्वाचीनाश्च सिद्ध्यन्ति स्वर्गपाताळभूमिषु ।। २ ।।

एवमेषा कृता व्याख्या दक्षिणाशामुखस्तुतेः ।

यथामति तया तुष्टो दक्षिणामूर्तिरस्तु नः ।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यकैवल्यानन्दयोगीन्द्रपादकमल-

भृङ्गायमाणस्वयम्प्रकाशयतिविरचिता श्रीदक्षिणामूर्तिस्तोत्र-

व्याख्या तत्त्वसुधाख्या समाप्ता.[2]

—0—

---

[1] केषुचित् पुस्तकेषु इतोऽप्यधिकं श्लोकत्रयं दृश्यते । यथा—

'वटविटपिसमीपे भूमिभागे निषण्णं

सकलमुनिजनानां ज्ञानदातारमारात् ।

त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं

जननमरणदुःखच्छेददक्षं नमामि ।। ११ ।।

चित्रं वटतरोर्मूले वृद्धाः शिष्याः गुरुर्युवा ।

गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः ।। १२ ।।

चिद्घनाय महेशाय वटमूलनिवासिने ।

सच्चिदानन्दरूपाय दक्षिणामूर्तये नमः ।। १३ ।।' इति ।।

[2] S.P. 4610. S.P. 1781. मातृकयोः—'अत्र पुरुषोत्तमानन्दविरचिता सुबोधिनी समाप्ता' इति दृश्यते. निर्णयसागरमुद्रिते तु लघुतत्त्वसुधेति एतद्व्याख्यायाः नाम निर्देशः कृतः.

पाके प्रवर्तमानस्य शीतादिपरिहारवत् ।
प्रासङ्गिकाश्च सिद्ध्यन्ति स्तोत्रेणानेन सर्वदा ॥ ३ ॥

अस्य व्याख्यां प्रारभते—इदमत्राकूतमिति ॥

यद्यपि अस्मात् स्तोत्रात् सर्वे एव अभिलषणीयार्थाः लभ्यन्ते, तथापि बुद्धिमता न क्षुद्रलाभायेदं प्रयोक्तव्यं, किन्तु महाफलाय पारमेश्वरपदायैव; अर्वाचीनानेकफलानि तु प्रसङ्गतो वस्तुमहिम्नैव भविष्यन्तीति तात्पर्यमभिप्रेत्याह—पुत्रपौत्रेत्यादिना ॥ स्वर्गे वा पाताळे वा भूमौ वा भविष्यन्त्येव यथाकालं सर्वेऽर्वाचीनाः फलभेदाः इत्यर्थः ॥ तत्रासङ्कल्पितस्यापि फलस्यानुषङ्गिणः सिद्धिं दृष्टान्तेनोपपादयति—पाके प्रवर्तमानस्येति ॥ ३ ॥

ऐश्वर्यपदार्थः

ऐश्वर्यमीश्वरत्वं हि तस्य नास्ति पृथक् स्थितिः ।
पुरुषे धावमानेऽपि[1] छाया तमनुधावति ॥ ४ ॥
अनन्तशक्तिरैश्वर्यं निष्यन्दाश्चाणिमादयः ।
स्वस्येश्वरत्वे संसिद्धे सिद्ध्यन्ति स्वयमेव हि ॥ ५ ॥

एवं तात्पर्यमुक्त्वा स्यादीश्वरत्वं इत्युक्तं ईश्वरत्वं व्याचष्टे—ऐश्वर्यमीश्वरत्वं हीति ॥ ईश्वरस्य स्वरूपमैश्वर्यं पृथक् स्थितिः—पार्थक्येनावस्थानं नास्तीत्यर्थः । तत्र दृष्टान्तमाह—पुरुषे धावमाने इति ॥ किं तदैश्वर्यं यत् छायावदवियुक्तमीश्वरस्य सदेत्यपेक्षायामाह—अनन्तशक्तिरिति ॥ वाचामगोचरमनतिशयं सहजं सामर्थ्यं तदैश्वर्यमित्यर्थः । नन्वणिमादिसिद्ध्यो ह्यैश्वर्यमिति प्रसिद्धिः, कथमनन्तशक्तिरैश्वर्यमिति ? तत्राह—निष्यन्दाश्चेति । अणिमादयः सिद्धयः ईश्वरशक्तेः निष्यन्दाः—विप्रुण्मात्राः, तासां परिच्छिन्नत्वात्, अन्येष्वपि तारतम्येन भावात् । तथा च श्रुतिः 'एतस्यैवानन्दस्या-

[1] धावमाने हि. क.

न्यानि भूतानि मात्रामुपजीवन्ति'[1] इति। तस्मादीश्वरत्वसिद्ध्यर्थमेव स्तोत्रं प्रयोक्तव्यं, नाणिमादिसिद्ध्यर्थं, तस्य तस्मिन्नानुषङ्गिकत्वादित्याह—स्वस्येति ॥ ५ ॥

सदाशिवस्यैश्वर्यम्

यदीयैश्वर्यविप्रुड्भिः ब्रह्मविष्णुशिवादयः।
ऐश्वर्यवन्तो भासन्ते स एवात्मा सदाशिवः ॥ ६ ॥
पुष्पमानयता गन्धः विनेच्छामनुभूयते।
पूर्णाहम्भावयुक्तेन परिच्छिन्नाः विभूतयः ॥ ७ ॥

तथापि ब्रह्माद्यैश्वर्याय पृथक् प्रयोक्तव्यं इत्याशङ्क्य, तदप्यस्यैव लेशः इत्याह—यदीयेति ॥ विप्रुड्भिः—बिन्दुभिः—लेशैरिति यावत्। कथं विद्वदैश्वर्यलेशाः ब्रह्माद्यैश्वर्यभेदाः, तेषां सदाशिवविभूतित्वात् इत्याशङ्क्याह—स एवात्मा सदाशिवः इति। सदाशिव एवात्मा, आत्मैव सदाशिवः इत्यर्थः ॥ अतो ब्रह्माद्यैश्वर्यमपि स्वभावमहिम्नैवोपनमते विदुषः इत्येतत् दृष्टान्तेनाह—पुष्पमानयतेति ॥ तस्मात् पूर्णात्मनि सदाशिवरूपे एव सम्भावना कार्या, न ब्रह्मादिष्विति स्थितं स्तोत्रफलस्तुतेः तात्पर्यम् ॥ ७ ॥

अष्टसिद्धयः

अणिमा महिमा चैव गरिमा लघिमा तथा।
प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः ॥ ८ ॥

इदानीमणिमाद्यैश्वर्याणि विभज्य व्युत्पादयन् 'अष्टधा परिणतं चैश्वर्यमव्याहतम्' इत्येतद्व्याचष्टे—अणिमा महिमा चेति ॥ ८ ॥

तत्र अणिमा

अत्यन्तमणुषु प्राणिष्वात्मत्वेन प्रवेशनम्।
अणिमासंज्ञमैश्वर्यं व्याप्तस्य परमात्मनः ॥ ९ ॥

---

[1] मात्रा—कला—अविद्याप्रत्युपस्थापिता विषयेन्द्रियसम्बन्धकालविभाव्या. बृ. 4. 3. 32.

तत्राणिमाख्यां सिद्धिं दर्शयति—अत्यन्तमिति ।। पुत्तिकापुलकादिप्राण्यादिष्वित्यर्थः[1] ।। ९ ।।

महिमा

ब्रह्माण्डादिशिवान्तायाः षट्त्रिंशत्तत्त्वसंहतेः ।
बहिश्च व्याप्यवृत्तित्वं ऐश्वर्यं महिमाह्वयम् ।। १० ।।

महिमाख्यामाह—ब्रह्माण्डादीति ।। शिवो विराज्यभिव्यक्तः पुरुषः ।। १० ।।

गरिमा

परमाणुसमाङ्गस्य समुद्धरणकर्मणि ।
गौरवे मेरुतुल्यत्वं गरिमाणं विदुर्बुधाः ।। ११ ।।

गरिमाख्यामाह—परमाणुसमाङ्गस्येति ।। अस्यापि सर्ववैपरीत्येन योजना ।। ११ ।।

लघिमा

महामेरुसमाङ्गस्य समुद्धरणकर्मणि ।
लाघवे[1] तूलतुल्यत्वं लघिमानं विदुर्बुधाः ।। १२ ।।

लघिमाख्यामाह—महामेरुसमाङ्गस्येति ।। योगिनो विशेषणमेतत् । इच्छया अतिस्थूलतामापन्नस्य अन्यैः समुद्धरणे तूलतुल्यत्वं—लघिमेत्यर्थः ।।

प्राप्तिः

पाताळवासिनः पुंसः ब्रह्मलोकावलोकनम् ।
प्राप्तिर्नाम महैश्वर्यं सुदुष्प्रापमयोगिनाम्[2] ।। १३ ।।

प्राप्त्याख्यमैश्वर्यं व्युत्पादयति—पाताळवासिनः इति ।। १३ ।।

---

[1] पुत्तिकानाम—मधुमक्षिका, पतङ्गिका, पिपीलिका वा (मनुः· 4· 238). पुलकः—तुच्छधान्यविशेषः. यथोक्तम्—'पुलका इव धान्येषु पुत्तिका इव पक्षिषु' इति (पञ्च· 3. 99).

[2] योगेन: क. योगिनः ग. [3] दुष्प्रापमपि योगिनाम् . ग.

प्राकाम्यप्राकाश्ये

आकाशगमनादीनां अन्यासां सिद्धिसम्पदाम् ।
स्वेच्छामात्रेण संसिद्धिः प्राकाम्यमभिधीयते ॥ १४ ॥
स्वशरीरप्रकाशेन सर्वार्थानां प्रकाशनम् ।
प्राकाश्यमिदमैश्वर्यमिति केचित् प्रचक्षते ॥ १५ ॥

प्राकाम्याख्यां सिद्धिमाह—आकाशगमनादीनामिति ॥ प्राकाश्यनामकं ऐश्वर्यमाह—स्वशरीरप्रकाशेनेति ॥ १५ ॥

ईशित्वम्

स्वेच्छामात्रेण लोकानां सृष्टिस्थित्यन्तकर्तृता ।
सूर्यादीनां नियोक्तृत्वं ईशित्वमभिधीयते ॥ १६ ॥

ईशित्वाख्यामाह—स्वेच्छामात्रेणेति ॥ 'जगद्व्यापारवर्जम्'[1] इति न्यायेन यद्यपि विदुषो लोकविषये स्वातन्त्र्यं वारितं, तथापि विश्वामित्रादिवत् ब्रह्माण्डस्थितावेव वापीकूपतटाकनगरीवनगिरिविहार[2]स्थलसृष्ट्याद्यभिप्रायमेतत्तदिति द्रष्टव्यम् ॥ १६ ॥

वशित्वम्

सलोकपालाः सर्वेऽपि लोकाः स्ववशवर्तिनः ।
तदैश्वर्यं वशित्वाख्यं सुलभं शिवयोगिनाम्[3] ॥ १७ ॥
यस्त्वेवं ब्राह्मणो वेत्ति तस्य देवाः वशे स्थिताः ।
किं पुनः क्ष्मापतिव्याघ्रव्याळस्त्रीपुरुषादयः ॥ १८ ॥

वशित्वमाह—सलोकपाला इति ॥ शिवयोगिनां[4] उक्तमैश्वर्यं सुलभं

---

[1] मुक्तानां जगदुत्पत्त्यादिव्यापारं वर्जयित्वा अन्यत् अणिमाद्यात्मकं ऐश्वर्यं भवितुमर्हतीत्यर्थः. ब्र. सू. 4. 4. 17.

[2] नगरीविहार. क. [3] सुरयोगिनाम्. ग. [4] सर्वयोगिनाम्. क.

इत्यत्र प्रमाणश्रुतिमुदाहरति—यस्त्वेवमिति ॥ 'यस्त्वैवं ब्राह्मणो विद्यात् । तस्य देवा असन् वशे'[1] इति मन्त्रस्वरूपस्य प्रतिनिर्देशोऽयम् । योगिनां क्ष्मापत्यादिवशीकरणं[2] कैमुत्यन्यायेनाह—किं पुनरिति ॥ १८ ॥

सर्वात्मभावनायाः महिमा

स्तोत्रमेतत् पठेद्धीमान् सर्वात्मत्वं च भावयेत् ।
अर्वाचीने स्पृहां मुक्त्वा फले स्वर्गादिसम्भवे ॥ १९ ॥
सर्वात्मभावसाम्राज्यनिरन्तरितचेतसाम् ।
परिपक्वसमाधीनां किं किं नाम न सिद्ध्यति ॥ २० ॥

यद्यप्येवं महिमा अस्य स्तोत्रस्य, तथापि न तेषु फलेष्वानुषङ्गिकेष्वपि मतिः कार्येत्युपदिशति[3]—स्तोत्रमेतदिति ॥ न परिगणितं ऐश्वर्यं सर्वात्मभावनामाहात्म्येन, यद्यदभिलषितं तत्तदखिलं भवेदेवेत्याह[4]—सर्वात्मभावेति ॥ २० ॥

आत्मवतां दृष्ट्या साम्राज्यस्वरूपम्

स्वर्गादिराज्यं साम्राज्यं मनुते न हि पण्डितः ।
तदेव तस्य साम्राज्यं यत्तु स्वाराज्यमात्मनि ॥ २१ ॥
सर्वात्मभावनावन्तं सेवन्ते सर्वसिद्धयः ।
तस्मादात्मनि साम्राज्यं कुर्यात् नियतमानसः ॥ २२ ॥

कुतः इत्यपेक्षायामाह—स्वर्गादिराज्यं साम्राज्यमिति ॥ स्वर्गादिराज्यं

---

[1] तै. उ. 3. 13. [2] शिवयोगिनां सर्ववशित्वं. क.

[3] मतिं कुर्यादिति प्राणिनो हितमुपदिशति. क.

[4] ऐश्वर्यं सदाशिवात्मध्याननिष्ठा फलं भवेत्, अपितु सर्वमेव सदा भवेदेवेत्याह. ग.

साम्राज्यं कस्मात् पण्डितो न मनुते इत्यत आह[1]—सर्वात्मभावनावन्तमिति ॥ २२ ॥

एतत्सर्वार्थप्रकाशनं प्रति गुरुभक्तेः मूलत्वम्

यस्य देवे परा भक्तिः यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः[2] ॥ २३ ॥

देवे दक्षिणामूर्त्याख्ये गुरौ च स्वे भक्तिमतः अस्मिन् स्तोत्रे अधिकारः नान्यस्येति दर्शयति—यस्य देवे इति । श्रुतिरेवैषा[3] ॥ २३ ॥

मङ्गलाशंसनम्

प्रकाशात्मिकया शक्त्या प्रकाशानां प्रभाकरः ।
प्रकाशयति यो विश्वं प्रकाशोऽयं प्रकाशताम् ॥ २४ ॥

तदेवं शेषं स्तोत्रं तात्पर्यतो व्याख्याय ग्रन्थप्रचयविघ्नोपशान्तये शिष्टाचारलक्षणं मङ्गळं वस्तुनिर्देशात्मकमाचरति—प्रकाशात्मिकयेति ॥ आदित्यादिप्रकाशानामपि प्रभाकरः इत्यर्थः । स्वयमेव प्रकाशतामित्यर्थः ॥ २४ ॥

ग्रन्थोपसंहारः

इति श्रीदक्षिणामूर्तिस्तोत्रार्थप्रतिपादके ।
प्रबन्धे मानसोल्लासे दशमोल्लाससङ्ग्रहः ॥ २५ ॥

इति श्रीसुरेश्वराचार्यकृतं मानसोल्लासाख्यं
दक्षिणामूर्तिस्तोत्रभावार्थवार्तिकं समाप्तम्

-O-

---

[1] पण्डितोऽपि न मन्यते तत्राह. ग.

[2] श्वेता. उ. 6. 23. [3] इदं वाक्यं नास्ति. ग.

दशमश्लोकव्याख्यामुपसंहरति—इतीत्यादि ॥ २५ ॥

इति श्रीमानसोल्लासप्रबन्धोऽयं यथामति ।
व्याख्यातो रामतीर्थेन गुरुदेवप्रसादतः ॥
अनेन भगवान् श्रीमद्दक्षिणाशामुखः शिवः ।[1]
प्रीयतां भजतां नित्यं[2] तत्त्वज्ञानप्रदः सताम् ॥

इति श्रीरामतीर्थविरचितः मानसोल्लासवृत्तान्ताख्यः
मानसोल्लासव्याख्याप्रबन्धः
समाप्तः

—o—

---

[1] श्रीमद्दक्षिणामूर्तिरीश्वरः. ग. गुर्वात्मा प्रीयतां नित्यम् . ग.

अनुबन्धाः

---

1 श्रीभगवत्पादशङ्कराचार्यविरचितम्—

पञ्चीकरणम्

सुरेश्वरवार्तिकसहितम्

2 स्तोत्रपद्यपादानुक्रमणी

3 प्रमाणानुक्रमणी

4 दृष्टान्तविशेषानुक्रमणी

5 पदविशेषानुक्रमणी

6 उद्धृतग्रन्थग्रन्थकाराणामनुक्रमणी

7 कन्नडभाषया स्तोत्रार्थानुवादः

—oOo—

(1) श्रीभगवत्पादशङ्कराचार्यविरचितं

पञ्चीकरणम्

श्रीमत्सुरेश्वराचार्यविरचितवार्तिकसमलङ्कृतम्

—o—

अथातः परमहंसानां समाधिविधिं व्याख्यास्यामः ।

ॐकारः सर्ववेदानां सारस्तत्त्वप्रकाशकः । तेन[1] चित्तसमाधानं[2] मुमुक्षूणां प्रकाश्यते ॥

सच्छब्दवाच्यमविद्याशबलं ब्रह्म । ब्रह्मणोऽव्यक्तम् । महतोऽहंकारः । अहंकारात् पञ्चतन्मात्राणि । पञ्चमहाभूतानि । पञ्चमहाभूतेभ्योऽखिलं जगत् ।

आसीदेकं परं ब्रह्म नित्यमुक्तमविक्रियम् ।[3] तत्स्वमायासमावेशाद्बीजमव्याकृतात्मकम्[4] ॥ तस्मादाकाशमुत्पन्नं शब्दतन्मात्ररूपकम् ।[5] स्पर्शात्मकस्ततो वायुस्तेजो रूपात्मकं ततः ॥ आपो रसात्मिकास्तस्मात्तेभ्यो गन्धात्मिका मही । शब्दैकगुणमाकाशं शब्दस्पर्शगुणो मरुत् ॥ शब्दस्पर्शरूपगुणैस्त्रिगुणं तेज उच्यते । शब्दस्पर्शरूपरसगुणैरापश्चतुर्गुणाः ॥ शब्दस्पर्शरूपरसगन्धैः पञ्चगुणा मही । तेभ्यः समभवत्सूत्रं लिङ्गं सर्वात्मकं महत् ॥

---

[1] ओङ्कारेणेत्यर्थः. [2] ब्रह्मात्माभेदाकारतया अवस्थानम्.

[3] नित्यमुक्तं—सर्वविधप्रपञ्चसम्बन्धशून्यम्. निरवयवत्वात् विभुत्वाच्च अविक्रियत्वम्.

[4] समावेशः—आध्यात्मिकं तादात्म्यम्. अनभिव्यक्तनामरूपात्मकत्वं अव्याकृतत्वम्.

[5] तदुक्तं विष्णुपुराणे—'तस्मिंस्तस्मिंस्तु सा मात्रा तेन तन्मात्रता स्मृता । न शान्ताः नापि ते घोराः न मूढास्ते विशेषणाः' ॥ इति

ततः स्थूलानि भूतानि पञ्च तेभ्यो विराडभूत् । पञ्चीकृतानि भूतानि स्थूलानीत्युच्यते बुधैः ॥

पञ्चानां भूतानामेकैकं द्विधा विभज्य स्वार्द्धभागं विहायार्द्धभागं चतुर्धा विभज्येतरेषु योजिते पञ्चीकरणं मायारूपदर्शनमध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्चयते ।

पृथिव्यादीनि भूतानि प्रत्येकं विभजेद्द्विधा । एकैकं भागमादाय चतुर्धा विभजेत्पुनः ॥ एकैकं भागमेकस्मिन्भूते संवेशयेत्क्रमात् । ततश्चाकाशभूतस्य भागाः पञ्च भवन्ति हि ॥ वाय्वादिभागाश्चत्वारो वाय्वादिष्वेवमादिशेत् । पञ्चीकरणमेतत्स्यादित्याहुस्तत्त्ववेदिनः ॥

पञ्चीकृतपञ्चमहाभूतानि तत्कार्यं सर्वं विराडित्युच्यते । एतत्स्थूलशरीरमात्मनः ।

पञ्चीकृतानि भूतानि तत्कार्यं च विराड् भवेत् । स्थूलं शरीरमेतत्स्यादशरीरस्य चात्मनः ॥ अधिदैवतमध्यात्ममधिभूतमिति त्रिधा । एकं ब्रह्म विभागेन भ्रमाद्भाति न तत्त्वतः ॥

इन्द्रियैरर्थोपलब्धिर्जागरितम् । एतदुभयाभिमान्यात्मा । एतत् त्रयमकारः ।

इन्द्रियैरर्थविज्ञानं देवतानुग्रहान्वितैः । शब्दादिविषयं ज्ञानं तज्जागरितमुच्यते ॥ श्रोत्रमध्यात्ममित्युक्तं श्रोतव्यं शब्दलक्षणम् । अधिभूतं तदित्युक्तं दिशस्तत्राधिदैवतम् ॥ त्वगध्यात्ममिति प्रोक्तं स्प्रष्टव्यं स्पर्शलक्षणम् । अधिभूतं तदित्युक्तं वायुस्तत्राधिदैवतम् ॥ चक्षुरध्यात्ममित्युक्तं द्रष्टव्यं रूपलक्षणम् । अधिभूतं तदित्युक्तमादित्योऽत्राधिदैवतम् ॥ जिह्वाऽध्यात्मं तयास्वाद्यमधिभूतं रसात्मकम् । वरुणो देवता तत्र जिह्वायामधिदैवतम् ॥ घ्राणमध्यात्ममित्युक्तं घ्रातव्यं गन्धलक्षणम् । अधिभूतं तदित्युक्तमश्विनावधि-

